CC-0. In Public Domain. Digitization by eGangotri



ऋतम्भरा

ṚTAMBHARĀ

नेपाल-संस्कृत-विश्वविद्यालयः
अनुसन्धानकेन्द्रम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपालसंस्कृतविश्वविद्यालयीयानुसन्धानकेन्द्रस्य अनुसन्धानात्मिका
चातुर्मासिकी त्रैभाषिकी पत्रिका

ऋतम्भरा

RITAMBHARA

वर्षम् १२, पूर्णाङ्कः १५

संरक्षकः
प्रा. नारायणकुमार आचार्य
शिक्षाध्यक्षः

प्रधानसम्पादकः
प्रा. डा. लीलानाथः पौडेल

सम्पादकसन्दोहः
प्रा. डा. विष्णुप्रसादशर्मा देवकोटा
सहप्रा. श्रीध्रुवप्रसादः भट्टराई
सहप्रा. डा. काशीनाथः न्यौपाने
सहप्रा. श्रीधनेश्वरनेपालः
सहप्रा. श्रीकृष्णप्रसादः पौडेल
उपप्रा. श्रीसुधनः पौडेल

कार्यकारि-सम्पादकः
सहप्रा. डा. नारायणः चालिसे

प्रकाशकः
अनुसन्धानकेन्द्रम्
नेपालसंस्कृतविश्वविद्यालयः
काष्ठमण्डपः, नेपालः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ऋतम्भरा

प्रकाशकः
अनुसन्धानकेन्द्रम्
नेपालसंस्कृतविश्वविद्यालयः
वसन्तपुरम्, काष्ठमण्डपः
दूरभाषाङ्काः (फोन नं.) : ४२४७४४५, ४२३३४३४

प्रकाशनम्
वैशाखः १, नववर्षम् २०६९

प्रकाशितसङ्ख्या : ५००

मूल्यम् : रू. ५००/-

सुसाङ्ख्यटङ्कनम्
राजेशतण्डुकारः
दूरभाषाङ्काः (फोन नं.) : ९८४१३४५९९९, ४९९२४९९

मुद्रकः
भद्रकाली अफसेट प्रेस प्रा.लि.
पुतलीसडक, काष्ठमण्डपः
दूरभाषाङ्काः (फोन नं.) : ०१-४१६८०९१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपाल संस्कृत विश्वविद्यालय
Nepal Sanskrit University

बेलझुण्डी, दाङ
Beljhundi, Dang

उपकुलपतिको कार्यालय

Office of the Vice-Chancellor

मितिः -२०६८/१२/१९

शुभा कामना

नेपाल-संस्कृत-विश्वविद्यालयस्यानुसन्धानकेन्द्रेण त्रिपञ्चाशदुत्तरद्विसहस्रतम -(२०५३) विक्रमसंवत्सरत एव **ऋतम्भर**नाम्नी विविधविषयावबोधिकाऽनुसन्धानमूला त्रैभाषिकी चातुर्मासिकी पत्रिका प्रकाशिता प्रकाश्यमाना च वर्तते । अनुसन्धानकेन्द्रस्यास्याः पत्रिकायाः पञ्चदशात्मकोऽङ्क इदानीं प्रकाशोन्मुखो वर्तत इति श्रुत्वा प्रसन्नमना अस्मि ।

पठनपाठनानुसन्धानानि कस्यापि विश्वविद्यालयस्य जीवनम् । अथ च पठनपाठनेन सहानुसन्धानम्, तन्मूलकानां ग्रन्थानां प्रकाशनम्, स्तरीय-पाठ्यक्रमानुसारि-स्तरयुक्त-प्रश्नपत्राणां माध्यमेन मर्यादितायाः परीक्षायाः सञ्चालनञ्च विश्वविद्यालयस्य मुख्यानि कार्याणि भवन्ति । प्रकाशन-पाठ्यक्रम-प्रश्नपत्रादिना तत्रत्यानां प्राध्यापकानां छात्राणाञ्च योग्यताया अनुमानं सम्भवति । तदर्थं तत्रत्यच्छात्राणां प्राध्यापकानां कर्मचारिणाञ्च स्वकीयकर्तव्येषु शास्त्रावगाहनेषु च मनोयोगेन समर्पणमावश्यकम् । तत्र पदाधिकारिणां कर्तव्यन्तु तदर्थमनुकूलवातावरणस्य सम्पादनम् । यद्यपि, अद्यत्वे राष्ट्रस्य वातावरणं विद्याविकासानुकूलं न दृश्यते, तथापि यथासम्भवमस्माभिः सत्प्रयत्ना विधेया एव प्रतिभान्ति ।

'नैकं शास्त्रमधीयानो गच्छति शास्त्रनिर्णयम्' इत्यनुसारेण प्राध्यापकैर्वैदुष्योपार्जनं छात्रैश्च निर्धारितानां ग्रन्थानां सम्यग् विषयावबोधः, कर्मचारिभिश्च स्व-स्वकर्मसु दायित्वनिर्वाहपुरस्सरं दक्षतार्जनमवश्यमेव विधेयम् । **ऋतम्भरे**यमत्रान्येषु विषयवस्तुषु च नवं ज्ञानं नवां दृष्टिं विविधविषयावबोधञ्च पाठकेभ्यो वितरिष्यतीति आशासे । बहूनां विद्वद्धुरीणानां सुरभारत्यादि-नैकभाषासु नव-नव-दृष्टिसमुद्घाटनपरा विशिष्टा लेखाः, अनुसन्धानप्रधाना रचनाश्च प्रकाशिता यदि भवेयुस्तदाऽस्या महदुपयोगित्वं मन्येत । विषयवैदुष्यस्य सीमा न भवतीति धियाऽध्येयं लेख्यञ्च विद्वद्भिः । ततो विषयवैदुष्यं प्रवर्द्धते, परस्परं निर्व्याजं विमर्शो भवति रचनासामर्थ्यञ्च विजृम्भते । देशविकासः प्रज्ञाविकासेनैव भवतीति याथार्थ्यं **ऋतम्भरे**दमपि बोधयिष्यतीति दृढतरो मे विश्वासः ।

अस्य विश्वविद्यालयस्य स्थापनायाः पञ्चविंशतितमे रजतवर्षे द्वाविंशतिसूत्रात्मकं नानाविधं कार्यक्रमं वर्षावधि सम्पादयितुमायोजकसमितिसङ्घटनपुरस्सरं विविधाः प्रयत्ना विधीयमाना वर्तन्ते । तत्र च रजतमहोत्सवसमारोहस्य समुद्घाटनम्, रजतस्तम्भस्यानावरणम्, केन्द्रीयपुस्तकालयभवनस्य समुद्घाटनम्, आयुर्वेदकेन्द्रीयशिक्षणभवनस्य शिलान्यासः, प्राच्यपाश्चात्त्य-न्यायप्रणालीविषयक-विचारगोष्ठी, विद्वद्वरस्य योगिनो नरहरिनाथमहोदयस्य प्रस्तरप्रतिमायाः स्थापनमनावरणञ्चेति बहुविधं कार्यं सम्पन्नम् । आयुर्वेद-स्नातक (बिए.एम.एस.) कक्षासञ्चालन-सन्तविद्वत्सम्मेलनादीनि तत्रावशिष्टानि कतिपयकार्याणि वर्षाभ्यन्तर एव क्रमशः सम्पादयिष्यन्ते । इदं कार्यजातं विश्वविद्यालयेऽस्मिन् अनुकूलं वातावरणं निर्मातुं जनानां ध्यानमाकर्षयितुञ्च प्रभविष्यतीति द्रढीयान् विश्वासो वर्ततेऽस्माकम् ।

अन्त्ये च अस्याः पत्रिकाया माध्यमेनास्मद्विश्वविद्यालयस्य प्राज्ञिकी अनुसन्धानात्मिका च स्थितिः शिखरायिता स्यात्, मार्गश्चास्याः सुमनोमयो भवेदिति आशासानः सम्पादकसन्दोहाय धन्यवादान् वितीर्य, 'श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्' इति प्रकृतार्थमुद्धरन् विरमामि । 'शम्'-

प्रा.शिवहरिमरहट्ठा
उपकुलपतिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपाल संस्कृत विश्वविद्यालय

Nepal Sanskrit University

शिक्षाध्यक्षको कार्यालय

Office of the Rector

काठमाडौं कार्यालय, वसन्तपुर
पो.ब.नं. ५००३

Kathmandu Office, Basantapur
P.O. Box No. 5003

मिति : २०६८।१२।२५

विषय : शुभसम्मति !

नेपाल संस्कृत विश्वविद्यालय अनुसन्धान केन्द्रमार्फत् प्रकाशित हुँदै आएको *'ऋतम्भरा'* पत्रिकाको १५औं अङ्क सार्वजनिक हुन थालेकोमा खुसी लागेको छ । केही वर्ष अघिसम्म एउटा साहित्यिक पत्रिकाकै शैलीमा प्रकाशित हुँदै आएको *'ऋतम्भरा'* विस्तार विस्तार प्राज्ञिक एवं अनुसन्धानमूलक जर्नलका रूपमा परिवर्तित हुँदै गएको छ, जुन हामी सबैका लागि गौरवको कुरा हो । मैले बुझेसम्म यो अङ्कको प्रकाशन अपेक्षाकृत रूपमा निकै ढिलो भएको छ । आगामी दिनमा *'ऋतम्भरा'* लाई सामयिक र नियमित तुल्याउनु हामी सबैको दायित्व हो भन्ने म ठान्दछु । *'ऋतम्भरा'* को सम्पादक-समूह र अनुसन्धान केन्द्रले यस कुरालाई गम्भीरतापूर्वक लिनुपर्छ ।

हाम्रो विश्वविद्यालयलाई वाह्य जगत्मा चिनाउने एउटा गतिलो स्रोत. सामग्रीका रूपमा *'ऋतम्भरा'* को अस्तित्व निकै महत्त्वपूर्ण छ । यस प्रकारका अनुसन्धानमूलक पत्रिकाहरू निकै कममात्र प्रकाशित हुने गर्छन् र यिनको उच्च प्राज्ञिक मूल्य रहन्छ । यस्ता पत्रिकाहरू विभिन्न विश्वविद्यालय र त्यहाँ कार्यरत विद्वान्हरूका लागि विचार विनिमयका साझा मञ्चसमेत बन्न सक्छन् । हामीले अलिकति मेहनत गर्ने हो भने *'ऋतम्भरा'* लाई नेपाल एवं दक्षिण एसियामै प्राच्य वाङ्मयको मूल्यवान् जर्नलका रूपमा विकसित गर्न सकिन्छ । हामीलाई थाहै छ, विश्वमा प्रचलित अधिकांश प्रमुख धार्मिक एवं दार्शनिक मान्यताहरूको उद्‌गमस्थल एसिया महादेश नै हो । अहिले पनि भारत, श्रीलंका, थाइल्याण्ड, माल्दिभ्स, भुटान, पाकिस्तान, म्यान्मार र बंगालादेशका धुप्रै विश्वविद्यालयमा प्राच्य दर्शनको अध्ययन-अध्यापन हुने गर्छ । हामीले अमेरिका र युरोपमा *ऋतम्भरा* पुऱ्याउन नसकौंला, चाहने नै हो र कम्मर कस्ने नै हो भने कम्तीमा भारत, श्रीलंका, म्यान्मार, भुटान र थाइल्याण्डसम्म यसको प्रचार प्रसार गर्न सक्छौं भन्ने कुरामा चाहिँ मलाई विश्वास छ । यसका लागि हामीले वाहिरको जनशक्ति पनि खोज्नु पर्दैन, हाम्रै विश्वविद्यालयभित्रका प्राध्यापक, कर्मचारी र विद्यार्थीहरूको सहकार्यबाट यो काम सजिलै सम्पन्न हुन सक्छ । तसर्थ यस कुरामा प्राज्ञिक समुदायले चासो देखाएर छलफल सुरु गर्नुपर्छ भन्ने मेरो धारणा छ । हामीसँग खोज-अनुसन्धान गर्नका लागि सयौं विषयहरू र काम गर्नका लागि अनेकौं बाटाहरू छन्; मात्र मेहनत, इमान्दारी र उत्साहको खाँचो छ । विद्वान्हरूका रचनात्मक प्रयासमा सहयोगीको भूमिका खेल्न नेसंवि सदैव तत्पर छ ।

'ऋतम्भरा' ले नेपाली राष्ट्रियता, नेपाली संस्कृति र नेपाली जातिका असल पक्षहरूलाई आफ्नो खोज-अनुसन्धानको विषय बनाई संस्कृत क्षेत्रको एउटा उज्यालो ज्योतिका रूपमा आफ्नो पहिचान बढाउँदै लगोस् । *'ऋतम्भरा'* अझै लोकप्रिय बन्यो र देश विदेशमा यसको व्यापक प्रचार प्रसार भयो भने नेसंविको इज्जत र प्रतिष्ठा पनि अवश्य वृद्धि हुनेछ । यसमार्फत् पूर्वीय ज्ञान-विज्ञानको यथार्थ एवं तथ्यपरक जानकारी आमजनसमुदायसम्म पुग्न सक्यो भने सबै राष्ट्रवासी लाभान्वित हुनेछन् । नेसंविमा कार्यरत सबै विद्वान् प्राध्यापकहरू, चिन्तनशील कर्मचारीहरू र विद्यार्थीहरूलाई समेत यस कार्यमा आ-आफ्नो क्षेत्रबाट बौद्धिक योगदानका लागि म अनुरोध गर्दछु ।

प्रा. नारायणकुमार आचार्य
शिक्षाध्यक्ष

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपाल संस्कृत विश्वविद्यालय

Nepal Sanskrit University

कुलसचिवको कार्यालय

काठमाडौं कार्यालय, वसन्तपुर
पो.ब.नं. ५००३

Kathmandu Office, Basantapur
P.O. Box No. 5003

मिति : २०६९। ०१। ०१

पत्रसंख्या : (फा.नं.)/ च.नं.

विषयः :- शुभकामना।

नेपालसंस्कृतविश्वविद्यालयानुसन्धानकेन्द्रस्यानुसन्धानात्मिकायाश्चातुर्मासिक्यास्त्रैभाषिक्या **ऋतम्भरेति** पत्रिकायाः पञ्चदशोऽङ्कः सत्वरं प्रकाश्यमानोऽस्तीति श्रुत्वा मोमुद्यते मे मनः ।

अनुसन्धानं शिक्षणस्य महत्त्वपूर्णमङ्गम् इति नहि कस्यचिदपि विपश्चितो विप्रतिपत्तिः। प्राच्यवाङ्मयपारावारे सन्निहितानां ज्ञानविज्ञानराशीनामनुसन्धानं संविधाय आधुनिकजगति संस्कृतस्योपयोगित्वस्य महत्त्वस्य च प्रदर्शनपुरःसरं सकलाध्येतृणामनुसन्धातृणाञ्च शोधमार्गप्रशस्तये नेपालसंस्कृतविश्वविद्यालयानुसन्धानकेन्द्रद्वारा **ऋतम्भरायाः** प्रकाशनं प्रारब्धमिति सुविदितमेव बुधजनैः । अस्याः पत्रिकायाः पूर्वप्रकाशितैर्विभिन्नैरङ्कैरुद्देश्यानुरूपं योगदानं प्रत्तं नूनमेवेति मन्येऽहम्।

ऋतम्भरायाः पञ्चदशेऽङ्केऽस्मिन् प्रकाश्यमानाः सकलाः शोधात्मिका रचनाः संस्कृतवाङ्मयस्यानुद्घाटितानां विविधानां विषयाणां समुद्घाटने, तद्वैशिष्ट्यानाञ्च प्रकाशने समर्था भविष्यन्तीति मदीयो विश्वासः।

अन्त्ये च अस्याङ्कस्य सम्पादने प्रकाशने च संलग्नेभ्यः सर्वेभ्यः सम्पादकमण्डलसदस्येभ्यो विद्वज्जनेभ्यः सहयोगिजनेभ्यश्च साधुवादान् प्रयच्छन्नहम् **ऋतम्भरा** सकलानां शेमुषीमतां प्रज्ञायाः प्रकाशिका, मनसो रञ्जिका गौरवस्य ख्यापिका च भवेदिति कामये-

(प्रा.जगत्प्रसाद उपाध्यायः)
कुलसचिवः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकीय

नेपाल संस्कृत विश्वविद्यालय अनुसन्धान केन्द्रबाट वि.सं. २०५३ सालदेखि प्रकाशित हुँदै आएको **ऋतम्भरा** अनुसन्धानमूलक त्रैभाषिक पत्रिका हो । प्राच्य गरिमा, ज्ञानविज्ञान र प्रविधिको अध्ययन अनुसन्धानका साथै परम्परागत संस्कृति, विद्या एवं सदाचारको पावनधारा निरन्तर प्रवाहित गराउने र विश्वविद्यालयको प्राज्ञिक गतिविधिलाई प्रवर्द्धन गर्ने उद्देश्यले यस पत्रिकाको प्रकाशन प्रारम्भ भएको कुरा यहाँ स्मरणीय छ । **ऋतम्भरा**को प्रस्तुत अङ्क पनि त्यसै आवश्यकतापूर्तिको एउटा विशिष्ट प्रयासकै उपलब्धि हो । नव वर्ष २०६९ को हार्दिक मङ्गलमय शुभकामनासहित पाठकसामु यो अङ्क प्रस्तुत गर्न पाउँदा नेसंवि अनुसन्धान केन्द्र अत्यन्त हर्षित छ।

निरन्तर गतिशील र प्रगति उन्मुख रहेको मानवसभ्यताका अग्रगतिका सूचकका रूपमा रहेका सामाजिक, आर्थिक, राजनीतिक र सांस्कृतिक परिवर्तनहरू मूलतः नयाँ नयाँ ज्ञान र प्रविधिमा आधारित हुन्छन् अनि ज्ञान र प्रविधि चाहिँ अनुसन्धानमा आधारित हुन्छन् । अनुसन्धानका माध्यमबाट आर्जित ज्ञानले सृजनाका अनेकौं सम्भावनाहरू प्रकट हुन्छन् ।

अनुसन्धान विश्वविद्यालयको ज्ञानको क्षेत्र विस्तार गर्ने गहकिलो आधार हो भने मुलुकको गरिमा बढाउने र विश्वसामु चिनाउने प्राज्ञिक अभियान पनि हो । विश्वविद्यालयको प्राज्ञिक-गौरव अनुसन्धानमार्फत् अभिव्यक्त हुन्छ । हामी ठान्दछौं, **ऋतम्भरा**ले यसै अभिव्यक्तिलाई साकार तुल्याइरहेको छ । वैदिक मन्त्रद्रष्टा ऋषिहरूले जुन ऋतम्भरा प्रज्ञाको उन्मेषद्वारा मानव जातिको कल्याणका लागि आजीवन प्रयत्न गरेका थिए, त्यसको एक सानो अंश मात्र पनि हाम्रो परिश्रमबाट प्रकाशित हुन सक्यो भने त्यो हाम्रो पुरुषार्थ ठहरिने छ ।

ऋतम्भराको यो पन्ध्रौं अङ्क देश र जनताले दिगो शान्ति एवं लोकतान्त्रिक संविधान पर्खिरहेको सङ्क्रमणशील राजनीतिक कालखण्डमा प्रकाशित भएको छ । अहिले राष्ट्रिय जीवनमा केही आशा र केही निराशाका बादलहरू लुकामारी खेलिरहेका छन्। यतिखेर देश निर्माणको साझा अभियानमा सबैको योगदान ऋतम्भराजस्तै सत्यमार्गी हुनु पर्दछ भन्ने हाम्रो मान्यता छ । सबै राष्ट्रवासीमा निराशा घटेर आशाको वृद्धि हुनु अहिलेको आवश्यकता हो। बौद्धिक समुदायको राष्ट्र एवं समाजप्रतिको चिन्ता, चासो र सरोकार कलमकै माध्यमबाट प्रकट हुन्छ, जसमा **ऋतम्भरा**जस्ता पत्रिकाहरूले साझा मञ्चको काम गर्दछन् । कलमजीवीहरूको राष्ट्र र समाजप्रतिको सिर्जनात्मक दायित्व एवं योगदान यसैमा अन्तरनिहित रहन्छ भन्ने हाम्रो मान्यता छ । नेसंवि अनुसन्धान केन्द्र उल्लिखित आवश्यकतापूर्तिका लागि विद्वत् समुदायलाई उत्प्रेरित गर्न चाहन्छ ।

यस अङ्कमा संस्कृत, नेपाली र अङ्ग्रेजी भाषामा लेखिएका विभिन्न विद्वान्‌हरूका जम्माजम्मी ५८ वटा वैविध्यपूर्ण अनुसन्धानात्मक रचनाहरूलाई स्थान दिएका छौं । यसमा समाविष्ट रचनाहरूमा देखापर्ने विषयगत विविधताका कारण यो अङ्क निकै ओजपूर्ण र बहुआयामिक अतएव विशाल पनि बन्न पुगेको छ । यस अङ्कको कुशल सम्पादनका लागि सम्पादक मण्डलका सबै सदस्यहरूलाई नेसंवि अनुसन्धान केन्द्र हार्दिक धन्यवाद ज्ञापन गर्दछ । त्यस्तै आफ्ना बहुमूल्य रचना प्रदान गरेर सहयोग गर्नुहुने सबै विद्वान् अनुसन्धाताहरूप्रति नेसंवि अनुसन्धान केन्द्र विशेष कृतज्ञता व्यक्त गर्दछ । पाठकका सुझाव र प्रतिक्रियाहरू हाम्रा लागि मार्गनिर्देशन ठहरिने छन् ।

लीलानाथ पौडेल

प्रा. डा. लीलानाथ पौडेल
कार्यकारी निर्देशक

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकीयम्

'ऋतम्' इत्येतदव्ययमपि पदं नानार्थवाचकम्। सत्यतया, औचित्येन, समुचितम्, स्थिरम्, पवित्रम्, निश्चितो दिव्यो नियमः, धार्मिको विधिरित्यादयोऽस्यान्येऽर्थाश्च निर्दिष्टाः। तथा च (ऋतम्) (ऋते) इत्येतद्द्वयमेवाव्ययपदमिति संस्कृतहिन्दीकोशः। 'ऋ+क्तः=ऋतम्' इति च पुनस्तत्रैव निर्दिष्टम्। ऋतम्=दीप्तम्, पूजितम् इति ऋतशब्दार्थप्रतिपादनपरा मेदिनी। पुनः 'ऋ गत्याम्, ऐश्वर्ये च' इति धातुः। ततःक्तप्रत्यये कृते निष्पन्नं रूपं-'ऋतः' इति शब्दकल्पद्रुमः। एवञ्च- ऋतं बिभर्तीति विग्रहे संज्ञायां गम्यमानायां खच्प्रत्यये, मुमागमे, स्त्रीत्वे, टापि च कृते— 'ऋतम्भरा' इत्येवंरूपा व्युत्पत्तिः शब्दकल्पद्रुमे स्फुटीकृता। प्रचलितसंस्कृतवैयाकरणानां पाणिन्यादीनाञ्च सहमतिरत्रैव वर्तते। इत्थं सर्वैरेतैर्विज्ञायते— 'ऋतम्' इति सत्यार्थवाचकं पदम्। पूर्वोक्तरीत्या निष्पन्नेन 'ऋतम्भरा' इत्यनेन पदेन ऋतम्=सत्यम्= यथार्थं निःशेषेण गूढं, तन्नितराम्=सर्वदैव भरतीति व्युत्पत्या निष्पन्नं 'ऋतम्भरा' पदमत्र प्रयुक्तमिति। "ऋतं निगूढं नितरां भरत्यसौ" इत्यर्थप्रतिपादनपरा ऋतम्भरा सर्वदैव तथाविधरचनां सम्पाद्य, प्रकाश्य च विज्ञानां पाठकानां समालोचकानाञ्च पुरो व्युत्पत्त्यनुरूपं स्वसामर्थ्यं प्रस्तौतु इति एकोनसप्तत्युत्तरद्विसहस्रविक्रमाब्द-स्याभिनववर्षस्य शुभारम्भे प्रकाश्यमानाया अस्याः ऋतम्भरायाः शुभेच्छुकेभ्यः सर्वेभ्यः सुहृद्भ्यः प्रथमं नववर्षस्यास्य हार्दिकं मङ्गलमयं शुभं कामयामहे वयम्।

जगत्यस्मिन् वैदिकयुगादारभ्याद्यपर्यन्तं संस्कृतवाङ्मयं विविधेषु क्षेत्रेषु स्वकीयं महत्त्वमाधत्त इति जानन्त्येव विचक्षणाः। एवंविधस्य वाङ्मयस्यास्य संवर्धनाय, समृद्धस्यास्य च माध्यमेन राष्ट्रोन्नत्यै नेपाले संस्थापितस्य नेपालसंस्कृतविश्वविद्यालयस्यानुसन्धानकेन्द्रं विश्वविद्यालयस्यास्यानुसन्धानात्मिकाया ऋतम्भरायाः पञ्चदशाङ्कं सुमनसां सहृदयानां सुहृदां पाठकानां करकमलेषु समर्पयति, परिस्थितिविशेषाद् विलम्बितमपि। तथा च परम्परागताऽनुसन्धानप्रधाना ऋतम्भरैषा तिसृषु संस्कृत-नेपाली-आङ्गलभाषासु इतःपूर्वं प्रकाशितेदानीमपि प्रकाश्यमाना चेति परम्परामेनां सम्प्रत्यपि बिभर्ति।

सर्वोऽपि विश्वविद्यालयः पठनपाठनादिना सञ्चलति चेत् सम्पादनप्रकाशनादिनाऽनुसन्धानैश्च बद्धमूलः, प्रसिद्धः, प्रामाणिकश्च भवति। तत्रापि संस्कृतविश्वविद्यालयस्य सन्दर्भे तु प्राणा एवानुसन्धानं कर्मेति अनुभूयते महुर्मुहुः। संस्कृतवाङ्मये स्थिताः सिद्धान्तसिद्धा विषया अनुसन्धानेन प्रमाणीभूताः सन्तो व्यवहारेण जना लाभान्विताः स्युरिति अद्यतनं संस्कृतविश्वविद्यालयस्य प्राथमिकं लक्ष्यमस्ति। एतदर्थमस्मा-दनुसन्धानकेन्द्राद् विक्रमाब्दस्य त्रिपञ्चाशदुत्तरद्विसहस्रादारभ्याद्यपर्यन्तमितः पश्चाच्च क्रमशः प्रकाशिता, प्रकाश्यमाना, प्रकाशयिष्यमाणा च ऋतम्भरा स्वोद्देश्यानुरूपं कार्यं चर्कर्ति, तदनुरूपानुसन्धाना-त्मकैर्महत्त्वपूर्णैर्लेखैः स्वकलेवरं बर्भर्ति च।

कस्यापि विश्वविद्यालयस्य प्रसिद्ध्यै, प्रतिष्ठायै, प्रामाणिकतायै च तेन चत्वारि कार्याणि अवश्यमेव कर्तव्यानि भवन्ति। तानि हि— स्तरीयस्य पाठ्यक्रमस्य तत्र सञ्चालनम्, स्तरीयाणां प्रश्नपत्राणां व्यवहारः, स्तरीयाणां विषयाणां स्तरीयमनुसन्धानम्, तन्मूलकग्रन्थानां प्रकाशनञ्च। एतेषां स्तरीयत्वे तत्रत्यानां प्राध्यापकानां, छात्राणां, तद्विश्वविद्यालयस्य च स्तरीयत्वे प्रामाणिकत्वे च अन्यस्य परीक्षणस्य न भवत्यावश्यकता। ऋतम्भरयां प्रकाशितानामनुसन्धानात्मकानां लेखनिबन्धानां माध्यमेन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपालसंस्कृतविश्वविद्यालयस्यानुसन्धानरूपकार्यस्य प्रातिनिध्यं स्यादिति अस्माकं कामना अस्ति। इयं कामना पूर्णा, अपूर्णा, अंशतः पूर्णा वेत्यत्र पाठक-सन्दोहः प्रमाणम्। अत्र प्रकाशिता अनुसन्धानमूलिका विविधा रचना बहुज्ञानां विदुषामिति तेषां यथार्थत्वे त एव प्रमाणम्। अस्माकं दृष्टिपातो विशेषतः साजसज्जायां भाषायाञ्चेति च विनिवेदयामः।

एतदतिरिक्तं विश्वविद्यालयस्यानुसन्धानकेन्द्रमिदं स्वकीयमुखपत्ररूपेण प्रतिवर्षम् अनुसन्धानप्रकाशिकाख्यां पत्रिकां प्रकाश्य प्रचलितवैज्ञानिकपद्धत्यनुसारेण निर्धारितविषये सोपाधिको विद्यावारिधिः (Ph.D.) निरुपाधिकं लघ्वनुसन्धानं, महत्त्वपूर्णग्रन्थसम्पादनम्, महत्त्वपूर्णस्य ग्रन्थस्य भाषान्तरेऽनुवादकार्यञ्च कृत्वा विश्वविद्यालयस्य सर्वतोभावेन गौरवं वर्धयितुं प्रयतत इति क्रमेऽस्मिन् ससंक्षेपं व्यनक्ति स्वकीयं कर्मजातम्।

एवंविधमनुसन्धानादिकं कार्यं पौरस्त्यपद्धत्या च परापूर्वकालादव्याहतं प्रचलितमासीदिति तत्र स्थितानां पद्धतीनाञ्च पुनरवलोकनं विधातुमत्यावश्यकम्। सर्वं पुराणं न साधु। सर्वमपि नवं नानवद्यमित्येवं तथ्यं निःशङ्कोचं स्वीकार्यम्। अतः पौरस्त्यं स्याद्वा पाश्चात्त्यं द्वयोः पद्धत्योः सारपूर्णा पद्धतिरनुसन्धानस्य अवश्यं ग्राह्येति समये समये तत्सम्बद्धं कार्यपत्रमेव प्रस्तूय शोधार्थिनो लाभान्विता जाताश्चेति अनुसन्धानात्मिकाया एवंविधाया ऋतम्भरायाः प्रस्तुत्यान्येनानुसन्धानादिकर्मणा च सम्बद्धानां जनानां यदि स्वल्पोऽपि लाभः स्यात्तदाऽनुसन्धानकेन्द्रमेतत् सफलं स्यात्।

एवं निर्दिष्टस्य क्षेत्रमनुसन्धानस्य, न केवलं विज्ञानस्य, प्रविधेर्वा, अपि तु कलासाहित्येतिहाससंस्कृतिधर्मदर्शनादिविषयाणामपीति विचार्य स्वमौलिकतां प्रति दृढीभूय आवश्यकतानुसारेण परिष्कारस्य च पक्षे समयसापेक्षतामङ्गीकृत्यैवंविधमनुसन्धानात्मकं कर्म ऋतम्भरया भर्तुं दृढप्रयत्नाः स्म इति पाठकानां समक्ष्यं विनिवेदयामः।

इत्थमनुसन्धानात्मिकाया ऋतम्भरायाः सम्पादनप्रकाशनादिक्रमे पूर्वोक्तानां तिसृणां भाषाणां प्रयोग इतः पूर्वानुरूपः। दायित्वञ्च सर्वंमनुसन्धानकेन्द्रस्येति प्रकाशनादिकं सम्बद्धं कर्म केन्द्रमेवैतन्निर्वहति। समेषामेव तेषां सदस्यानां दायित्वं श्रेयसामपश्रेयसाञ्चात्र निरतानाम्।

पर्यन्ते प्रकृताया अस्या ऋतम्भरायाः पञ्चदशाङ्कस्य प्रकाशने तत्कृते शुभकामनाप्रदानेन च प्रोत्साहितवद्भ्य उपकुलपतिमहोदयेभ्यः प्रा. शिवहरिमरहट्टावर्येभ्यः, सम्पादकमण्डलस्य सङ्घट्टनेन तन्मण्डलस्य प्रथमोपवेशे स्वयमुपस्थाय अस्मान् प्रोत्साहितवद्भ्यः शिक्षाध्यक्षमहाभागेभ्यः प्रा. नारायणकुमाराचार्येभ्यः, अर्थव्यवस्थापनेन सहयोगं कुर्वद्भ्यः कुलसचिवेभ्यः प्रा. जगत्प्रसादोपाध्यायेभ्यश्च सर्वप्रथमं कृतज्ञतां विनिवेदयामः। तदनु येषामत्रामूल्यानि रचनारत्नानि राजन्ते तेषामेवंविधः सहयोगोऽतीव प्रशस्य इति तेभ्यः कृतज्ञतां व्याहरामः। ये च प्रकाशनसहयोगिनः उपप्रशासकः श्रीहरिप्रसादपाण्डेयः, उपप्रशासकः श्रीनारदप्रसादःपौडेल, सहायकप्रशासकः श्रीनगेन्द्रराजरेग्मी इति सर्वान् कर्मण्यस्मिन् सहयोगसमर्पकान् कृतज्ञतावचनैः शततं संस्मरामः। तथैव पुनष्टङ्कनमुद्रणादिकार्ये सहयोगिभ्यो राजेशतण्डुकारादि महोदयेभ्यः साधुवादं निवेदयामः। सर्वेषामेवैतेषामुदारचरितानामतोऽपि नैरन्तर्येणैवंविधः सहयोगः प्राप्स्यते एवेति सापेक्षं मुहुर्मुहुः संस्मरन्तो वयं प्रशस्यानां लेखकानां लेखन्यश्च ऋतम्भरायाः कृते सदैव सुलभाः स्युरिति विनिवेद्य सम्पादनप्रकाशनादिक्रमे जाताया न्यूनतायाः परिपूर्तिं विंदुषां विनिर्देशेन जायत एवेति विश्वसन् विरमति सम्पादकसन्दोहः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषयसूची (CONTENTS)

संस्कृतखण्डः

१. परिभाषाणामनुशीलनं तत्रस्थपारिभाषिकपदानां विवरणञ्च
प्रा. डा. विष्णुप्रसादशर्मा देवकोटा १

२. 'हलन्त्यम्' इत्यस्य सूत्रस्य सशब्दरत्नं प्रौढमनोरमोक्तदिशा विश्लेषणम्
प्रा. डा. लीलानाथः पौडेल ११

३. आचार्यकमलशीलविरचितवज्रच्छेदिकाप्रज्ञापारमिताटीकाया विषयपरिशीलनम्
डा. काशीनाथः न्यौपाने १६

४. यमवर्णानां स्वरूपं सङ्ख्या लेखनप्रकारश्च
डा. आमोदवर्धनः कौण्डिन्न्यायनः १९

५. अभेदान्वयबोधे वैयाकरणनैयायिकव्युत्पत्तिपरिशीलनम्
भीमप्रसादः कँडेल २६

६. रूपकभेदानुशीलनम्
डा. भीमप्रसादः खतिवडा ३६

७. प्रमाणविषये न्यायमीमांसकयोर्मतम्
अच्युतप्रसादः लामिछाने ४४

८. जैमिनीयधर्ममीमांसाशास्त्रे स्मार्तकर्मविचारः
प्रमोदवर्धनः कौण्डिन्न्यायनः ५४

९. सबाधबीजबाध्यबाधकभावविचारः
मोहनप्रसादः पोखेल ६४

१०. सर्वानन्दकरणे विपरिणामाधिकारस्योपपत्तिः
जयन्त आचार्यः ६८

११. वैयाकरणमते शक्त्यादिवृत्तिविवेचनम्
नारायणप्रसादः पौडेल ७८

१२. अर्थवत्त्वविमर्शः
जगन्नाथशर्मा ८५

१३. घटकर्परकाव्यस्य साहित्यिकं वैशिष्ट्यम्
नन्दनः भट्टराई ९०

१४. श्रीमद्भागवतीयदशमस्कन्धस्य विंशतितमेऽध्यायेऽलङ्कारसौन्दर्यम्
जगन्नाथरेग्मी ९९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१५. पदार्थविवेचनदृष्ट्या न्यायविद्याया उपयोगिता — १०९
रमा भट्टराई

१६. महाकालसंहिताप्रतिपादितं योगतत्त्वविवेचनम् — ११६
माधवप्रसादः लामिछाने

१७. आचार्यवसुबन्धुस्तदीयाभिधर्मकोशपरिचयश्च — १२५
राजनारायणः ठाकुर

नेपाली खण्ड

१. नेपाली कथाको आधुनिक कालः गति, स्वरूप र प्रवृत्ति — १२९
प्रा. नारायणकुमार आचार्य

२. प्राचीनकालमा नेपालमा चलेको सङ्ख्यालेखनपद्धति — १३८
प्रा. दिनेशराज पन्त

३. अपेक्षाका आधारमा नेपाली भाषाका क्रिया — १४८
प्रा. लक्ष्मीप्रसाद पराजुली

४. गृहस्थाश्रम रं गृहस्थ ब्राह्मणका कर्तव्यहरू — १५४
प्रेमकुमार आचार्य

५. वास्तु विवेचना — १६४
नारायणराज दाहाल

६. मुकुन्द–इन्दिरा नाटकमा पौरस्त्य संस्कृतिको प्रभाव — १७१
नवराज कट्टेल

७. वाल्मीकिरामायणको वर्षावर्णनमा प्रतिविम्बित विषयगत र काव्यात्मक वैशिष्ट्य — १८१
ध्रुवप्रसाद भट्टराई

८. प्राच्य सभ्यतामा धर्म र धर्मशास्त्र — १८९
काशीराज पोखेल

९. काव्यशास्त्रीय रस र आयुर्वेदीय रसको तुलनात्मक अध्ययन — १९८
गणेश पाण्डेय

१०. वेदाङ्ग र उपाङ्गशास्त्रहरूको मुख्य प्रयोजन — २०८
डा. ऋषिराम रेग्मी

११. ग्रहगतिको कारण र भ्रमणपथसम्बन्धी सिद्धान्तको विवेचना — २१८
धनेश्वर नेपाल

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१२. आधुनिक शैलीविज्ञानको विकासमा संस्कृत काव्यशास्त्रको प्रभाव
बाबुराम आचार्य २२४

१३. महाकवि श्रीहर्ष र लेखनाथ पौड्यालः एक सन्दर्भ
गणेशप्रसाद घिमिरे २३४

१४. 'अप्रिय' उपन्यासः भ्रान्ति विचरण र उत्तरआधुनिकता
डा. नारायण चालिसे २३८

१५. नाटककार विजय मल्ल र उनको 'बहुलाकाजीको सपना' नाटकको अध्ययन
भागवत ढकाल २४८

१६. गरिबीः कारण, परिणाम र निवारण
रोहिणी भट्टराई २५७

१७. ब्याँसी गा. वि.स. मा गाइने बभाङ्गी ड्यौडा गीतका प्रमुख लयहरूको अध्ययन
लक्ष्मीराज पण्डित २६२

१८. जनसंख्या र विकास
शम्भुराज गौतम २७०

१९. पौराणिक दृष्टिमा पशुपतिनाथ र वाग्मती
नवराज घिमिरे २७५

२०. वर्तमान विश्वमा लोकतन्त्र
जनकराज भट्ट २८४

२१. 'मानव' महाकाव्यमा दलितवर्गका समस्या
सुधन पौडेल २९४

२२. पुराणको ऐतिहासिकता र व्यास परम्पराको परिचर्चा
मधुसूदन भट्टराई ३०५

२३. आत्मवादी र देहवादी चिन्तन–परम्परामा अलङ्कारसिद्धान्त
टीकाराम गौतम ३१२

२४. पौरस्त्य न्यायपद्धतिको विश्लेषण
केशवशरण अर्याल ३२०

२५. बुद्धद्वारा साक्षात्कृत प्रज्ञानको समीक्षा
लेशमणि दाहाल ३३०

२६. ब्रह्मवादीहरूको समुच्चय प्रस्थान
चेतमणि न्यौपाने ३४०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२७. खोटाङे पुराना स्रष्टा र तिनका रचनाहरू
नगेन्द्रराज रेग्मी ३४५
२८. शाङ्करवेदान्तदर्शनमा अध्यासको स्वरूपविमर्श
विपीराज न्यौपाने ३५५

ENGLISH SECTION

1. Simultaneous Equations and Their Estimations
Achyut Aryal 359
2. Development of Agriculture in Nepal Since Democratic Era (1990): Problems and Prospects
Birendra Kumar Lal 367
3. Reflection of Myth, Obsessive Desire and Quest for Sexual Freedom in Dharabasi's *Tundal*
Krishna Prasad Paudyal 370
4. Contrastive Analysis and Translation Studies
Surendra Prasad Bhatta 377
5. "Waiting for Godot" as a Comic Play
Yog Raj Paudel 381
6. Ecocriticism: A Study of Art, Society and Nature
Mohan Raj Gauli 386
7. Dimensions of Foreign Aid in Nepal
Namita Pokhrel 391
8. Dual or Non-singular Number System in Limbu Language
Bhawani Shankar Adhikari 395
9. Tragedy, Aristotle and Shakespearean Tragedies
Churamoni Kandel 400
10. Femininity as Subversion of Male Power: A Feminist Reading of Jane Austen's Pride and Prejudice
Kala Gyawali 406
11. Gender Discrimination in Hindu Conception *(Garbhadana) Samskaras*
Bimala Sharma 412
12. Blake's *Songs of Innocence and of Experience*: An Assimilation of Physical World into Universal Consciousness
Keshav Raj Chalise 414
13. Christianization in Nepal: A Glimpse of Past, Present and Future
Rishiram Adhikari (Subash) 418

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतखण्डः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परिभाषाणामनुशीलनं तत्रस्थपारिभाषिकपदानां विवरणञ्च

प्रा. डा. विष्णुप्रसादशर्मा देवकोटा

चत्वारो वेदा अङ्गिनो व्याकरणादीनि च षड् तदङ्गानि उच्यन्ते। तत्रापि पाणिनीयमेव व्याकरणं वेदाङ्गम्, न तु कौमारादिकम्, तेषां लौकिकशब्दमात्रसाधकत्वात्। 'प्रकृतिप्रत्ययविभागान्वाख्यान–रूपसंस्कारस्य साक्षाद् विधायकत्वाद् व्याकरणस्य वेदानामासन्नता अङ्गता च। निरुक्तस्य वेदार्थज्ञानायापेक्षणीयत्वादङ्गता गायत्र्यादिच्छन्दोविवेकाय छन्दसोऽपेक्षणीयतया, वर्णाभिव्यक्तिजनकवायु-संयोगाधिकरणत्वेन कण्ठताल्वादिज्ञानाय शिक्षाया अत्यावश्यकतया, वेदप्रतिपाद्यकर्मप्रयोगानुगमनाय कल्पस्यावश्यकत्वेन कर्मानुष्ठानाधिकरणीभूततिथ्यादिज्ञानाय समयशुद्धेर्विवेकाय वा ज्योतिषस्यावश्यक-तया तेषां वेदाङ्गत्वम्। अन्येषामङ्गानामपेक्षया च व्याकरणस्याङ्गस्य वेदानामासन्नतां वक्ति भर्त्तृहरिः-

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥[1] इति॥

पाणिनीयं व्याकरणं सर्वाङ्गपूर्णं, वैज्ञानिकं शाश्वतञ्च मन्यते। अस्य च व्याकरणस्य मूलं पाणिनीया अष्टाध्यायी। अस्या लक्ष्यलक्षणसमुदितरूपं व्याख्यानमेव व्याकरणपदार्थः। इमामष्टाध्यायीमिदं वा व्याकरणं पूर्णं विधातुं वररुचिना (कात्यायनेन) वार्त्तिकानि रचितानि। भाष्यकारेण खलु पतञ्जलिना महाभाष्यमिष्ट्यादिकञ्च भाषितमभीष्टञ्च। एतत्सहितै र्विद्वद्भिश्च तास्ताः परिभाषाः परिभाषिताः। एतेषां समेषां संयोजनेनैव पाणिनीयं व्याकरणं तत्रापि प्रक्रियाक्षेत्रं पूर्णं संवृत्तमिति मन्यते। भाष्य-वार्त्तिक-परिभाषासु एकस्याप्यभावे व्याकरणमपूर्णं भवतीति तेषां पाणिनीयव्याकरणसम्पूरकत्वमेव।

वार्त्तिकपदं वृत्तिपदान्निष्पन्नं भवति। वृत्तिपदस्य चानेकेऽर्था भवन्ति। व्याकरणस्यार्थग्रन्थेषु शक्त्याद्यन्यतमत्वं वृत्तिर्भवति। महाभाष्ये प्रथमाह्निके शास्त्रप्रवृत्तिरस्य पदस्यार्थो भवति। काव्यमीमांसाया द्वितीयेऽध्याये राजशेखरः सूत्राणां सकलसारविवरणं वृत्तिं कथयति। काशिकायाः पदमञ्जरीकारस्तस्याः प्रथमे भागे सूत्रार्थप्रधानं ग्रन्थं वृत्तिं कथयति। तत्त्वबोधिनीकारः 'प्रज्ञाश्रद्धार्चाभ्योणः (पा.सू. ५/२/१०१) इत्यत्र विच्छिन्नस्य प्रतिविधानं वृत्तिं कथयति।' वृत्तिसर्गतायनेषु क्रमः (पा.सू. १/३/३८) इत्यत्र च वृत्तिरप्रतिबन्धो भवति। प्रकृते च वृत्तिपदार्थः सूत्राणां सकलसारविवरणं व्याख्यानं वा मन्तव्यः। वृत्तौ साधु, वृत्तिमधीते वेत्ति वा वृत्तिरूपेण कृतो वा ग्रन्थो वार्त्तिकं भवति। 'तत्र साधुः' (४/४/९८), 'तदधीते

1 भर्त्तृहरिः वा.प. ब्रह्मकाण्डे एकादशः श्लोक, चौखम्बा संस्कृत सिरिज, आफिस वाराणसी, सं. द्वितीर्यम्, वि.सं. २०१८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तद्वेद' (४/२/५९), 'ऋतूक्थादिसूत्रान्ताट्ठक्' (४/२/६०), 'कथादिभ्यष्ठक्' (४/४/१०२) इत्येतेषु कस्यापि प्रवृत्त्या तस्य साधुत्वं भवति।

पराशरोपपुराणीयत्वेन इदं वार्त्तिकलक्षणं स्वीकृतं वर्त्तते विद्वद्भिः-

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्त्तते।
तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा विचक्षणाः॥ इति॥

एतदनुसारेण प्रकृते पाणिनिकर्त्तृकाणामुक्तानुक्तदुरुक्तानां चिन्तनं निरूपण वा वार्त्तिकं भवति। उक्तानुक्तदुरुक्तानां समीक्षणेन च पाणिनीयस्य व्याकरणस्य तत्रापि प्रक्रियापक्षस्य च पूर्णता भवति, दृश्यते च सा तत्र एतदाधारेण लिखितत्वादेव वाल्मीकिरामायणमहाभारतग्रन्थयोर्भाषा इदानीमपि सुरक्षिता, अपरिवर्त्तनीया, सुबोधा च वर्त्तते। भगवता पतञ्जलिना च अष्टाध्याय्यां महाभाष्यनामकं व्याख्यानं लिखितं वर्त्तते। इदञ्च न सूत्रेष्वेव लिखितं किन्तु वार्त्तिकेष्वपि। भाष्ये पतञ्जले र्वार्त्तिकान्यपि सन्ति। तेषां विवेकस्तु ऋतम्भरायाः 'संस्कृतं, तद्व्याकरणं, कात्यायनवार्त्तिकानि च' इति शीर्षक-लेखतो मदीयाद् विधेयः[२]। सर्वन्यायबीजहेतुत्वात्[३], इष्ट्यादियुक्तत्वात्, अन्यानधीनत्वाच्च[४] पातञ्जलमहाभाष्यस्य महत्त्वम्। अन्यानि शाङ्कर-रामानुजीयादिभाष्याणि भाष्याण्येव, पातञ्जलन्तु महाभाष्यमिति कथ्यतेऽस्मादेव कारणात् इति विद्वांसो वदन्ति। भाष्यलक्षणञ्च-

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति॥

एवं स्वकथनस्य व्याख्यानमपि अस्मिन् पातञ्जले महाभाष्ये महत्त्वं बोध्यम्।

पाणिनीयाया अष्टाध्याय्या व्याख्यानद्वयं दृश्यते-सूत्रक्रमानुसारि व्याख्यानं प्रक्रियानुसारि व्याख्यानञ्च। सूत्रक्रमानुसारिव्याख्यायाः प्रातिनिध्यं करोति महाभाष्यम्, काशिका, शब्दकौस्तुभश्च। अत्र सूत्राणां क्रमजन्यैरनुवृत्त्यादिभिः सूत्राणामर्थापनं बोधश्च सुकरं भवति। प्रक्रियाक्रमस्य पक्षपातिनो ग्रन्थाश्च धर्मकीर्त्ते रूपावतारः, विमलसरस्वतीमहाभागस्य रूपमाला, रामचन्द्राचार्यस्य प्रक्रियाकौमुदी, भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी च। वरदराजस्य मध्यसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी चात्रैव क्रमेऽन्तर्भवतः। अत्र च व्याख्यानक्रमे प्रक्रियायाः सारल्येऽपि सूत्रार्थापनस्य तद्बोधस्य च काठिन्यमित्युभयो र्दूषणभूषणे विभावनीये। दूषणस्योभयोः पक्षयोः सत्त्वेऽपि अष्टाध्याय्या व्याख्यानेन पाणिनीयव्याकरणस्य पूर्णता तु कृता एवोभाभ्यामिति तु वोद्धव्यमेव। इदानीन्तु आवश्यकता वर्त्तते समावेशात्मिकायास्तस्या व्याख्यायाः।

वार्त्तिकै र्महाभाष्येण च पाणिनीयसूत्राणां व्याख्यानेन लक्ष्याणां साधनप्रयासेऽपि पदप्रक्रियायाः सूत्रार्थापनादौ च न्यूनता अवशिष्टा एवेति परिभाषाणामुपयोगः संग्रहो व्याख्यानञ्च कृतं विद्वद्भिः। धातुपाठस्य सङ्कलनवेलायामेवासां परिभाषाणामपि सङ्कलनं कृतं भवेद् विद्वद्भिरित्यनुमीयते[५]। नागेशकृते परिभाषेन्दुशेखरे व्याख्यातानां परिभाषाणां मूलञ्च व्याडिकृतः परिभाषापाठः सीरदेवविरचिता

२ वर्षम्- ११, पूर्णाङ्कः १४।

३ भर्तृहरिः, वाक्य, काण्डः २, ४८५ श्लोकः, तत्रत्यपुण्यराजस्य व्याख्यानञ्च।

४ स्व. रुद्रप्रसादोऽवस्थी, सम्मानितः प्राध्यापकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसेयस्य।

५ परिभाषेन्दुशेखरभूमिकायां विश्वनाथमिश्रकृतायां सुबोधिनीव्याख्योपेतायां, चौखम्बा-सुरभारतीप्रकाशितायां द्वितीयसंस्करणे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परिभाषावृत्तिश्च । पूर्वै वैयाकरणैः परिभाषाणां विभिन्नाः पाठाः स्वीकृताः । तत्र प्रथमे पाठे ९३ परिभाषा मन्यन्ते । अस्मिन् पाठे प्रथमा परिभाषा अस्ति 'अर्थवद्ग्रहणे नानर्थकस्य इत्यन्तिमा च 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति । द्वितीयस्मिन् पाठे १४० परिभाषाः सन्ति । अत्रापि प्रथमा परिभाषा प्रथमपाठस्थिता एव । अन्तिमा तु 'ज्ञापकसिद्धं न सर्वत्र इति । तृतीयस्मिन् पाठे १२० परिभाषाः सन्ति । अत्र पाठे आदिमा परिभाषा व्याख्यानतो विशेषप्रतिपत्तिरिति । विद्वद्भिः स्वीकृते चतुर्थे पाठे १३३ परिभाषा मन्यन्ते । अत्र १०२ परिभाषा ज्ञापकसिद्धाः सन्ति, एकत्रिंशत्परिभाषाश्च न्यायसिद्धाः । अत्राष्टाध्यायीक्रमेण ज्ञापितानां क्रमो वर्त्तते । पञ्चमपाठ एव नागेशेन परिभाषेन्दुशेखरलेखने स्वीकृत उपयोगे आनीतश्च । अत्र १३३ परिभाषा व्याख्याताः सन्ति । अत्र पाठे परिभाषाणां संग्रहः कौमुदीस्थितसूत्रपाठवल्लक्ष्यसिद्धिक्रमेण स्वीकृतो[६] वर्त्तते । नागेशकृते परिभाषेन्दुशेखरे प्रथमा परिभाषा अस्ति 'व्याख्यानतो विशेषप्रतिपत्तिरिति, अन्तिमा च 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति । अत्र परिभाषाणां संग्रहः पदप्रक्रियाया आवश्यकतानुसारेण कृतो वर्त्तते । सूत्राणां तात्पर्यनिर्णायकप्रमाणनिरूपणात् सर्वसूत्रोपकारकत्वेन वर्णसमाम्नायस्थमाहेश्वरसूत्रप्रणीतणकारानु–बन्धज्ञापितत्वेन चाभ्यर्हितत्वात्[७] 'व्याख्यानतः' इति परिभाषाया उपन्यासः प्रथमं कृतो नागेशेन । ततः संज्ञापरिभाषयोरावश्यकत्वेन 'यथोद्देशं संज्ञापरिभाषम्' 'कार्यकालं संज्ञापरिभाषम्' इत्यनयोरुपन्यासः कृतः । सुवन्तस्य तिङन्तस्य च पदस्य प्रकृतिप्रत्यययोः सन्निवेशेन सिद्धिर्भवति । तत्र पूर्वं प्रकृतौ प्रत्यये चानुबन्धानामित्संज्ञायां लोपस्यावश्यकत्वेन तेषामवयवत्वमनवयवत्वं वेति निर्णयाय 'अनेकान्ता अनुबन्धाः' इत्यादिपरिभाषाः व्याख्याताः । एवम् 'उभयगतिरिह भवति' इत्यादीनामपि क्रमिकत्वं परिभाषेन्दुशेखरे स्थितानां बोध्यम् ।

'इको गुणवृद्धी' इति सूत्रे काशिकाकारो लिखति- 'परिभाषेयं स्थानिनियमार्था । अनियमप्रसङ्गे नियमो विधीयते' इति । अस्मादेव मूलात् प्रक्रियालापनप्रसङ्गे परिभाषाया लक्षणवेलायाञ्च 'अनियमे नियमकारिणी परिभाषा' इत्युच्यते । नागेशः, स्वामी दयानन्दसरस्वती च परिभाषाया इदं लक्षणं लिखतः-

एकदेशस्थिता शास्त्रभवने याति दीपताम् ।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते[८] ॥ इति ॥

भाष्यकारस्तु लिखति[९]- "अधिकारो नाम त्रिप्रकारः । कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा-प्रदीपः सुप्रज्वलितः सर्वं वेश्म अभिज्वलयति" इति । अत्र कश्चिदित्यस्य परिभाषारूप इत्यर्थं कृतवान् कैयटः । 'अनियमे नियमकारिणी परिभाषा' 'इत्यत्र अनियमत्वञ्च सूत्राणां न्यूनातिरिक्तवृत्तित्वम् । नियमकारिणीत्वं नियामकत्वं सङ्कोचकत्वं वा । एवञ्च न्यूनातिरिक्तवृत्तिसङ्कोचकत्वं परिभाषात्वमिति

६ युधिष्ठिरमीमांसकः, 'संस्कृतव्याकरण शास्त्रका इतिहास' छव्वीसवाँ अध्याय, परिभाषापाठ के प्रवक्ता और व्याख्याता, २ भाग, पृ. २८५ द्वितीयं सं. २०३० वि.सं. ।

७ 'व्याख्यानत०' इति प्रथमपरिभाषायाः भूतितिलके श्रीरामकृष्णः ।

८ नागेशः व्या.म.मा. २।१।१ इत्यत्रोद्योते ।

९ षष्ठी स्थानेयोगा, इति सूत्रे भाष्ये ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

फलति । वस्तुतस्तु 'साक्षाल्लक्ष्यधर्मिकसाधुत्वप्रकारकविधिशास्त्रजन्यशाब्दबोधीयन्यूनाधिक-वृत्तिसङ्कोचकत्वम्' इति परिभाषालक्षणं स्वीकुर्वन्ति वैयाकरणाः । नियमनिषेधापवादानां विषयसङ्कोचकत्वेन शाब्दबोधीयसङ्कोचाभावाद् व्युदासः । संज्ञावारणाय विधिशास्त्रेति । परम्परया तस्या एव वारणाय साक्षादिति[१०] ।

अस्मद्गुरवस्तु परिभाषा द्विविधा–सामान्यपरिभाषा व्याख्येयपरिभाषा च । तत्र सामान्यपरिभाषात्वं विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगि-साधुत्वप्रकारकशक्त्यविषयकबोधजनकत्वे सति अधिकारशास्त्र-भिन्नत्वमितिप्राहुः । व्याख्येयपरिभाषात्वञ्च सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्र-जन्याप्रमाण्यज्ञानाना- स्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरितभिन्नत्वम् । 'षष्ठी स्थानेयोगा' इत्यादीनां पाणिन्युच्चरितत्वेऽपि' निर्दिश्यमानस्यादेशा भवन्ति' इत्यानुपूर्वीमद्वाक्यस्य पाणिन्यनुच्चरितत्वान्न दोषः । कासाञ्चिदनेर्वविधत्वेऽपि पाणिनिप्रयत्नानुमितत्वसादृश्यादारोपितं परिभाषात्वमनुसन्धेयम्[११] ।

संज्ञा-परिभाषाधिकारसूत्रेषु अयं विवेको बोद्धव्यः- संज्ञासूत्रं सर्वेषु स्वप्रदेशेषु उपतिष्ठते, परिभाषा च अनियमे नियककारिणी सती स्वप्रदेशे वर्त्तमानापि सर्वान् प्रदेशान् अभिप्रकाशयति, अधिकारसूत्रन्तु स्वसीमान्तमनुवर्त्ततेऽधिकरोति वा[१२] इति ।

अत्र च परिभाषेन्दुशेखरे त्रीणि प्रकरणानि सन्ति । तानि च शास्त्रत्वसम्पादनोद्देशनामकं प्रथमं प्रकरणम्, बाधवीजनामकं द्वितीयं प्रकरणम्, शास्त्रशेषनामकं तृतीयं प्रकरणञ्च । प्रथमप्रकरणे 'व्याख्यानतः: इत्यारभ्य 'एकदेशविकृतमनन्यवत्' इत्यन्ताः सप्तत्रिंशत्परिभाषा व्याख्याताः सन्ति । अत्र शास्त्रं नाम सूत्रम् । अत्रत्याः परिभाषाः पाणिनीयानि सूत्राणि साधुत्वसम्पादनयोग्यानि सम्पादयन्ति । तेन अवदातं मुखम्, अध्येता, शयिता, प्रणिदापयति इत्यादीनि रूपाणि सिद्धानि भवन्ति । अन्यथा तत्तत्सूत्राणां निर्दुष्टार्थवत्त्वाभावेन तानि तानि पदरूपाणि सिद्धानि न स्युः । एतत्प्रकरणस्थपरिभाषाभिः सूत्राणां शास्त्रत्वसम्पत्तौ च सूत्राणां बाध्यबाधकभावस्योचिततया पूर्वपरनित्यान्तरङ्गापवादानामित्यारभ्य 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इत्यन्तानां चतुस्त्रिंशत्परिभाषाणां प्रकरणं बाधवीजनामकं प्रकृतं ग्रन्थकृता । अत्र प्रकरणे स्थिताभिः परिभाषाभिर्बाधबीजमुपस्थाप्यते, येन सूत्राणां बाध्यबाधकभावः शास्त्रीयो नियमितश्च भवति । अत्र ग्रन्थे तृतीय प्रकरणमस्ति शास्त्रशेषनामकम् । अत्र प्रंकरणे द्विषष्टिपरिभाषाः व्याख्याताः सन्ति । अत्रत्यपरिभाषासु शास्त्राणां (सूत्राणां) शेषं कार्यजातं वर्ण्यते । सूत्रै र्यानि कार्याणि कर्त्तुं वारयितुं वा न शक्यन्ते, तानि एतत्प्रकरणस्थपरिभाषामाध्यमेन क्रियन्ते । यथा-'अयस्कुम्भी' इत्यत्र सत्वम् 'अतः कृकमीत्यादिना स्वतः कर्त्तुं न शक्यते, कुम्भशब्दाभावात्, प्रत्ययान्तत्वात् कृदन्तत्वाभावाच्च । 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्यनया तु तत्त्वे साहाप्यमुपस्थाप्यते इति तत्तत्कार्यं भवति । तया परिभाषया कुम्भग्रहणेन कुम्भी इत्यस्यापि ग्रहणं भवति । स्वादिविधायकसूत्रे च प्रातिपदिकशब्देन लिङ्गविशिष्टानां 'रमा' इत्यादीनामपि ग्रहणं भवतीति स्वादिविधानस्यान्यस्य तत्तत्कार्यस्य च सिद्धिर्भवति । एवमेव 'क्व दिवा भृशा भवन्ति' इत्यत्र 'भृशादिभ्यः० इति सूत्रेण क्यङ्

१० पण्डितो लक्ष्मणशर्मा, परिभाषेन्दुशेखरे, तत्त्वप्रकाशिकायां प्रथमपरिभाषायां, चौखम्वा-संस्कृत-संस्थानम्, वि.सं. २०३५ ।
११ श्रीरामकृष्णः, परिभाषेन्दुशेखरे प्रथमपरिभाषायां भूतितिलके ।
१२ स्व. सोमनाथसिग्द्यालः प्रतिसंस्कृतसिद्धान्तकौमुद्यां परिभाषाप्रकरणे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राप्यते, अत्रैव प्रकरणे स्थितया 'नञिवयुक्तमिति परिभाषया तु नियम्यते इति तत्र न क्यङः प्राप्ति र्भवति। एवमन्यत्रापि बोध्यम्। एवमत्र स्थिताभिः परिभाषाभिः सूत्रैः स्वतः कर्त्तुमशक्यानि कार्याणि क्रियन्ते इति शास्त्रं=पाणिनीयं (व्याकरणं) सूत्र पूर्णं भवति, तत्प्रयुक्तं साधुत्वञ्च परिनिष्ठितं प्रामाणिकञ्चेति बोध्यम्।

अत्र च परिभाषेन्दुशेखरे तास्ताः परिभाषा अवतारयितुमवतरणं पूर्वं दीयते। तत्त्वञ्च तत्साध्यदोषाभावकत्वम्, वक्तव्यार्थविषयकजिज्ञासोत्थापकत्वं वा। तया साध्यस्तत्साध्यः, दोषाणामभावो दोषाभावः, तत्साध्यो, दोषाभावो यत्रेति तत्साध्यदोषाभावकः, तस्य भावस्तत्त्वम्। 'व्याख्यानतो विशेषप्रतिपत्तिरिति परिभाषायाः' लण्इउण्सूत्रयोर्णकारद्वयस्यैवोपादानेनाणिण्ग्रहणेषु सन्देहस्य निर्णायकतया तदवतरणे तत्साध्यदोषाभावकत्वं बोध्यम्। अर्थात् उत्पन्ना जिज्ञासा आशङ्का वा आगामिन्या परिभाषया समाधीयते इति तज्जिज्ञासाबोधकवाक्यस्य तदवतरणत्वम्। व्याख्यानतो विशेषप्रतिपत्तिरित्यस्याः परिभाषा-रूपाया अर्थविषयकजिज्ञासायाः 'लण्-अइउण्सूत्रयोर्णकारद्वयस्यैवोपादानेनाणिण्ग्रहणेषु सन्देहादनिर्णय' इत्यनेन उत्थापितत्वादस्यावतरणत्वम्। अध्येता, शयिता इत्यादौ इङ्शीङोर्ङित्वाद् गुणनिषेधःस्यादि-त्याशङ्कायां 'कार्यमनुभवन् हि कार्यी' इत्यादिपरिभाषाया अवतारणं विधीयते इत्यस्यास्तदवतरणत्वम्। 'प्रणिदापयति' इत्यादौ दारूपस्य विधीयमाना घुसंज्ञा दापे र्न स्यात् इत्याशङ्कायां 'यदागमास्तद्गुणीभूताः इति परिभाषया दोषाभावो विधीयते इत्यस्यामाशङ्कायामप्यवतरणत्वमिति सर्वत्र बोध्यम्। अवतार्यते परिभाषा विषयो ग्रन्थो वा अनेनेत्यवतरणपदस्य व्युत्पत्ति र्भवति। करणे ल्युटि सिद्धिः।

परिभाषेन्दुशेखरस्थितासु परिभाषासु तासां व्याख्यासु च अनेकानि पारिभाषिकपदानि (विषयगत-प्राविधिकपदानि) सन्ति। जिज्ञासुहिताय कतिपयानां तदर्थोपस्थापनं व्याकरणानुगुणं विधीयते-

१. 'व्याख्यानतो विशेषप्रतिपत्तिरिति परिभाषायाम् 'अलक्षणमिति पदं वर्त्तते' तस्य चाननुष्ठापक लक्षणमिति विग्रहः। अत्र मध्यमपदलोपी समासः। अस्य च पदस्य साक्षात्परंपरया वाऽसंन्दिग्धानाहार्याप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकबोधजनकं न भवतीत्यर्थः। शास्त्रस्य=सूत्रस्य निर्णयजनकौचित्यात् तदभाववत्त्वं न भवतीति सारः। तेन व्यावृत्तेर्व्यवहारस्य च वाचकस्य लक्षणपदस्य नात्र ग्रहणं क्रियते।

२. प्रकृतग्रन्थस्य द्वितीयपरिभाषायां यथोद्देशपदं, तृतीयपरिभाषायाञ्च कार्यकालपदं वर्त्तते। तत्र यथोद्देशत्वम्- उद्देशः उपदेशदेशः। तस्य अनतिक्रमणं यथोद्देशत्वम् 'तत्तद्वाक्यार्थबोधे जाते' भविष्यति किञ्चिदनेन प्रयोजनमिति ज्ञानमात्रेण सन्तुष्यद् यथाश्रुतप्रतिपत्रपेक्षोऽयं पक्षः। यत्रोपदेशस्तत्रैव तत्पदार्थज्ञानमिति तदाशयः। 'कार्यकाल' इत्यस्य च कार्येण काल्यते = स्वसन्निधिं प्राप्यते इत्यर्थः। संज्ञासूत्राणां परिभाषासूत्राणाञ्च विधिप्रदेशे आनयनमिति शाब्दिकोऽर्थः। एवञ्च कार्यकालपक्षे संज्ञापरिभाषासूत्राणां वाक्यार्थबोधो विधिप्रदेश एव भवतीत्याशयः। एवञ्च अस्य पदद्वयस्यापि प्रतिज्ञासङ्केतौ कार्यावधिश्च नार्था इति।

३. 'अनेकान्तः' इति पदम् 'अनेकान्ता अनुबन्धाः' इति चतुर्थ्यां परिभाषायां प्रयुक्तं वर्त्तते। अत्र 'एकान्तः' इत्यस्यावयवोऽर्थः। 'अनेकान्तः' इत्यस्य च अनवयव इति। बोधके उपलभ्यमानत्वे सति बोध्येऽनुपलभ्यमानत्वं तत्त्वम्। तेन अनेकान्त इत्यस्य रहोऽभाव इति लौकिकार्थो नात्र गृहीत इति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४. अनुबन्धः-

इत्संज्ञकत्वमनुवन्धत्वमिति दीक्षितादयो वैयाकरणाः । नागेशस्तु इत्संज्ञायोग्यत्वमनुवन्धत्वमिति[१३] आचार्यकर्त्तृकलक्ष्यसमवायातिरिक्तकार्यसमर्पकोच्चारणविषयत्वमिति अन्ये परिभाषेन्दुशेखर–टीकाकाराः । सुपि, तिङि, घञि, अणादौ च पकारञकारघकारादौ इत्संज्ञकत्वमित्संज्ञायोग्यत्वं वा वर्त्तते इति तेऽनुबन्धाः । अनुवन्धपदस्य व्युत्पत्तिस्तु अनु=समीपं बध्यते=आसज्ज्यते इत्युचिता, पुरस्तादासज्यमानानामपि वर्णानां ग्रहणात् । प्रायेण देशनियमार्था अनुबन्धा भवन्ति । तेनानुवन्ध–चतुष्टयादिकं नात्रार्थस्तस्य पदस्येति बोध्यम् ।

५. अल्-

'नानुवन्धकृतमनेकाल्त्वमिति षष्ठ्यां परिभाषायां प्रथममल्पदं वर्त्तते । अल्वात्र वर्णमात्रं भवति । अत एव वर्णमात्रवृत्तित्वमल्त्वमुच्यते । तेन भूषणपर्याप्तिवारणादिकं नात्रार्थो गृह्यते । क्विपि तदर्थेऽपि तत्सम्भवात् ।

६. कार्यी-

पदमिदं 'कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते' इत्यत्र वर्त्तते । अस्य च पदस्य कार्यमस्ति अस्य अस्मिन् वा इति विग्रहो भवति । विग्रहमात्रजन्योऽर्थोऽत्र न गृह्यते किन्तु कार्यभागेव कार्यवान् कार्यीति पदेनोच्यते । सूत्रेषु त्रयोंऽशा भवन्ति-कार्यी, कार्यं निमित्तञ्च । क्वचित्तु द्वयोरेव निर्देशोऽपि भवति । दुर्गादासादयो वैयाकरणाः कथयन्ति-

कार्यी कार्यं निमित्तञ्च त्रिभिः सूत्रमुदाहृतम् ।
कदाचित्कार्यिकार्याभ्यां क्वचित् कार्यनिमित्ततः ॥ इति

तानि च- यस्य निर्दिश्यते कार्यं स कार्यी कथितो वुधैः ।
क्रियते यत्तु तत्कार्यमादेशप्रत्ययागमम् ॥
यस्मात्परं परे यस्मिन् तन्निमित्तं द्विधा मतम्[१४] ।

कार्यिनिमित्तकार्येषु यथासंख्येन षष्ठी, पञ्चमीसप्तम्यौ प्रथमा चेत्येता विभक्तयः प्रयुज्यन्तें इति तत्तत्परिचायिका विभक्तयः । इदञ्चोद्धृतवन्तो विद्वांसः-

कार्यपूर्वे पञ्चमी स्यात् कार्यस्थानेषु षष्ठिका ।
कार्ये तु प्रथमा वाच्या सप्तमी विषये परे ॥ इति

७. आगमः-

'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इत्यादिषु परिभाषासु इदं पदं प्रयुक्तं वर्त्तते । पदसिद्धौ वैयाकरणानामागमानां महन्महत्त्वं वर्त्तते । व्याकरणसूत्रानुसारेण शव्देषु शब्दगतवर्णेषु च

१३ 'जसः शी (७/१/१७) इति सूत्रे लघुशब्देन्दुशेखरे' ।

१४ हरिनामामृतमिति कृत्वा उद्धृतवन्तो वैयाकरणाः पद्यजातमिदम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्धितो वर्णो वर्णसमुदायो वा आगमो भवति, न तु वेदादिवोधक आगमोऽत्र गृह्यते । आगम्यते येन इति विग्रहे करणे घञि निष्पन्नमिदं पदम् ।

८. उत्सर्गापवादौ-

अनयोः प्रयोगः 'क्वचिदपवादपिषयेऽप्युत्सर्गोऽभिनिविशते' इत्यादौ वर्त्तते । सामान्यशास्त्रं व्यापकशास्त्रं वा उत्सर्गपदेन गृह्यते व्याकरणे । विशेषशास्त्रं व्याप्यशास्त्रं वा अपवादपदवोध्यं भवति । अपवादशास्त्रञ्च व्याकरणे सामान्यशास्त्रमपवदति=वध्नाति । एवं करणे घञि निष्पन्नमपवादपदम् । उत्सर्गापवादने हेतुश्च निरवकाशत्वम् । अत एवोच्यते तत्र तत्र 'निरवकाशो विधिरपवादः' इति । यथा- 'आद्गुणः' इति सूत्रं 'वृद्धिरेचीत्यपवदति 'अकः सवर्णे दीर्घः' इति च 'इको यणचीत्यादिसूत्रम् । एवमुपाकर्मणः समाप्तिस्त्यागोऽध्यारोपनाशश्चात्र न गृह्यतेऽर्थः उत्सर्गपदस्य ।

९. निर्दिश्यमानत्वम्-

इदं पदं 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषायां प्रयुक्तं वर्त्तते । तत्त्वञ्च 'षष्ठीप्रकृतिजन्य-प्राथमिकोपस्थितिविषयत्वम् । स्वपूर्वापरागमघटितत्वं वा । प्रथमं 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रेण सूत्रेषु गृहीतस्य शब्दस्वरूपस्योपस्थिति भवति । तदनन्तरं 'येन विधिस्तदन्तस्य' इति सूत्रेण तदन्तस्योपस्थिति भवति । तत्र प्रथमोपस्थितस्य शब्दस्वरूपस्यैव ग्रहणं कर्त्तव्यमिति अस्य पदस्य तात्पर्यम् । अत एव 'जराया जरसन्यतरस्यामिति सूत्रेण 'निर्जरसौ' इत्यत्र जर (जरा) शब्दस्यैव जरसादेशो भवति, एकदेशविकृतमनन्यवत्तया स्थानिवद्भावेन वा । तेनान्यस्य निर्देशकर्मणो न निर्दिश्यमानत्वमिति वोध्यम् ।

१०. आन्तर्यम्-

अन्तम् = भेदाभावं रायति = (रै शब्दे) कथयति इति अन्तरः = (अन्त+रै+क) समानः[१५] । तस्य भाव आन्तर्यम् = सादृश्यम् । सादृश्यञ्च व्याकरणस्यादेशप्रसङ्गे चतुःप्रकारकं भवति- स्थानकृतम्, गुणकृतम्, अर्थकृतम्, प्रमाणकृतञ्च । एषु स्थानत आन्तर्यस्यैव वलवत्त्वं भवति । तथा च परिभाषा- 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं वलीय' इति । स्थानत आन्तर्यस्योदाहरणं 'सुद्ध्युपास्यः' इति । अत्र इको यणचीति सूत्रेण ईकारस्य यकार एवादेशो भवति । अर्थत आन्तर्यस्योदाहरणं 'पद्दन्नित्यादिसूत्रेण पादशब्दादेः पदादय आदेशाः । 'तृज्वत्क्रोष्टुरिति सूत्रेण क्रोष्टुशब्दस्य क्रोष्टृआदेशोऽप्यस्योदाहरणम् । गुणो नामात्र वाह्यप्रयत्नः । तदान्तर्यस्योदाहरणं वाग्घरिरित्यादि । प्रमाणत इत्यस्य 'अमू' इत्यादीनि उदाहरणानि अदसोऽसेरित्यादीनां वोध्यानि ।

११. उपसर्जनम्-

किञ्चिन्निष्ठविधेयतानिरुपितप्रकारताश्रयत्वम् उपसर्जनत्वमिति गुरवः । इदं लौकिकमुपसर्जन-त्वम् । शास्त्रीयन्तु तत्त्वम् प्रथमानिर्दिष्टत्वं नियतविभक्तिकत्वञ्च । 'न वहुव्रीहौ' (१/१/२९)

---

१५ संस्कृतकोशा अत्र प्रमाणम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इति सूत्रे शेखरे तु 'स्वार्थविशिष्टार्थान्तरबोधकत्वं तत्त्वमिति नागेशः । एवं विशेषणं प्रकारं वा कथयन्ति उपसर्जनं विद्वांसः । प्रियास्त्रयो येषामिति बहुव्रीहौ अन्यपदार्थः प्रधानो भवति । प्रियपदार्थस्त्रिपदार्थश्चोपसर्जने भवत इति बोध्यम् । तेन तत्र त्रिशब्दस्य न त्रयादेशः । 'स्त्रीप्रत्यये चानुपसर्जने न' इत्यादिषु अस्य पदस्य प्रयोगो दृश्यते । तेन विघ्नादयोऽर्थास्तत्पदस्य नात्र गृह्यन्ते । अत एव 'अतिकारीषगन्ध्यापुत्र' इत्यत्र न सम्प्रसारणम् ।

१२. व्यपदेशिवद्भावः-

अपदेशो नाम व्यवहारः । विशिष्टोऽपदेशः = मुख्यो व्यवहारो भवति । व्यपदेशोऽस्ति अस्मिन्निति व्यपदेशी । व्यपदेशिना तुल्यमिति विग्रहे 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण क्रियातौल्ये वतिप्रत्ययो भवति । ततश्च स्वादिकार्ये अव्ययत्वात्तस्य लुग् भवति । एकस्मिन्नित्यस्य असहायोऽर्थः । तेनासहायेऽपि ससहायवत्कार्याणि भवन्तीति 'व्यपदेशिवदेकस्मिन्नित्यस्या अर्थः । तेन अकारमात्रस्यापि अदन्तत्वात् तत्प्रयुक्तं कार्यं भवति । अत एव आभ्यामित्यादौ 'सुपि चेति दीर्घो भवति । एभिरित्यत्र एत्वञ्च । अस्यापत्यमिति विग्रहे सुबन्ताद् अशब्दाद् 'अत इञ्' इत्यनेन इञि इरिति प्रयोगोऽपि भवति । तेन नामकीर्त्तिनिन्दादयोऽर्था नात्र गृह्यन्ते ।

१३. घटितः, घटकश्च-

घटितपदं, 'नञ्घटितमनित्यम्' इति अष्टनवत्यां परिभाषायां प्रयुक्तं वर्त्तते । घटितघटकयोः परस्परापेक्षितत्वं दृश्यते । घटितः समुदायो भवति घटकश्चावयवः । "नेयङुवङ' इति सूत्रं 'नञ्' इति सूत्रञ्च नञ्घटिते, नञ् च घटकः । तेन ताभ्यां क्रियमाणं कार्यमनित्यमिति 'हा पितः ! क्वासि हे सुभ्रु' ! इत्यत्र नदीत्वात् सुभ्रूशब्दे 'अम्वार्थ०' इति ह्रस्वत्वम्, 'अनेकमिति पदस्य साधुता च सम्पन्नम् । घटकताघटितयोर्निरूप्यनिरूपकभावो भवति । घटकता च वर्णेषु घटितता च शब्दे समुदाये वा इति बोध्यम् ।

१४. तदादिः-

प्रकृतिप्रत्ययविशिष्टसमुदायत्वं तत्त्वम् । यथा रामशब्दात् भ्यामि कृते राम+भ्याम् इति तदादि भवति । तदादिरित्यस्य प्रत्ययान्ततदादिरत्यर्थो निष्कर्षतो बोध्यः । भ्यामादौ परे राममात्रादेरङ्गसंज्ञा तु व्यपदेशिवद्भावेन बोध्या[१६] । प्रत्ययग्रहणे यस्मात्स इत्यादिषु अस्य पदस्य प्रयोगो बोध्यः ।

१५. अक्तपरिमाणम्-

'एकदेशविकृतमनन्यवत्' इति परिभाषायां तद्व्याख्याने इदं पदं प्रयुक्तं वर्त्तते । अस्य च पदस्य परिच्छिन्नपरिमाणमित्यर्थः । तेन संख्यात्वव्याप्यधर्मानयने परिमाणत्वव्याप्यधर्मानयने तद्घटितधर्मानयने च अस्याः प्रवृत्ति र्न भवति । अतो माणकपरिच्छिन्नः प्रस्थपरिच्छिन्नो मन्तुं न शक्यते, एकोनशतरूप्यकाणि शतरुप्यकाणि च न मन्तुं शक्यन्ते इति । अत एव

१६ श्यामाचरणत्रिपाठी, अवधायिकायां परिभाषेन्दुशेखरस्य 'सुबोधिनीहिन्दीव्याख्यासहितस्य, चौखम्वा-सुरभारती-प्रकाशनस्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भूतिटीकायास्तत्त्वप्रकाशिकायां 'संख्यात्वपरिमाणत्वैतदन्यतरव्याप्यधर्मावच्छिन्नविषयताकबुद्धि–प्रतिबन्धकबुद्धिविषयताश्रयत्वम् अक्तपरिमाणत्वमिति तत्कारा लिखन्ति ।

१६. अन्तरङ्गत्वबहिरङ्गत्वे-

इदञ्च दैशिककालिकादिभेदादनेकविधम् । पूर्वोपस्थितिनिमित्तकत्वमन्तरङ्गत्वं तद्भिन्नत्वं बहिरङ्गत्वम् । अपरनिमित्तकत्वमन्तरङ्गत्वं तद्भिन्नत्वं वहिरङ्गत्वम् । अन्तर्भूतनिमित्तकत्वमन्तरङ्गत्वं तद्भिन्नत्वं बहिरङ्गत्वम् । धातूपसर्गयोः कार्यमन्तरङ्गं तद्भिन्नं वहिरङ्गमित्यनेकविधमिदं भवति ।

नागेशस्तु परिभाषेन्दुशेखरेऽन्तर्भूतनिमित्तकत्वमन्तरङ्गत्वमिति स्वीकुर्वन् लिखति- अन्तर्भूतान्यङ्गानि= निमित्तानि यस्य तदन्तरङ्गम्, एवं तदीयनिमित्तसमुदायाद् बहिर्भूताङ्गकं वहिरङ्गमिति परिभाषितवान्, 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यत्र परिभाषायाम् । अतोऽत्र लौकिकार्थमात्रं न गृह्यते इति ।

१७. सन्निपातः- (सम्+नि+पत्+घञ्)

शास्त्रशेषप्रकरणे पठितायां 'सन्निपातलक्षणो विधिरिति परिभाषायां पदमिदं वर्त्तते । अस्य च सन्निपातशब्दस्यानेकेऽर्था भवन्ति-सम्मिश्रणम्, त्रयाणां शारीरिकधातूनां विषमीभवनम्, सङ्गीतस्य तालः समयो वा विषमज्वरश्चेति । व्याकरणे एषु न कोऽप्यर्थो गृह्यते । अत्र तु द्वयोः शब्दयोः सम्बन्धस्तदर्थो भवति । अथ च पूर्वपरयोः सम्वन्ध एव तदर्थो न भवति किन्तु विशेष्यविशेषणभाव–सम्वन्धोऽपि तेन पदेन वोध्यते । अत एव 'ग्रामणि कुलम्' इत्यादौ नपुंसकह्रस्वत्वेऽपि ह्रस्वस्य पिति कृति' इत्यादिना तुग्न भवति, प्रातिपदिकाजन्तत्वसन्निपातेन जातस्य ह्रस्वस्य तद्विघातकत्वात् । तुकि सति अजन्तत्वविघातः स्पष्ट एव । सन्निपातपदस्य सम्बन्धार्थकत्वादेव 'शतानि' इत्यत्र नुमि कृते षट्संज्ञया जसो लुग् न भवति, 'उपादास्त' इत्यत्र चात्वे कृते 'स्थाध्वोरिच्च' इतीत्वञ्च न भवति, अस्याः परिभाषायाः प्रवृत्त्या ।

१८. उपजीव्यः-

प्रकृताया एव परिभाषाया निरूपणप्रसङ्गे उपजीव्यविरोधस्यायुक्तत्वमिति लिखितं वर्त्तते । अस्य चोपजीव्यपदस्य उपजीवतीति विग्रहे बाहुलकाद् कर्त्तरि यति यदर्थो भवति न स गृह्यते । किन्तूपजीवयतीति विग्रहे ण्यन्तात् कर्त्तरि बाहुलकाद् यति यदर्थो भवति स गृह्यते । येन स्वस्योपकारः कृतस्तस्य विरोधोऽन्याय्य इति तदर्थः । 'शतानि' इत्यादौ जसं जस्स्थानिकमिकारं वा मत्वा नुम् जातस्तन्माध्यमेन जसस्तत्स्थानिकस्य वा लुक् कर्त्तुं न शक्यते, उपजीव्यविरोधस्यान्याय्यत्वात् । अत्र नुमो जस् उपजीव्यो नुंचोपजीवक इति यावत् । एवमन्यत्रापि । लोकेऽपि उपजीव्यस्य = उपकारकस्य विरोधः परिह्रियते इति तन्मूलिकेयं परिभाषा । एवञ्चात्र उपजीव्यपदस्योपकारको निमित्तं वाऽर्थो न तु जीविकादाता, कथावस्तुनः स्रोतो रक्षको वा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१९. सन्नियोगशिष्टः ।

इदं पदं परिभाषेन्दुशेखरस्य सप्ताशीति-परिभाषायां प्रयुक्तं वर्त्तते । अत्र सन्नियोगशिष्टत्वं समुच्चयेन विहितत्वम्[१७] । पञ्चेन्द्र' इत्यत्र इन्द्रवरुणेति सूत्रेण ङीप आनुकश्च समुच्चयेन विधानमस्ति । अत्र 'लुक् तद्धितलुकि' इति सूत्रेणोभयो र्निवृत्ति र्भवतीति तद्रूपं भवति । अन्यथा आनुकश्श्रवणं स्यात् । अत एव 'सन्नियोगशिष्टानामुभयोरप्यपायो भवतीति परिभाषितम् । एवं साहचर्येण शिष्टताङ्गतस्य पुरुषस्य न ग्रहणम् ।

२०. लक्षणं प्रतिपदोक्तञ्च-

अत्र लक्षणया अर्शआद्यजन्तत्वकल्पनया वा लक्षणपदेन लाक्षणिकं पदं गृह्यते, न तु सूत्ररूपं लक्षणम् । लाक्षणिकञ्च लक्षणेन-सूत्रेण निष्पन्नं पदमत्र बोध्यम् । प्रतिपदोक्तत्वञ्च[१८] स्वीयोद्देश्यतावच्छेदकज्ञानायोपयुज्यमानानुपूर्वीमत्पदघटितशास्त्रविधेयत्वम् । अत एव 'तत्पुरुषे तुल्यार्थेति सूत्रे' तृतीया तत्कृतार्थेन' इत्यस्यैव ग्रहणं भवति, न तु 'विशेषणं विशेष्येणेति सूत्रस्येति परमेण कारकेण इति विग्रहणेन निष्पन्ने 'परमकारके' इत्यत्र तद्धिहितस्वरो न भवति । 'गातिस्था०' इत्यत्र च 'आदेच०' इति सूत्रेण विहितात्वकस्य पैधातोर्ग्रहणञ्च न भवतीति बोध्यं, तस्य लाक्षणिकत्वात् ।

२१. अभेदकत्वम्-

'अभेदका गुणाः' इत्यत्र इदं पदं वर्त्तते । गुणाश्चात्र उदात्तानुदात्तस्वरितादयो गृह्यन्ते । स्वेतरगुणविशिष्टस्य व्यावर्त्तकत्वं भेदकत्वं तद्भिन्नत्वमभेदकत्वम् । विशेषयत्नाभावे स्वरूपत उच्चरिता गुणा अभेदका भवन्ति=विवक्षिता न भवन्ति इत्यर्थः । अत एव 'यू स्त्र्याख्यौ नदी' इत्यत्र समेषामीकाराणामूकाराणाञ्च ग्रहणं भवति । अत्र 'अविदारका' इति लोकप्रसिद्धस्यार्थस्य 'भिदिर् विदारणे' इत्यस्मान्निष्पन्नस्य अभेदका इत्यस्य ग्रहणं न क्रियते इति । एवमन्यत्रापि विवेक्तव्यमिति सारः ।

सन्दर्भग्रन्थाः-

१. युधिष्ठिरमीमांसकः, सं. व्याकरणशास्त्र का इतिहास, द्वि. भाग, वहालगढ, सोनीपत, हरियाणा, भारतम् ।
२. पतञ्जलिः, महाभाष्यम् ।
३. महाभाष्यम् २/१/१ सूत्रे प्रदीपोद्योते नागेशः ।
४. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी ।
५. सोमनाथसिग्द्यालः, प्रतिसंस्कृतसिद्धान्तकौमुदी, परिभाषाप्रकरणम् ।
६. श्रीभैरवमिश्रः परिभाषेन्दुशेखरे भैरवी, प्रका., चौखम्वा सं. संस्थानम् ।
७. श्रीलक्ष्मणशर्मा, परिभाषेन्दुशेखरस्य तत्त्वप्रकाशिका टीका ।
८. परिभाषेन्दुशेखरस्य भूतितिलकं तत्त्वप्रकाशिका च ।
९. पाणिनीया अष्टाध्यायी ।
१०. अन्ये व्याकरणसम्वद्धाः शोधप्रवन्धाश्च ।
११. संस्कृतकोशग्रन्था विभिन्नाश्च ।

---

१७ प्रकृतपरिभाषाया भूतितिलकस्य तत्त्वप्रकाशिकायाम् ।

१८ श्रीरामकृष्णः, प्रकृतपरिभाषायां भूतितिलके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

"हलन्त्यम्" इत्यस्य सूत्रस्य सशब्दरत्नं प्रौढमनोरमोक्तदिशा विश्लेषणम्

प्रा. डा. लीलानाथः पौडेल

१. प्रस्तावना

सूत्रेष्वक्षराणि अनावश्यकानि न स्युः । यत्र सन्देहस्य स्वल्पोऽपि गन्धो न स्यात् । एवं सारपूर्णं व्यापकञ्च सूत्रं स्यात् । पुनर्यत्रास्थिरता चञ्चलता वा दूर एव तिष्ठतु । अनिन्द्यता तत्रास्तु । इत्थं पाणिनीयं सूत्रलक्षणं प्रसिद्धम्, तदेवोक्तम्–

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥[1] इति

प्रचलितसंस्कृतवैयाकरणधुरन्धरेण महामुनिना पाणिनिना समुल्लिखितेषु ग्रन्थरत्नेषु विख्यातो ग्रन्थः 'अष्टाध्यायी' इति संस्कृतवाङ्मयेऽतीव प्रसिद्धः । ग्रन्थो ह्येषोऽध्यायक्रमेण समुल्लिखित-स्तदीयसूत्रसमाहारः । तानि हि सूत्राणि प्राधान्येन संज्ञासूत्रम्, परिभाषासूत्रम्, विधिसूत्रम्, नियमसूत्रम्, अतिदेशसूत्रम्, अधिकारसूत्रञ्चेति षड्विधानि ।

उपर्युक्तेषु षड्विधेषु सूत्रेषु प्रथमं संज्ञासूत्रमप्यनेकम् । अत्र स्थिता हि व्याकरणगता संज्ञा प्रायेण लघ्वी, टि-घु-भादिरूपा । स्थलविशेषे गुर्वी च । यथा- प्रातिपदिकम्, संयोगः, सम्प्रसारणम्, इत्यादिसंज्ञा । एवंविधाया महासंज्ञाया विधानन्तु श्रुत्यनुरोधादेव । तथा हि- 'महासंज्ञाकरणं श्रुत्यनुरोधात्'[2] इति । लघुसंज्ञाकरणन्तु पाणिनीयं वैशिष्ट्यमेव । ताष्वेवैका 'इत्' इति संज्ञा सूत्रकारेण पाणिनिना प्रयुक्ता संज्ञेति वर्णसमाम्नाये 'अ-इ-उण्' इत्यत्र णकारस्य 'ऋ-लृक्' इत्यत्र ककारस्येत्येवंरूपेण 'हलन्त्यम्'[3]

---

१. आचार्यो वरदराजः, मध्यसिद्धान्तकौमुदी (संस्कृतहिन्दीव्याख्या), चौखम्वा सुरभारतीप्रकाशनं, वाराणसी, प्रथमं संस्करणम्, ई. १९९९, पृ. ६

२. भट्टोजिदीक्षितः, प्रौढमनोरमा (शब्दरत्नसहिता), काशी हिन्दू विश्वविद्यालयः, वाराणसी, प्रथमं संस्करणम्, वैक्रमाब्दः २०२१, पृ. २६९ ।

३. भट्टोजिदीक्षितः, वै.सि.कौ., चौखम्वा अमरभारतीप्रकाशनं, वाराणसी, सप्तमं संस्करणम्, वि.सं. २०५३, पा.सू.सं. १।३।३ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इति सूत्रेणेत्संज्ञायां कृतायाम् 'आदिरन्त्येन सहेता'[४] इति सूत्रेण तत्तत्संज्ञा- (अण्, अच् आदि) विधानात् अजादिप्रत्याहाराणां सिद्धिर्जायते ।

२. सूत्रार्थविचारः–

अत्र विचार्यते-पूर्वोक्तेन हलन्त्यमिति सूत्रेणेत्संज्ञां विना हल्पदार्थस्य बोधो न भवति । हल्पदार्थस्य बोधं विना इत्पदार्थस्य च वोधो न भवति इति अत्र अन्योन्याश्रयदोषावसरः । तथा च 'अन्योन्याश्रयाणि च कार्याणि न प्रकल्पन्ते, यथा नौर्नावि बद्धा नेतरत्राणाय भवति'[५] इति । तथा चैवंविधस्यान्योन्याश्रय-दोषस्य निवारणार्थं 'हलन्त्यम्' इत्यस्य पूर्वोक्तस्य सूत्रस्य आवृत्तिर्विहितेति । कृतायामस्य सूत्रस्यावृत्तौ आवृत्तेन 'हलन्त्यम्' इति सूत्रेण - 'हल् (मा.स. १४) इति सूत्रेऽन्त्यमित्स्यात्' इत्यर्थबोधनात् 'हल्'[६] इति सूत्रस्यं लकारमात्रस्येत्संज्ञा । ततःपूर्वोक्तेन 'आदिरन्त्येन सहेता'[७] इति सूत्रेण हल्प्रत्याहारसिद्धौ सत्यां ततः 'उपदेशे' इत्यस्य 'इत्' इत्यस्य चानुवृत्तौ अपरस्य 'हलन्त्यम्' इति सूत्रस्य 'उपदेशेऽन्त्यं हलित्स्यात्' इत्यर्थात् समेषामक्षरसमाम्नाये स्थितानामन्त्य हल्वर्णानामित्संज्ञायां कृतायां पुनःपूर्वोक्तेन 'आदिरन्त्येन सहेता' इति सूत्रेण अजादीनां सर्वेषां प्रत्याहाराणां सिद्धिरिति विश्लेषणस्यास्यायमुपक्रमः ।

३. सूत्रस्यपदयोः समासविचारः–

प्रथमं 'हलन्त्यम्' इत्यत्र 'हलि अन्त्यम्' इति विग्रहे सप्तमीतत्पुरुषसमासे कृते 'हलन्त्यम्' इति जातमित्युक्तं, किन्तु तन्न समीचीनं 'सप्तमी शौण्डैः'[८] इति सूत्रेण तथा समासविधानार्थम् 'अन्त्यम्' इत्यस्य पदस्य शौण्डादिगणे पाठाभावात् । न च समासविधायकस्य सूत्रस्य योगविभागात् 'सप्तमी' इत्येकं सूत्रम्, 'शौण्डैः' इत्यपरम् । 'सप्तमी इत्यस्यार्थो' हि- सप्तम्यन्तं सुबन्तसमर्थेन सह वा समस्यते, स च तत्पुरुष इति । तथा च 'हलि' इत्यस्य सप्तम्यन्तस्य 'अन्त्यम्' इत्यनेन सुबन्तसमर्थेन सह समासे कृते 'हलन्त्यम्' इति जातमिति वाच्यम्, – अस्य सूत्रस्य योगविभागःकर्तव्य इति महाभाष्ये कुत्रापि दर्शनाभावात् । अतस्तथारूपेण तत्र 'हलि अन्त्यम्' इति विग्रहे कृते समासःक्रियते चेत् तर्हि पूर्वोक्तेन 'सप्तमी शौण्डैः' इति सूत्रेण समासासम्भवात् तदसम्भवः । यदि नु 'सह सुपा'[९] इति सूत्रेण समासे कृते तथा रूपं निष्पन्नमिति यथाकथञ्चित् समाधीयते तथापि वस्तुतस्तेन रूपेण पूर्वोक्तेन 'सह सुपा' इति सूत्रेण समासविधानन्त्वगतिकगतिरिति तिरस्कृत्य 'षष्ठी'[१०] इति सूत्रेण 'हलः अन्त्यम्' इति विग्रहे षष्ठीतत्पुरुषसमासे कृते समाहितमेतत् ।

---

४. पूर्ववत, पा.सू.सं. १।१।७१
५. महामुनिः पतञ्जलिः, व्याकरणमहाभाष्यम्, मोतीलालः वनारसीदासः, बंगलो रोड, जवाहरनगर, दिल्ली, ई.सन् १९६८, प्रथमसंस्करणम् ।
६. वै.सि.कौ., पूर्ववत्, पृ. १, माहेश्वरसूत्रम् १४
७. वै.सि.कौ., पूर्ववत्, पा.सू.सं. १।१।७१
८. वै.सि.कौ., पूर्ववत्, पा.सू.सं. २।१।४०
९. वै.सि.कौ., पूर्ववत्, पा.सू.सं. २।१।४
१०. वै.सि.कौ., पूर्ववत्, पा.सू.सं. २।२।८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न च तथा षष्ठीतत्पुरुषसमासस्य विग्रहप्रदर्शनात् तत्र 'षष्ठी स्थानेयोगा'[११] इत्यस्य सूत्रस्य प्रवृत्तौ 'हलःस्थाने अन्त्यमित्स्यात्' इत्यनुचितोऽर्थः सम्पद्येतेति वाच्यम्, यथा 'ऊदुपधाया गोहः'[१२] इत्यस्य सूत्रस्य प्रसङ्गे तत्र पूर्वोक्तस्य 'षष्ठी स्थानेयोगा' इत्यस्य सूत्रस्य न प्रवृत्तिस्तथैवात्रापि नास्य प्रवृत्तिरिति दोषाभावात्। 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यात् इति न्यायेन च हलः, स्थाने, अन्त्यम्, इत्येतेषां त्रयाणां पदानां 'हलः' इत्यस्य स्थान इत्यनेन सह, ततः 'अन्त्यम्' इत्यनेन च सह तथारूपेणान्वयासम्भवात् पूर्वोक्तस्य 'षष्ठी स्थानेयोगा' इति सूत्रस्य नात्रोपस्थितिरिति पूर्वोक्तार्थप्रदाने न कुत्रापि आपत्तिरिति अन्त्ये सूत्रेऽस्मिन् 'हलः अन्त्यम्' इति विग्रहे षष्ठीतत्पुरुषसमासे कृते निष्पन्नेन पूर्वोक्तेन 'हलन्त्यम्' इति सूत्रेण तथा विहिते कार्ये न कुत्रापि दोष इति निश्चीयतेऽत्र षष्ठीतत्पुरुषसमासः।

४. अन्योन्याश्रयदोषपरिहारोपायविचारः–

अत्र विचार्यते यत्- 'हलन्त्यम्' इति सूत्रं सम्पूर्णं नावर्तनीयं किन्तु 'हल्' इति सूत्रस्यैकदेशमात्रमावर्तनीयम् अथवा 'हल्' इति सूत्रैकदेशमात्रस्य तन्त्रेण समाधेयम्, कि वा 'हल्' इति सूत्रैकदेशमात्रस्य द्वित्वैकशेषयोः कृतयोः कार्यं सम्पादनीयमिति किमर्थं समग्रस्य सूत्रस्य 'हलन्त्यम्' इत्येतस्य द्विरावृत्तेरावश्यकता ?, तावतैवेष्टसिद्धेरिति। पूर्वोक्तप्रतिपादिततन्त्रत्वञ्च–सकृदुच्चारितत्वे सति वह्वर्थवोधकत्वम् इति। तन्त्रमित्यस्यात्रत्यं विवरणं हि–सकृदुपदिष्टेन 'हल्' इत्यनेन हल्सूत्रस्यान्त्यलकारस्य, हल्प्रत्याहारवोधितसमस्तहल्वर्णस्य च वोध इति। आवृत्तिरित्यनेनात्र द्विवारपठनम्। एकशेष इत्यनेन वहुषु सत्सु ह्येकमात्रावशेषः। तथा च 'हल्' इत्यस्यैवं विधाने तत्र स्थितस्य प्रथमस्य 'हल्' इत्यस्य 'हस्य ल' इति व्युत्पत्तौ अत्र प्रतिपादितायाः षष्ठीविभक्तेः सामीप्येऽर्थे कृते ततो 'हसमीपो ल् इत्' इतीत्थं सूत्रार्थः परिपूर्यते। ततः 'आदिरन्त्येन सहेता' इति सूत्रसहकृतेन 'हलन्त्य' मित्यनेन हल्प्रत्याहारस्य सिद्धिः। ततो द्वितीयेन 'हलन्त्यम्' इत्यनेन 'आदिरन्त्येनेत्यादिना चाणादीनां प्रत्याहाराणामपि सिद्धिरिति।'

इत्थं 'हल्' इत्यत्र 'हस्य लः' इति षष्ठीतत्पुरुषसमासे कृते पूर्वोक्तानुसारेण सामीप्यं षष्ठ्यर्थ इत्यादिना यः समाधानोपायः परिकल्पितो नैष उपायो मान्यः, षष्ठ्या सामीप्यार्थवोधनासम्भवात्। तथा षष्ठीतत्पुरुषसमासे कृते, सुपोलुकि तया षष्ठ्यां सामीप्यार्थवोधे जाते हस्य समीपः, अनन्तरो वा लः इति विग्रहे असामर्थ्यात् षष्ठीतत्पुरुषसमासाभावापत्तिः। अथवा 'अनन्तरादिषु न समासः, अनभिधानात'[१३] इति स्पष्टमाकरे इत्युक्तत्वात्। पुनस्तथैव विग्रहे (हस्य समीपः, अनन्तरो वा ल इति विग्रहे) 'शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्'[१४] इत्यनेन वार्तिकेन मध्यमपदलोपिसमासे अथवा सौत्रत्वात् पूर्वोक्तविग्रहे ('हस्य समीपः, अनन्तरो वा लः' इति) षष्ठीतत्पुरुषसमास इत्युक्तावपि

---

११. वै.सि.कौ., पूर्ववत्, पा.सू.सं. १।१।४९
१२. वै.सि.कौ., पूर्ववत्, पा.सू.सं. ६।४।५९
१३. प्रौढमनोरमा, पूर्ववत्, पृ. ८
१४. वै.सि.कौ., पूर्ववत् (कात्यायनवार्तिकम्) वार्तिकसंख्या-१८०, पृ. १४४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तथाविधसमस्याया न समाधानम् क्लिष्टत्वात् । 'ब्राह्मणस्य कम्बलः' इति विग्रहे विहिते षष्ठीतत्पुरुषसमासे निष्पन्नेन तेन 'ब्राह्मणकम्बलः' इत्यनेन पदेन 'ब्राह्मणसमीपवर्ती अन्यदीयः कम्बल इत्यर्थप्रतीत्यापत्तेः' । एवं 'चित्रा गावो यस्य सः' इति विग्रहे 'अनेकमन्यपदार्थे'[१५] इति सूत्रेण बहुव्रीहिसमासे तया षष्ठ्या चित्रगवीणां समीपवर्तिनां वृक्षादीनां प्रतीत्यापत्तिश्च ।

न च 'ग्रामस्य कूपः=ग्रामकूपः' इत्यत्र ग्रामस्य समीपवर्ती कूप इति षष्ठ्या समीपार्थेऽवगते, तथैव– 'गङ्गायाः तीरम्=गङ्गातीरम्' इत्यत्रापि तया षष्ठ्या गङ्गासमीपवर्ति तीरम् इतीत्थं समीपार्थे सिद्धे कथं 'हस्य लः=हल्' इत्यत्र च षष्ठ्या हकारसमीपवर्ती लकार इत्यर्थो न प्रतीयत इति वाच्यम्? द्वयोरनयोरुदाहरणयोः समीप एवावयवत्वारोपेण समास इति तत्र षष्ठ्या समीपार्थावगतेऽपि सर्वत्र षष्ठ्या समीपार्थबोधनासम्भवात् । अत्र प्रयोजनाभावात्, लक्षणाया असम्भवाच्च ।

न च पुनः 'हल्' इत्येकदेशस्यैव 'हल् च ल् च अनयोः समाहारः' इति विग्रहे समाहारद्वन्द्वसमासे 'हल्ल' इति जाते 'ल्' इत्यस्यान्त्यलकारस्य 'संयोगान्तस्य लोपः'[१६] इति सूत्रेण लोपे 'हल्' इति । ततःपरम् 'अन्त्यम्' इति विद्यत एव । तथा च 'हलन्त्यम्' इत्यनेनैकेनैव सूत्रेणानावृत्तेन वा सर्वत्रेष्टसिद्धिरिति पुनरपि सूत्रस्यास्य द्विरावृत्तिरनावश्यकीति वाच्यम्, तेन रूपेण समाहारद्वन्द्वसमासे कृतेऽन्त्यस्य लकारस्य संयोगान्तलोपासम्भवात् 'यणः प्रतिषेधो वाच्यः'[१७] इति वार्तिकेन तन्निषेधात् ।

न च वार्तिकस्यास्य प्रत्याख्यानरूपञ्चैकः पक्षः । अस्मिन् पक्षे पूर्वोक्तसूत्रेणान्त्यस्य लकारस्य लोपः सम्भव इति वाच्यम्, पूर्वोक्ते 'संयोगान्तस्य लोपः इत्यस्मिन्' सूत्रे 'झलो झलि'[१८] इत्यस्मात् सूत्राद् झल्ग्रहणमपकृष्य 'संयोगान्तस्य झलो लोपः' इत्यर्थान्न लकारस्य लोप इति तत्र 'हल्लन्त्यम्' इत्यापत्तेः ।

पुनश्च प्रथमं पदार्थबोधः, ततो वाक्यार्थावबोध इति पदार्थबोध विना वाक्यार्थबोधासम्भवेन हल्प्रत्याहारसिद्धेः प्राक् 'हलन्त्यम्' इत्यस्य सूत्रस्य (अनावृत्तस्य) हल्पदार्थबोधं विना इत्पदार्थबोधाभावः, इत्पदार्थबोधं विना हल्पदार्थबोधाभाव इति अन्योन्याश्रयदोषग्रस्तत्वादेतत्सूत्रार्थानवगतेऽन्योन्याश्रय-दोषनिवारणार्थं सूत्रस्यास्यावृत्तेरयं यत्नः । अस्यामेवावस्थायामथवा सूत्रावृत्तेः प्रागेव तु सहविवक्षाया अभावाद् हल्शब्दार्थाप्रसिद्धौ द्वन्द्वसमास एव दुर्लभ इति हल् च ल् चेति विग्रहे पूर्वोक्तानुसारेण द्वन्द्वसमासे 'ल्' इत्यस्य च लोपे 'हल्' इत्यनेन सर्वं कार्यं निर्बाधं जातम् इति यदुक्तं तत्सर्वथाऽयुक्तमिति सम्पूर्णस्यैव 'हलन्त्यम्' इत्यस्य सूत्रस्यावृत्तिरावश्यकीति ।

५. हरिदीक्षितदिशा शङ्कासमाधानम्–

न च 'आद्यन्तौ टकितौ'[१९] इति सूत्रे स्थितम्- टश्च कश्च = टकौ, टकौ इतौ ययोस्तौ =

---

१५. वै.सि.कौ., पूर्ववत्, पा.सू.सं. २।२।२४
१६. वै.सि.कौ., पूर्ववत्, पा.सू.सं. ८।२।२३
१७. वै.सि.कौ., पूर्ववत्, कात्यायनवार्तिकम्, वा.स. ४
१८. वै.सि.कौ., पूर्ववत्, पा.सू.सं. ८।२।२६
१९. वै.सि.कौ., पूर्ववत्, पा.सू.सं. १।१।४६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

'टकितौ' इति च पदं प्रसिद्धम् । तथैव आदिश्च अन्तश्च = 'आद्यन्तौ' इति च पदं द्वन्द्वसमासनिष्पन्नम् । एवमत्र च 'आद्यन्तौ टकितौ' इत्यत्रेव सहविवक्षाऽस्तु । सहविवक्षा च सह वक्तुर्वक्तुमिच्छेति । तादृशेच्छा च सूत्रप्रणयनानुपपत्या पाणिनेस्ततः पूर्वमपि हल्पदार्थज्ञानादक्षतैव । बोधृबोधस्तु तदनुक्रमेणैवेतिवाच्यम्- 'आद्यन्तौ टकितौ' इत्यत्र सूत्रे यथासङ्ख्यसूत्रारम्भसामर्थ्येन तथा द्वन्द्वसमासस्य साधुत्वाङ्गीकारेऽपि अन्यप्रकारेण (सहविवक्षाया अभावेऽपि) 'हल्' इत्यत्र द्वन्द्वसमासकल्पने मानाभावात् ।

नन्वेवं चेत्तर्हि मुखनयनयोरपि सहविवक्षाया अभावात् मुखञ्च नयनञ्चेति विग्रहे 'मुखनयनम्' इति द्वन्द्वसमासे निष्पन्ने 'मुखनयनं पश्य' इत्येवंविधस्य लोकप्रसिद्धस्य वाक्यस्य च सिद्धिर्न स्यादिति चेन्न । मुखनयनयोरुभयोर्ज्ञानं यस्मिन् जने वर्तते तस्मिन् प्रत्येव तादृशशब्दप्रयोगेण तत्र सहविवक्षा वर्तत एवेति द्वन्द्वसमासस्य निर्वाधात् ।

एवञ्च यथा पाणिनिना हल्वर्णानाम् 'इत्' इत्यस्य च ज्ञानं सहैव विहितं तथा श्रोतृभिरपि तयोः (हल्पदार्थेतपदार्थयोः) सदैव ज्ञानं क्रियत इति न । अत एव बोधॄणां क्रमिकं ज्ञानं यथा स्यात्तथेति 'नाऽऽज्झलौ'[२०] इति सूत्रे भाष्ये 'वर्णानामुपदेशस्तावत्, उपदेशोत्तरकाला इत्संज्ञा, इत्संज्ञोत्तरकालः प्रत्याहारः, प्रत्याहारोत्तरकाला सवर्णसंज्ञा, तदुत्तरकालम्' 'अणुदित्...' इत्यादिना सवर्णग्राहकमिति क्रमिकत्वं प्रतिपादितमिति न तत्र बोधॄणां सहैव बोधः[२१] ।

६. उपसंहारः–

अतः सर्वेणैतेन विश्लेषणेन स्फुटीक्रियते यत् 'हलन्त्यम्' इत्यत्र षष्ठीतत्पुरुषसमास एव युक्तियुक्तः । सूत्रस्यास्यैकदेशमात्रस्य 'हल्' इत्यस्य तन्त्रावृत्त्येकशेषान्यतमेन यः समाधानोपायः परिकल्पित स हि युक्तिसङ्गत इत्येतस्य पक्षस्य बलवत्या युक्त्या खण्डनम् । 'हल्' इत्येकदेशमात्रस्य लकारेण सह समाहारद्वन्द्वसमासे कृते लकारस्यैकस्य लोपे 'हल्' इति जाते तत्रैव लकारद्वयं मत्वैकेनेत्संज्ञकेन प्रथमेन तेन हल्प्रत्याहारसिद्धौ द्वितीयेनेत्संज्ञकेन लकारेणाजादीनां सिद्धिरिति सूत्रस्यांशमात्रमपि नावर्तनीयमित्यस्य च पक्षस्य युक्त्या निरसनम् । तथैव चान्ते महामुनिना पाणिनिना यथा 'इत्' इत्यस्य पदार्थस्य 'हल्' इत्यस्य च पदार्थस्य ज्ञानं सहैव कृतं न तथा श्रोतृभिरन्यैरिति मनसि निधाय निर्दिष्टान्योन्याश्रयदोषपरिहारार्थं समग्रस्य सूत्रस्यावृत्तिरेव ज्यायसीति मतं सुनिश्चितम् ।

७. सन्दर्भग्रन्थसूची

१. आचार्यवरदराजः, मध्यसिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, ई. सन् १९९९

२. पतञ्जलिः, व्याकरणमहाभाष्यम्, मोतीलाल बनारसीदास, बंगलो रोड, जवाहर नगर, दिल्ली, ई.सन् १९६८, प्रथमसंस्करणम् ।

३. भट्टोजिदीक्षितः, प्रौढमनोरमा, शब्दरत्नसहिता, काशी हिन्दू विश्वविद्यालयः, वाराणसी, वि.सं. २०२१ ।

४. भट्टोजिदीक्षितः, वै.सि.कौ., चौखम्बा अमरभारती प्रकाशनं, वाराणसी सप्तमं संस्करणम्, वि.सं. २०५३ ।

२०. वै.सि.कौ., पूर्ववत्, पा.सू.सं. १।१।१०

२१. भट्ट नागेशः, प्रौढमनोरमा, हरिदीक्षितविरचिता लघुशब्दरत्नटीकासहिता, प्रथमभागः, प्रधानसम्पादकः श्रीवासुदेवशरण अग्रवाल, प्रथमं संस्करणम्, प्रकाशकः काशी हिन्दू विश्वविद्यालय, वाराणसी ५, वैक्रमाब्दः २०२१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आचार्यकमलशीलविरचितवज्रच्छेदिकाप्रज्ञापारमिता-टीकाया विषयपरिशीलनम्

डा. काशीनाथः न्यौपाने
सहप्राध्यापकः

महायानबौद्धधर्मे पारमितासाहित्यं विपुलं विविधतायुक्तञ्चेति न तिरोहितं विदुषाम् । प्रायः ४० ग्रन्थाः प्रज्ञापारमितानाम्ना प्रसिद्धाः सन्ति[१] । तेषु वज्रच्छेदिका चान्यतमेति वक्तव्यम् । वज्रं यथा कठिनमपि लौहादिकं कृन्तति तद्वदेवेदमपि ग्रन्थरत्नं समूलमज्ञानं छिनत्तीति वज्रच्छेदिकेति नामधेयम्[२] ।

वज्रच्छेदिकाया ३०० श्लोकपरिमाणयुतो ग्रन्थराशिर्वर्तत इति त्रिशतिप्रज्ञापारमितेत्यपि कथ्यते । असङ्गस्तु त्रिशतिकां प्रज्ञापारमितामाह[३] ।

'एवं मया श्रुतम्' इति वाक्यादेव सूत्रग्रन्थानामारम्भो विधीयते । यतः सूत्राणां प्रामाणिकता तेनैव जायतेऽन्यथा केनचिदन्येन श्रुतं न मयेति तस्य प्रामाण्यं तस्मादेव मयैव श्रुतम् । भगवतो मुखारविन्दादेव, पुनश्च निश्चितकाले देशे वेति द्योतनार्थं तथोच्यते । इत्थं समग्रमहायानसूत्राणां देशना भगवतैव कृता मयैव श्रुतमिति निश्चीयते । भगवान् एव तत्र प्रमाणं धर्मदेशनायां नान्यः कश्चिदित्यपि द्योत्यते[४] ।

आचार्यदिङ्नागो विषयमिमं प्रज्ञापारमितायामेवं प्राह

श्रद्धावतां प्रवृत्यङ्गं शास्ता पर्षच्च साक्षिणी
देशकालौ च निर्दिष्टौ स्वप्रामाण्यप्रसिद्धये ।
सङ्गीतिकर्ता लोके हि देवकालोपलक्षितम्
ससाक्षिकं वदन् वक्ता प्रामाण्यमधिगच्छति[५] ॥

---

१. एडवर्ड कोन्ज, दि प्रज्ञापारमिता लिटेरेचर ।

२. अत्र हि द्विधा व्रज्रच्छेदिका । सूक्ष्मक्लेशज्ञेयावरणानि वज्रवद्दुर्भेद्यानि तेषां छेदनात् । एतेनास्य ग्रन्थस्य आवरणद्वयप्रहाणं तावत् प्रयोजनं निर्दिष्टम् – वज्रच्छेदिका टीका, पृ. ९७ ।

३. लालमणि जोशी, वज्रच्छेदिका प्रज्ञापारमितासूत्रम्, पृ. ३ ।

४. यदा भगवान् राजगृहे महानगरे गृध्रकूटे पर्वते यथोक्तपर्षदा परिवृते धर्मं देशयन् विजहार तदा भगवतःसकाशात्तत्रैव स्थाने तया पर्षदा सार्धमेवं मया सूत्ररत्नं श्रुतम् इति सर्वैरप्येतैः लोकव्यवहारानुवर्तनात् संकीर्तितदेशादिभिः संगीतिकारेण आत्मप्रामाण्यप्रतिपादनात् विनेयानां सादरश्रवणचिन्तनादिकमुक्तम् – हरिभद्रसूरिः, अष्ट साह, आलोकटीका, पृ. २७७

५. आचार्यदिङ्नागः प्रज्ञापारमितापिण्डार्थकारिका ३-४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इत्थं वज्रच्छेदिकायामपि 'एवं मया श्रुतम्' इति वाक्यादेव ग्रन्थारम्भो दृश्यते। अस्य सूत्रस्य गायको भगवतः सेवकशिष्य आनन्द एवासीत्। यतः प्रथमो महायानसूत्रसङ्गीतेः संधारक आनन्द एवेति विदुषां मतम्[६]।

अस्य ग्रन्थस्योपदेशस्तु श्रावस्त्यामेवाभूत् यत्रोऽन्येषां सूत्राणामुपदेशः प्रायशः गृध्रकूटे कृत इति दृश्यते परमस्य न तथा। इह १२५० भिक्षव आसन्। महासत्त्वा वोधिसत्त्वा अन्ये च यिनेया तत्रासन्[७]।

अस्य सूत्रस्योपदेशाय प्रश्नं कृतवान् सुभूतिः। तत्र प्रश्ने षड्विधं प्रयोजनं विलोक्यते–

१. संशयनिराकरणम्, २. अधिमुक्तेरुत्पादनम्, ३. गभीरार्थेऽवतारणम्, ४. अविनिवर्तनम्
५. परमानन्दोत्पादः, ६. सद्धर्मस्य चिरस्थायित्वञ्चेति[८]।

उपर्युक्तं षड्विधं प्रयोजनं प्रतिपत्तिलक्षणत्वेन निर्दिष्टम्। तच्च मार्गव्यवस्थेति टीकाकृदाह। तस्य चाष्टदशभेदा विलोक्यन्ते–

१. चित्तोत्पादः, २. पारमिताप्रयोगः, ३. रूपकायप्राप्तेरभिलाषः, ४. धर्मकायप्राप्तिकामना, ५. भावनावैशिष्ट्यप्राप्तौ नाभिमानः, ६. बुद्धोत्पादस्याराधना, ७. क्षेत्रपरिशुद्धिप्रणिधानम्, ८. सत्त्वपरिपाकः, ९. वाह्यशास्त्रेषु नानुरागः, १०. सत्त्वलोक-भाजनलोकयोः पिण्डरूपेण ग्रहणं विनाशयोगश्च, ११. तथागतपूजा सत्कारश्च, १२. कायचित्तयोः परिश्रमानन्तरं वीर्यतो निवृत्तिः, तथा च प्रारब्धकर्मणामनारम्भो लाभसत्कारयोर्निरपेक्षता च, १३. दुःखक्षान्तिसामर्थ्यम्, १४. ध्यानरसास्वादनविरतिः, १५. अभिसमयकालेऽहङ्कारात्मकविकल्पादपगतिः, १६. उपदेशपर्येषणम्, १७. अभिसमयवोधः, १८. वुद्धभूमिपर्येषणञ्चेति[९]।

वस्तुतो वुद्धभूमिपर्येषणं सप्तविधसम्पद्भिः संगृहीतं भवति। तद्यथा–

१. क्षेत्रपरिशुद्धिसंपत्, २. अनुत्तरदृष्टिपरिशुद्धिसंपत्, ३. अनुत्तरज्ञानपरिशुद्धिसंपत्,
४. पुण्यस्कन्धवशितासंपत्, ५. कायसंपत्, ६. वाक्संपत्, ७. चित्तसंपत्[१०]

चित्तसम्पदोऽपि सप्तभेदा यथोक्ताः–

१. स्मृत्युपस्थानम्, २. अभिसम्वोधिः, ३. महाधर्मार्थप्रज्ञप्तिः, ४. अपवादमहत्त्वप्रज्ञप्तिः,
५. धर्मकायपरिग्रहः, ६. निर्वाण-संसारयोरप्रतिष्ठितता, ७. परिशुद्धप्रस्थितिश्चेति[११]

परिशुद्धप्रस्थितिरपि त्रिधा भवति। तद्यथा–

---

६. आचार्य पेमा दोर्जे, वज्रच्छेदिकाटीका, भूमिका, पृ. ४६।
७. वज्रच्छेदिका सूत्रम्, १।
८. वज्रच्छेदिकाटीका कमलशीलकृता, पृ. ९८।
९. वज्रच्छेदिकाटीका कमलशीलकृता, पृ. १०२।
१०. वज्रच्छेदिकाटीका कमलशीलकृता, पृ. ११५।
११. वज्रच्छेदिकाटीका कमलशीलकृता, पृ. १२५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१. ईर्ष्यापथप्रस्थितिः, २. सत्त्वभाजनलोके विद्यमानप्रस्थितिः, ३. असंक्लेशप्रस्थितिश्चेति[१२]

असंक्लेशप्रस्थितिः पुनर्द्विधा–

१. देशनाऽसंक्लेशः, २. संसाराऽसंक्लेशश्चेति[१३]

अन्तिमगाथा च ग्रन्थे निम्नप्रकारेण प्रस्तूयते–

तारका तिमिरं दीपो मयाऽवश्याय वुद्वुदम् ।
स्वप्नं च विद्युदभ्रं च एवं द्रष्टव्यसंस्कृतम् ॥[१४]

इह संस्कृतपदार्थानां चत्वारि लक्षणानि निर्दिष्टानि–

१. स्वभावलक्षणम्, २. विषयरसास्वादनलक्षणम्, ३. आदीनवान्वयलक्षणम्
४. निर्याणान्वयलक्षणञ्चेति[१५] ।

इत्थं ग्रन्थेऽस्मिन् भगवता यत् प्रतिपादितं तत्सर्वमतिसंक्षेपेणेह समुपस्थापितम् ।

आचार्यकमलशीलस्य टीकां विनास्य ग्रन्थस्यार्थः कथमपि न वयं कर्तुं शक्ता इति टीकाया महत्त्वं लोकोत्तरं वर्वर्ति । टीकेयं तिव्वतभाषाया संस्कृतभाषायां पुनरुद्धारेण समानीतेति विदुषां कृते गौरवास्पदम्[१६] ।

अस्याःटीकाया भाषान्तरानुवादोऽद्यावधि न केनापि विदुषा कृत इति चिन्ताया विषयः । क्लिष्टत्त्वादेव आङ्गलादिभाषासु वैदेशिकैरपि न क्रियतेऽनुवाद इति चिन्तयामि[१७] ।

सन्दर्भग्रन्थसूची

१. कमलशीलः, आचार्यः वज्रच्छेदिकाप्रज्ञापारमिताटीका सम्पादकः पुनरुद्धारकर्ता च पेमातेनजिन, आचार्यः, केन्द्रीय तिव्वती शिक्षा संस्थान, सारनाथ, वाराणसी, १९९४ (ई.) ।
२. कोञ्ज, एडवर्ड, 'द प्रज्ञापारमिता लिटेरेचर', चतुर्थं संस्करणम्, मुनसीराम मनोहरलाल पब्लिशर, नई दिल्ली, २००८ ।
३. जोशी, लालमणिः, सम्पादक एवं अनुवाद, वज्रच्छेदिका प्रज्ञापारमिता सूत्रम्, केन्द्रीय उच्च तिव्वती शिक्षा संस्थान, सारनाथ, वाराणसी, २००९ ।
४. दिङ्नागः आचार्यः, प्रज्ञापारमिता पिण्डार्थसंग्रहः गायकवाड ओरियन्टल सिरिज, बडोदरा, सम्पा. पि.एल. वैद्य, १९४१ (ई.) ।
५. दोर्जे, पेमातेनजिन, कमलशीलकृतटीका, केन्द्रीय उच्च तिव्वती शिक्षा-संस्थान, सारनाथ, वाराणसी, १९९४ (ई.) ।
६. सूरिः, हरिभद्रः, अष्टसाहस्रिका प्रज्ञापारमिता आलोकटीका, गायकबाड, ओरियन्टल सिरिज, वडोदरा, सम्पा. पी.एल. वैद्य, १९४१ (ई.) ।

---

१२. वज्रच्छेदिकाटीका कमलशीलकृता, पृ. १३०
१३. वज्रच्छेदिकाटीका कमलशीलकृता, पृ. १३१
१४. वज्रच्छेदिका प्रज्ञापारमितासूत्रम् – ३२
१५. वज्रच्छेदिकाटीका कमलशीलकृता, पृ. २२६
१६. विदुषां वशंवदेन आचार्यपेमातेनजिनमहोदयेन भोटभाषातः संस्कृतभाषायां पुनरुद्धृता सर्वसत्त्वहितसुखार्थम् इति – पृ. २२६ ।
१७. साम्प्रतं मयैवास्य ग्रन्थस्यानुवादो गौराङ्गानां भाषायां विधीयमानो वर्तते, मन्ये शीघ्रमेव समाप्स्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यमवर्णानां स्वरूपं सङ्ख्या लेखनप्रकारश्च[1]

डा. आमोदवर्धनः कौण्डिन्न्यायनः
सहप्राध्यापकः

प्रातिशाख्येषु शिक्षेति प्रसिद्धेषु ग्रन्थेषु च वर्णसमाम्नाये यमसंज्ञकवर्णानामुल्लेखः प्राप्यते । किन्तु यमानां स्वरूपस्य सङ्ख्यायाश्च विषये भ्रमो व्यापको वर्तत इति हेतोरस्मिन् विषयेऽत्र विचारः क्रियते ।

१. यमस्वरूपम्

शुक्लयजुर्वेदप्रातिशाख्यानुसारेण पदमध्येऽवस्थितोऽपञ्चमः स्पर्शः पञ्चमे स्पर्शे परत्र स्थिते सति यमत्वं प्राप्नोति । तदुक्तं प्रातिशाख्ये– **अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदम्** (४।१६३) इति । अत्र 'विच्छेद' इति यमस्य पर्यायवाचि पदं वर्तते । तथैव याज्ञवल्क्यशिक्षायां चोक्तम्–

अपञ्चमैश्चैकपदे संयुक्तं पञ्चमाक्षरम् ।
उत्पद्यते यमस्तत्र सोऽङ्गं पूर्वाक्षरस्य हि ॥ इति (२।९३) ।

कौण्डिन्न्यायनशिक्षायामपि यमानां लक्षणं प्रतिपादितं यथा–

स्पर्शात् परेऽपञ्चमास् तु वर्ग्या एकपदे स्थिते ।
पञ्चमे तु परे नासिक्याश् चाऽभिनिहिता यमाः ॥ इति (२।८४) ।

एतद्व्याख्याने तत्रैवोक्तं यथा– **स्ववर्गीयाद् अन्यवर्गीयाद् वाऽपि स्पर्शात् परत्र वर्तमाना वर्गेषु भवा अपञ्चमा वर्णाः समानपदे वर्तमाने स्ववर्गीयेऽन्यवर्गीये वाऽपि वर्ग्यपञ्चमे वर्णे परत्र स्थिते सति**

---

१. अस्मिन् ग्रन्थे प्रयुक्तानां सङ्क्षिप्तसङ्केतानां विवरणमधोनिर्दिष्टप्रकारकं वर्तते –

क्रै.=क्रैस्ताब्दः	टि.=टिप्पणी
तृ.सं.=तृतीयं संस्करणम्	द्र.=द्रष्टव्यः/-व्या/-व्यम्
द्वि.सं.=द्वितीयं संस्करणम्	पुनर्मु.=पुनर्मुद्रणम्/पुनर्मुद्रकः
पृ.=पृष्ठसङ्ख्या	प्र.सं.=प्रथमं संस्करणम्
मा.वा.=माध्यन्दिनीय-वाजसनेयि-	वै.=वैक्रमाब्दः
शु.य.वे.प्रा.=शुक्लयजुर्वेदप्रातिशाख्यम्	श्लो.=श्लोकसङ्ख्या
सम्.=सम्पादकः	स.सं.वि.वि.=सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
सू.=सूत्रसङ्ख्या	p.=page(-number)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नासिक्यीभूताभिनिहितवर्णतां गताः सन्तो यमा इति उच्यन्ते इत्यर्थः। यम्यन्ते मुखभवश्रुतिनिरोधेन निर्वर्त्यन्ते इति यमाः। इति।

पाणिनीयशिक्षापञ्जिकाकारेणाऽपि **यच्छन्तीति यमाः, स्वयमेवोपरमेरन्** (श्लो. ४–५) इत्युक्त्वा यमपदस्य व्युत्पत्तिः प्रदर्शिताऽस्ति। ऋग्वेदप्रातिशाख्येऽपि **श्रुतिर्वा न मुख्या *(मुखभवा)* ऽस्ति समानकाला** इत्युक्तमस्ति (६।३३)। **यमो यच्छतीति सतः** इति निरुक्ते यास्कमुनिनोक्तं दृश्यते (१०।१९)। अतः कतिपयैः प्राच्य-पाश्चात्त्यैः संस्कृताध्येतृभिर्यमलरूपवर्णस्य यमत्वमिति यत् प्रतिपादितं[२] तत् तु सर्वथाऽवोधमूलकमिति ज्ञायते।

२. यमोच्चारणप्रकारः

यमानां मुखभवा श्रुतिर्न भवतीति तु तेषां **विच्छेद** इत्येतया अन्वर्थया संज्ञया शुक्लयजुर्वेदप्रातिशाख्ये व्यवहारादपि ज्ञायते। यमस्य मुखभवश्रुतेरभावाद् हि तत्कालेन मुखभवयोः पूर्वोत्तरयोर्वर्णयोर्विच्छेद इव क्रियत इति तस्याः संज्ञाया अन्वर्थता ज्ञेया। **अशरीरं यमं विद्यात्**[३] इति शिक्षावचनमप्येतस्यैवाऽर्थस्य प्रतिपादकं वर्तते। **श्रुतिर्वा न मुख्याऽस्ति समानकाला** इति ऋग्वेदप्रातिशाख्यवचनेन (६।३३) तु स्पष्टतयाऽयमेवाऽर्थः प्रतिपादितोऽस्ति। एवं च **अर्घ्न्या**[४] इत्यादौ संयुक्तेषु वर्णेषु[५] मध्ये गकारादेरुच्चारणाय तत्स्थाने गतं करणं तत्रैव सन्धृत्य घकारादेरुच्चारणस्य समयेऽपि तत् करणं तत्रैव दृढमविचलं संस्थाप्य मुखेन घकारादिश्रुतिमकृत्वा घकारादेरुच्चारणाय प्रवृत्तं वायुं मुखतोऽनिःसार्य तं केवलं नासिकातो निष्कास्य ततः परं नकारादिके वर्गपञ्चमे वर्णे उच्चारिते गकारादिनकारादिश्रुतिमध्ये मुखभवश्रुतिरहिता केवलनासिकाभवा अंशांशेन घकारादिना सदृशी अपि वर्णव्यक्तिविशेषाभिव्यक्तिरहिता या श्रुतिः सैव **यम** इति वोध्यम्। एवञ्च यमस्य अशरीरत्वं नाम मुखभवश्रुतिरहितत्वम्, नासिक्यत्वं नाम नासिकामार्गेण

---

२. क) **......and therefore called its *yama* or 'twin'** इति तैत्तिरीयप्रातिशाख्यस्य व्याख्यायाम् (२१।१२, पृ. ३८९), **.....a *yama* or 'twin',...** इत्येव शौनकीयचतुरध्यायिकाया व्याख्यायां (१।९९, पृ. ६३) च डब्ल्यू. डी. ह्विट्निरुल्लिखति।

ख) **Yama literally means 'twin', ...** इति सिद्धेश्वरवर्मा लिखति (द्र.– Critical Studies in the Phonetic Observations of Indian Grammarians, p. 79)।

ग) **..... as *yama*, lit. 'twin'.** इत्येव डब्ल्यू. एस्. यालनोऽपि लिखति (द्र.– Phonetics in Ancient India, p. 75)।

घ) **Yama is one of a pair or a twin letter........** इति विधाता मिश्रोऽपि लिखति (द्र.– A Critical Study of Sanskrit Phonetics, p. 87)।

ङ) **अग्ग्निः *पलिक्क्निः* इत्यादौ यमलरूपेण वर्तमाना गकारादयो यमा अप्ययोगवाहाः, ते तु वेद एव व्यवह्रियन्ते।** इति प्रतिसंस्कृतायां सिद्धान्तकौमुद्यां सोमनाथशर्मा (सिग्द्यालः) लिखति (पूर्वार्धे, पृ. ७–८)।

३. **याज्ञवल्क्यशिक्षायाम्** २९२, **पाराशर्यां शिक्षायां** च, श्लो. ५८।

४. **माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-संहितायाम्** १।१।

५. **अर्घ्न्या** इत्यत्र **स्वरात् संयोगादिर् द्विरुच्यते सर्वत्र** (४।१०१) इति शुक्लयजुर्वेदप्रातिशाख्यसूत्रेण घकारस्य द्वित्वमन्वाख्यायते। अत्र द्विरुक्तिजः प्रथमो घकारः **प्रथमैर् द्वितीयास्तृतीयैश्चतुर्थाः** (४।११०) इति प्रातिशाख्यसूत्रेणाऽन्वाख्यातं गकारमापद्यते। एवमेवाऽन्यत्राऽपि ज्ञेयम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निःसरता वायुनाऽभिव्यञ्जनीयत्वम्, ककारादिस्वप्रकृतितुल्यत्वञ्च ककाराद्युपादानभूतेन श्वासेन नादेन वाऽभिव्यञ्जनीयत्वं ककारादेः स्थाने तत्करणस्य सन्धारणादभिव्यङ्ग्यत्वं चेति स्पष्टतयाऽऽकलनीयम्[६]। वर्णसमाम्नाये **कुँ खुँ गुँ घुँ** इति लिपिभिर्[७]यमोपदेशस्योपस्थापनस्याऽभिप्रायोऽप्येतेन स्पष्टीभूतः। तत्र ककारादिना यमानां ककारादिसदृशता सूच्यते, उकारेण चोच्चारणविधा सूच्यते यमसङ्केतीभूत–कँकाराद्युच्चारणसौविध्यं च क्रियते। अमरनाथशास्त्रिणा कृतं यमव्याख्यानमपि[८] अत्रैवाऽनुकूलम्। यमानां ज्ञानेनैव फलं न तेषामुच्चारणविशेषोऽस्तीति प्रतिपादयन्तो रामशर्मा[९] वालकृष्णो गोडशेः[१०] तदनुयायिनोऽन्ये[११] च भ्रान्ता एवेत्यवगम्यते। न हि सर्वथाऽनुच्चारणीयानां शब्दानां स्वेस्वे ग्रन्थे वर्णसमाम्नाये वा प्रातिशाख्यकारादयो वर्णत्वेनोपदेशमकार्षुरिति आस्थातुं युज्यते। यमवर्णानामुच्चारणे स्थानकरणप्रयत्नादिप्रयोगो भवत्येव, अल्पप्राणो महाप्राणो वा अघोषो वा सघोषो वा वर्णप्रकृतिभूतो वायुर् नासिकातो निस्सरत्येव। यमाः ककारादिरूपेण व्यक्ता न भवन्ति, ककारादिभ्यो विलक्षणा एव यमा इत्येव **अशरीरं यमं विद्यात्** इत्यादेर् वचनस्य तात्पर्यं वोध्यम्। अत एव **शून्ये गृहे पिशाचोऽपि गर्जते न च दृश्यते** इत्युक्तममोघानन्दिन्यां शिक्षायाम्[१२]।

३. यमसङ्ख्या

यमानां सङ्ख्याया विषयेऽप्यत्र सङ्क्षेपेण विचारः क्रियते। शुक्लयजुर्वेदप्रातिशाख्ये **कुँ खुँ गुँ घुँ इति यमाः** (८।२४) इत्येवोक्तम्, सङ्ख्या तु स्फुटं नोक्ता, तथापि तत्रोक्तायाः पञ्चषष्टेर् वर्णसङ्ख्यायाः[१३] पूरणाय चत्वार एव यमा आवश्यका भवन्ति। अत एव याज्ञवल्क्यशिक्षायां **चत्वारो यमाः कुँ खुँ गुँ घुँ इति** (पृ. १५४) इति, वर्णरत्नप्रदीपिकायां शिक्षायां च **कुँ खुँ गुँ घुँ इति च ते चत्वारो नाऽत्र पञ्चमः** (श्लो. १७) इति उक्तं दृश्यते। पाणिनीयशिक्षामपि **चत्वारश्च यमाः स्मृताः** (श्लो. ४) इत्युक्तमस्ति। अन्यत्राऽपि कतिपयेषु शिक्षाग्रन्थेषु चत्वार एव यमा उल्लिखिताः सन्ति। उव्वटेनाऽपि शुक्लयजुर्वेदप्रातिशाख्यव्याख्यायां कुत्रचिच् **चत्वारो यमा अनुस्वारनासिक्यौ चेति षड् वर्णाः** (१।७४) इति, **यमाश् चत्वारो नासिकामूलेन क्रियन्ते** (१।८२) इति चोक्तं दृश्यते। तेनैवाऽन्यत्र पुनः **इति यमसंज्ञका वर्णा विंशतिसङ्ख्याका भवन्तीत्येतच्**

---

६. द्रष्टव्या– **कौण्डिन्न्यायनशिक्षा,** शिवराज आचार्यः कौण्डिन्न्यायनः, काष्ठमण्डपनगरम्, नेपालदेशः, २०४९ वै., पृ. २३५।

७. **कुँ खुँ गुँ घुँ इति यमाः।** इति शुक्लयजुर्वेदप्रातिशाख्ये ८।२४।

८. द्र.– याज्ञवल्क्यशिक्षायाः **शिक्षावल्ली विवृतिः**, वाराणसी, २०१९ वै., पृ. १५५–१५६।

९. **एते ज्ञेयाः, न त्वेषामुच्चारणम्– 'अशरीरं यमं प्राहुः'** (याज्ञवल्क्यशिक्षायाम् २।९२)– **इति शिक्षायामुक्तत्वात्।** इति रामशर्मा आह ज्योत्स्नायां वृत्तौ (शु.य.वे.प्रा., सू. ३५३, पृ. १२५)।

१०. **एते ज्ञेयाः। न त्वेषामुच्चारणम्। अशरीरं यमं प्राहुरिति शिक्षायामुक्तत्वात् केवलं ज्ञानमात्रफलम्।** इति प्रातिशाख्यप्रदीपशिक्षायाम् (द्र.– शिक्षासंग्रहः, १९८९ क्रै., पृ. २१७)।

११. **इत्यमोघनन्दिन्याद्युक्तेर्यमस्याशरीरत्वसिद्धान्तान्नैतस्योच्चारणं शक्यम्** इति मधुसूदनशर्मा 'पथ्या स्वस्तिः' इति ग्रन्थे (राजस्थान-प्राच्यविद्या-प्रतिष्ठानम्, १९६९ क्रै., पृ. ९) कथयति।

१२. **अमोघानन्दिन्यां शिक्षायाम्,** श्लो. ५०, **पाराशर्यां शिक्षायाम**पि (श्लो. ५९) प्राय एवमेव।

१३. **एते पञ्चषष्टिवर्णा ब्रह्मराशिरात्मवाचः।** इति शु.य.वे.प्रा. ८।२५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थाध्याये व्याख्यातम् (८।२४) इत्युक्तम्[१४] । कुत्रचिदन्यत्राऽपि यमानां विंशतिः सङ्ख्योल्लिखिता दृश्यते । पञ्चानां वर्गाणामाद्याश् चत्वारश्चत्वारो वर्णा यमवर्णत्वेनाऽप्यभिव्यक्ता भवितुं शक्नुवन्तीति हेतोर् यमवर्णानां सङ्ख्या विंशतिर् भवितुं शक्नोत्येव । तथापि विंशतेर् यमव्यक्तीनां चतुर्विधत्वेन वर्गीकरणं कर्तुं शक्यते । अतो यमानां चतुष्ट्वमपि स्वीकर्तुमुचितमेव दृश्यते । यमानां चतुर्विधत्वं तु **कुँ खुँ गुँ घुँ** इति सङ्केतेन प्रतिपादितमेव । तत्र अघोषाल्पप्राणयमत्वेन, अघोषमहाप्राणयमत्वेन, घोषवदल्पप्राणयमत्वेन, घोषवन्महाप्राणयमत्वेन च यमानां चातुर्विध्यं क्रमशः सङ्केतितं दृश्यते । याज्ञवल्क्यशिक्षायामपि तथैव निर्दिष्टं वर्तते–

रुक्कँमेति प्रथमो ज्ञेयः सक्थ्ँना इत्यपरो भवेत् ।
विद्द्ँमाते तु तृतीयश्च जम्भे दद्ध्ँमश्चतुर्थकः ॥ इति (२।९३) ।

४. यमलेखनप्रकारः

यद्यपि मा.वा. शुक्लयजुर्वेदसंहितापुस्तकादिषु सचन्द्रविन्दुका यमवर्णलिपिः प्रयुक्ता न दृश्यते तथाऽपि यमानां सानुनासिकत्वात्[१५] तत्सङ्केतनार्थं तत्तत्स्थानेषु अनुनासिकचिह्नं (चन्द्रविन्दुः) मुद्रयितुमावश्यकमनुभूयते । यथा– कँ-**रुक्कँमः** (१२।१), गँ-**अग्गँने** १।५), घँ-**अग्घँन्याः** (१।१), चँ-**आतनच्चँम** (१।४), जँ-**यज्जँपतिः**[१६] (१।२), तँ-**सपत्तँक्षित्** (१।२९), थँ-**सक्थँना** (२३।२९), दँ-**ओदद्दँमन्** (१३।५३), धँ-**दद्धँमः** (१६।६४), पँ-**पाप्पँमा** (६।३५), भँ-**अगृभ्भँणन्** (१०।१) इत्यादिषु स्थलेषु । मा.वा.शुक्लयजुर्वेदसंहितायां ख-छ-झ-ट-ठ-ड-ढ-फ-व-यमानामुदाहरणानि नोपलभ्यन्ते ।

तकारजयमस्य सङ्केताय गङ्गेश्वरानन्दसंस्कृतसमेतेषु प्रायः सर्वेषु मुद्रितेषु शुक्लयजुर्वेद-संहितापुस्तकेषु ककारस्य प्रयोगः कृतो दृश्यते । यथा– **सपत्क्नक्षित्** (१।२९), **पत्क्नीः** (६।३४), **आत्क्मने** (७।२७–२८), **रत्क्नानि** (११।२५) इत्यादिषु स्थलेषु[१७] । तथापि अन्येषां यमानां सङ्केताय प्रथम-वर्गीयाः खकार-गकार-घकाराः प्रयुक्ता न दृश्यन्ते, न चाऽन्या काऽपि विशिष्टा लिपिर्वा तत्र प्रयुक्ता दृश्यते । यथा– **आतनच्च्म** (१।४), **यज्ज्ञपतिः** (१।२), **ओदद्दमन्** (१३।५३), **पाप्प्मा** (६।३५) इत्यादिषु स्थलेषु ।

---

१४. तथापि तद् व्याख्यानं तु शुक्लयजुर्वेदप्रातिशाख्यस्य चतुर्थाध्याये न प्राप्यते ।

१५. क) **यमानुस्वारनासिक्यानां नासिके ।** इति शुक्लयजुर्वेदप्रातिशाख्ये १।७४ ।
ख) **नासिकामूलेन यमाः ।** इति शुक्लयजुर्वेदप्रातिशाख्ये १।८२ ।

१६. गङ्गेश्वरानन्दसंस्करणेऽत्र **यज्ञपतिः** इत्येवम्प्रकारेण मुद्रणं कृतं वर्तते । किन्तु यमरूपजकारस्य ञकारेण सहैक्यं कृत्वा यमरूपजकारवैशिष्ट्यं विलोप्य लेखनं मुद्रणं च समुचितं न दृश्यते ।

१७. गङ्गेश्वरानन्दसंस्करणं विहायाऽन्येषु प्रायः सर्वेषु मा.वा.शुक्लयजुर्वेदसंहितासंस्करणेषु **उरसा त्क्मना** (११।३१), **उत त्क्मना** (१३।५२, १५।३७, १८।७७) इत्यादिषु स्थलेष्वपि यमत्वं प्रदर्शितं वर्तते । किन्तु शुक्लयजुर्वेदप्रातिशाख्येन याज्ञवल्क्यशिक्षया च पदमध्य एव यमभावोऽन्वाख्यात इति हेतोरत्र यमत्वप्रदर्शनं सर्वथाऽशुद्धमिति ज्ञेयम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अतोऽव्यवस्थित एव तत्रत्यो यमलिपिप्रयोग इत्यवगम्यते[१८]। अतस्तामव्यवस्थितां यमवर्णलिपिप्रयोगपद्धतिं सर्वथा परित्यज्य नव्यैर्विद्वद्भिः संसूचितां[१९] पद्धतिमवलम्ब्य नियतरूपेण यमलिपिरस्माभिः प्रयुक्तेत्यस्य प्रयोगस्यौचित्यं विद्वद्भिराकलनीयं परीक्षणीयञ्च।

यमस्य परिभाषायां भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां **वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः पलिक्क्नीः चख्ख्नतुः अग्ग्निः घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः** इत्युल्लिखितं दृश्यते[२०]। अत्र दत्ते द्वे उदाहरणे अशुद्धे दृश्येते। **चख्ख्नतुः** इत्यत्र प्रथमस्य खकारस्य चर्त्वे **चक्ख्नतुः** इति भवति। **घ्घ्नन्ति** इत्यत्र तु द्वित्वनिमित्तमेव नाऽस्ति। यदि पूर्वपदकल्पनेनोक्तमुदाहरणं कथञ्चिदुपपाद्येत, तथापि जश्त्वस्याऽऽवश्यकत्वाद् **निग्घ्नन्ति** इत्येवंविधमेव भवितुमर्हति। शब्दकौस्तुभे स्थितस्य **अघ्घ्नन्**[२१] इत्यस्योदाहरणस्याऽपि पूर्वघकारजश्त्वाभावेन दुष्टत्वं ज्ञायते। भट्टोजिदीक्षितस्य एष दोषस् तदनुयायिषु तद्ग्रन्थव्याख्यातृषु हरिदीक्षित-नागोजिभट्टादिषु मध्ये केनाऽपि नैव दृष्टो न वा संशोधित इति तेषां वेदस्य वेदाङ्गशिक्षायाश् चाऽध्ययने न्यूनता प्रकटीभवति।

५. सारांशः

यमवर्णसम्बद्धेनैतेन विमर्शेनाऽधोनिर्दिष्टानि तथ्यानि पुरत आगच्छन्ति–

- स्ववर्गीयादन्यवर्गीयाद् वाऽपि स्पर्शात् परत्र वर्तमाना अपञ्चमाः स्पर्शवर्णाः समानपदे वर्तमाने स्ववर्गीयेऽन्यवर्गीये वाऽपि पञ्चमे स्पर्शे परत्र स्थिते सति नासिक्यीभूताभिनिहितवर्णतां गताः सन्तो यमा इति उच्यन्ते। यथा– रुक्क्मः (१२।१), अग्ग्ने (१।५), अग्घ्न्याः (१।१), सक्थ्ना (२३।२९), दद्ध्मः (१६।६४), पाप्प्मा (६।३५), अगृब्भ्णन् (१०।१) इत्यादिषु स्थलेषु।
- यमानां स्थानं करणं च नासिका वर्तते। अतो यमानामुच्चारणं नासिकातः करणीयम्।

---

१८. क) युधिष्ठिरमीमांसकेनाऽपि याज्ञवल्क्यशिक्षाटिप्पण्याममरनाथशास्त्रिणा समर्थितः (पृ. १५५ टि.३) **पत्क्नी** इत्येवम्प्रकारको लिपिप्रयोगः अशास्त्रीयोऽनुचितश्चेत्युक्त्वा **पत्त्नी** इत्येवम्प्रकारको लिपिप्रयोगः साधीयानित्युक्तं वर्तते (द्र.– **माध्यन्दिन-संहितायाः पदपाठः,** द्वितीयं परिशिष्टम्, पृ.६३७)। तेन पदपाठे **पत्त्नी आत्त्मा** इत्यादिरूपेण मुद्रापितञ्च दृश्यते।

ख) **आत्त्मानम्** (६।३१), **आत्त्मकृतस्य** (८।१३), **गरुत्त्मान्** (१२।४), **आत्त्मा** (१२।४) इत्यादिषु स्थलेषु गङ्गेश्वरानन्दसंस्करणं विहायाऽन्येषु प्रायः सर्वेषु मा.वा.शुक्लयजुर्वेदसंहितासंस्करणेषु यमत्व=प्रदर्शनाय **आत्क्मानम्** इत्यादिप्रकारेण ककारो मुद्रितो न दृश्यते। वल्लभरामसंस्करणे अण्णाशास्त्रिणः संस्करणे चोपर्युल्लिखितेषु स्थलेषु यमत्वप्रदर्शनाय ककारो मुद्रितो नाऽस्ति। अन्यत्राऽपि कुत्रचिदेवमेव मुद्रितं दृश्यते।

१९. **ऋग्वर्णक्रमलक्षणस्य** व्याख्यायाम् (श्लो. १७) **पलिक्क्ँनीः। चख्ख्ँनतुः। अग्ग्ँमन्। वृत्रघ्घ्ँने। परिज्ज्ँमानमिव। रत्त्ँनधातमम्। आत्त्ँमानम्। आप्प्ँनानम्** इति रूपेण यमानामुल्लेखः कृतोऽस्ति। तत्र **चक्ख्ँनतुः, वृत्रग्घ्ँने** इत्यनयोः पदयोरशुद्धं मुद्रणं जातं वर्तते। अन्यत् सर्वं समीचीनं दृश्यते (ग्रन्थकारो व्याख्याकारश्च नरसिंहसूरिः, सम्पादकः वी. कृष्णमाचार्यः, अडयार, १९५९ क्रै., पृ. १५)।

२०. **वैयाकरणसिद्धान्तकौमुद्याः** संज्ञाप्रकरणे बाह्यप्रयत्ननिरूपणे।

२१. **शब्दकौस्तुभे,** १।१।८, नेपाली-सौभाग्य-पुस्तकालयः, दुग्धविनायकः, वनारस सिटी (वाराणसी), पृ. १४२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

- यमवर्णानां सङ्ख्या विंशतिर्भवितुमर्हति । तथापि तेषां चतुर्विधत्वेन वर्गीकरणं कर्तुं शक्यत इति हेतोः शिक्षाग्रन्थेषु *चत्वारो यमाः* इत्युक्तमवगम्यते ।
- यमानां सानुनासिकत्वात् तत्सङ्केतार्थं सचन्द्रबिन्दुका यमवर्णलिपिः प्रयोक्तव्या । इति ।

सन्दर्भग्रन्थाः

१. **मा.वा.शुक्लयजुर्वेदसंहिता,** प्रभाकरशर्मभट्ट-शुक्लवल्लभरामशर्म-नानूरामशर्मप्रभृतिभिर्वैदिकैः संशोधिता, वेङ्कटेश्वरमुद्रणालयः, मुम्बयी (प्र.सं. १९४४ वै., पञ्चमसं. २०५१ वै. १९९४ क्रै.), पुनर्मुद्रणम् २०६१ वै. (२००५ क्रै.) ।

२. **मा.वा.शुक्लयजुर्वेदसंहिता,** वल्लभरामशर्मसंशोधिता, जगदीश्वरयन्त्रालयः, मुम्बयी, १९४८ वै., निर्णयसागरमुद्रणालयः, मुम्बयी, १९६४ वै. ।

३. **मा.वा.शुक्लयजुर्वेदसंहिता,** दाऊजीभट्टोपाह्व-दीक्षितगणपतिशर्मसंशोधिता, हितचिन्तक-मुद्रणालयः, रामघट्टम्, काशी (वाराणसी), १९९२ वै. (१९३६ क्रै.) ।

४. **शुक्लयजुर्माध्यन्दिनसंहितास्वाहाकारप्रयोगप्रदीपः** ('शुक्लयजुर्विधानसूत्रम्' इति ग्रन्थे संलग्नः), सम्पादकः अण्णाशास्त्री 'वारेः', निर्णयसागरमुद्रणालयः, मुम्बयी, १९४३ क्रै. ।

५. **मा.वा.शुक्लयजुर्वेदसंहिता,** सम्पादकः दौलतरामगौडः (प्र.सं. १९४४ क्रै.), चौखम्वाविद्याभवनम्, वाराणसी (गुटका) २०४४ वै. (१९८७ क्रै.), पुनर्मु. २००२ क्रै. ।

६. **मा.वा.शुक्लयजुर्वेदसंहिता,** अमृतलालशास्त्रिसंशोधिता, निर्णयसागरमुद्रणालयः, मुम्बयी, १९५० क्रै., द्वि.सं. (गुटका) १९८३ क्रै., तृ.सं. १९८७ क्रै., चौखम्भा ओरियण्टालिया, वाराणसी ।

७. **भगवान् वेदः** इतिनामके ग्रन्थे मुद्रितो यजुर्वेदः **(मा.वा.शुक्लयजुर्वेदः)**, सम्. स्वामिगङ्गेश्वरानन्द उदासीनः, रामानन्दमुद्रणालयः, नेपाली खपडा, वाराणसी, २०२७ वै. (१९७० क्रै.) ।

८. **माध्यन्दिन-संहितायाः पदपाठः,** सम्. युधिष्ठिरो मीमांसकः, रामलाल कपूर ट्रष्टः, सोनीपत, २०२८ वै. ।

९. **ऋग्वेदप्रातिशाख्यम्,** उव्वटभाष्यसहितम्, विष्णुमित्रकृतवर्गद्वयवृत्तिसहितञ्च, सम्. वीरेन्द्रकुमारवर्मा, काशी-हिन्दु-विश्वविद्यालयः, वाराणसी, १९७० क्रै. (पुनर्मु. चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली, १९८६ क्रै.) ।

१०. **शुक्लयजुर्वेदप्रातिशाख्यम्,** उव्वटा-ऽनन्तभाष्यद्वयेन हिन्द्यनुवादेन च सहितम्, सम्. वीरेन्द्रकुमारवर्मा, ज्ञानप्रकाशन-प्रतिष्ठानम्, वाराणसी, १९७५ क्रै. (पुनर्मु. चौखम्वा-संस्कृत-प्रतिष्ठानम्, दिल्ली, १९८७ क्रै.) ।

११. **शुक्लयजुर्वेदप्रातिशाख्यम्,** ज्योत्स्नया वृत्त्या युतम् **(कातीयशुक्लयजुःप्रातिशाख्यस्य श्रीरामशर्मणा प्रणीता ज्योत्स्ना वृत्तिः)**, सम्. आचार्य-युगलकिशोर-मिश्रः, सं.सं.वि.वि., वाराणसी, १९८९ क्रै. ।

१२. **Atharvaveda–prâtiçâkhya** or **Çaunakiya–caturadhyâyikâ,** Text, Translation and Notes, by William D. Whitney, JAOS; VII (New Haven, USA, 1862); Reprinted : Chowkhamba Sanskrit Series Office, Varanasi, 1962.

१३. **Taittirîya–prâtiçâkhya,** With its Commentary the Tribhâshyaratna : Text, Translation and Notes, by William D. Whitney, (New Haven, USA, 1862); Reprinted : Motilal Banarsidass, Delhi, 1973.

१४. **पाणिनीयशिक्षा,** वेदाङ्गशिक्षाविमर्शाख्यया संस्कृतव्याख्यया नारायण्याख्यया हिन्दीव्याख्यया च विभूषिता, भूमिकया विविधैः परिशिष्टैश् च सहिता, व्याख्याता शिवराज आचार्यः कौण्डिन्न्यायनः, चौखम्वा-विद्याभवनम्, वाराणसी, प्र.सं.१९९८ क्रै., पुनर्मु.२००४ क्रै., द्वि.सं.२००८ क्रै. ।

१५. **याज्ञवल्क्यशिक्षा,** शिक्षावल्ल्याख्यया विवृत्या सहिता, अमरनाथशास्त्री दीक्षितः, काशी (प्र.सं. १९९४ वै.) २०१९ वै. ।

१६. **वर्णरत्नप्रदीपिका शिक्षा,** शिक्षासङ्ग्रहे (प्र.सं. १८८९–१८९३ क्रै., द्वि.सं. १९८९ क्रै.) मुद्रिता ।

१७. **प्रातिशाख्यप्रदीपशिक्षा,** शिक्षासङ्ग्रहे (प्र.सं. १८८९–१८९३ क्रै., द्वि.सं. १९८९ क्रै.) मुद्रिता ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१८. **अमोघानन्दिनी शिक्षा,** शिक्षासङ्ग्रहे (प्र.सं. १८८९–१८९३ क्रै., द्वि.सं. १९८९ क्रै.) मुद्रिता ।

१९. **पाराशरी शिक्षा,** शिक्षासङ्ग्रहे (प्र.सं. १८८९–१८९३ क्रै., द्वि.सं. १९८९ क्रै.) मुद्रिता ।

२०. **शिक्षासङ्ग्रहः,** सम्. युगलकिशोर (व्यास) पाठकः, वाराणसी, १८८९–१८९३ क्रै. । द्वि.सं. (पुनर्मु.) सम्. रामप्रसादत्रिपाठी, सं.सं.वि.वि., वाराणसी, १९८९ क्रै. ।

२१. **कौण्डिन्न्यायनशिक्षा,** रचयिता तथा व्याख्याता शिवराज आचार्यः कौण्डिन्न्यायनः, स्वाद्ध्यायशाला, काष्ठमण्डपनगरम्, नेपालदेशः, २०४९ वै. ।

२२. **ऋग्वर्णलक्षणम्,** ग्रन्थकारो व्याख्याकारश्च नरसिंहसूरिः, सम्पादकः वी. कृष्णमाचार्यः, अडचार, १९५९ क्रै.।

२३. **माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहिताया मुद्रितरूपाणां शुक्लयजुर्वेदप्रातिशाख्यदृष्ट्या समीक्षात्मकमध्ययनम्** आमोदवर्धनः कौण्डिन्न्यायनः, विद्यावारिधिः (पी-एच्. डी.) इत्युपाधये स्वीकृतः (अमुद्रितः) शोधप्रवन्धः, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, २००८ क्रै.।

२४. **Critical Studies in the Phonetic Observations of Indian Grammarians,** by Siddheshwar Varma, London 1929; Munshi Ram Manohar Lal, Delhi, 1961.

२५. **Phonetics in Ancient India,** by W. S. Allen, Oxford University Press, London, 1953.

२६. **A Critical Study of Sanskrit Phonetics,** By Vidhata Mishra, Chowkhamba Sanskrit Series Office, Varanasi, 1972.

२७. **वैयाकरणसिद्धान्तकौमुदी**, भट्टोजिदीक्षितविरचिता, चौखम्वा-विद्याभवनम्, वाराणसी, पुनर्मुद्रितं संस्करणम्, १९८९ क्रै.।

२८. **शब्दकौस्तुभः**, भट्टोजिदीक्षितविरचितः, नेपाली-सौभाग्य-पुस्तकालयः, दुग्धविनायकः, बनारस सिटी (वाराणसी)।

२९. **निरुक्तम्,** दुर्गविरचितया ऋज्वर्थाख्यटीकया सहितम् (त्रयो भागाः), मनसुखरायमोरः, कलकत्ता, १९५२, १९५२, १९५३ क्रै. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अभेदान्वयबोधे वैयाकरणनैयायिकव्युत्पत्तिपरिशीलनम्

भीमप्रसादः कँडेल
सहप्राध्यापकः

१-१- विषय-प्रवेशः

यस्य कस्यापि विषयस्य सामान्यतोऽपि ज्ञानं विना तद्विषयिकेच्छाकृतयः, प्रवृत्तिनिवृत्तिरूपव्यापारा, हानोपादानफलानि च नोपपद्यन्ते। ज्ञानमाश्रित्यैव लौकिकोन्नतिरात्यन्तिकदुखनिवृत्तिः, परमानन्दावाप्तिश्च सम्यग् साध्यन्ते। तत्र सूचनासंग्रहात्मकं, कलाशिल्पात्मकं ज्ञानं लौकिकाभ्युदयार्थमात्मसाक्षात्कारात्मकं ज्ञानञ्च पारमार्थिकशाश्वतशान्त्यर्थं विषयगतभेदेन विनियुज्यते। तद्धि ज्ञानं साधनमन्तरा अधिगन्तुं नैव शक्यते। तानि खलु ज्ञानसाधनानि प्रत्यक्षम्, अनुमानम्, उपमानम्। शब्दः, अर्थापत्तिः, अनुपलब्धिः, सम्भवः, ऐतिह्यम्। चेष्टा, अभ्यासः, अदृष्टम्। स्मृतिः, प्रत्यभिज्ञा, उहः, इत्याख्यानि समग्राणि विविधदर्शनेषु चर्चितानि सन्ति[१]। तत्र परस्परमन्तर्भाव्य प्रतिदर्शनं स्वीकृतज्ञानसाधनानां संख्यागतन्यूनाधिकत्वं तु दृग्गोचरीभवति। व्याकरणदर्शने विशेषतो वैयाकरणो भर्तृहरि र्वाक्यपदीये मणिरुप्यादिरत्नानां सत्यासत्यपरीक्षणं तन्मूल्यनिर्धारणञ्च रत्नपरीक्षकाभ्यासाधीनमिति अभ्यासः[२], रक्षःपितृपिशाचानां व्यवहितविप्रकृष्टवस्तुज्ञानमन्तर्धानादिसामर्थ्यञ्च तददृष्टाधीनमिति अदृष्टम्[३], सकलो लोकव्यवहारो ज्ञानाधीनः तच्च ज्ञानं प्रतिभाधीनमिति प्रतिभा (उद्बुद्धः संस्कारविशेषः) अपि[४] ज्ञानसाधनमिति कृत्वा प्रत्यक्षानुमानशाब्दार्थापत्तिव्यतिरिक्तानामदृष्टाभ्यासप्रतिभानामपि पृथक् पृथग् ज्ञानसाधनत्वं स्वीकरोति। परन्त्वाधुनिका वैयाकरणा अभावप्रत्यक्षे योग्यानुपलब्धेः सहकारिकारणवत् रत्नादिचाक्षुषं प्रति अभ्यासस्य सहकारित्वेन, सूक्ष्मव्यवहितविप्रकृष्टवस्तुप्रत्यक्षे योगिनां योगजसन्निकर्षवत् रक्षःपित्रादीनां तथाविधज्ञानं प्रति योगजाभिन्नादृष्टसन्निकर्षोपयोगेन, प्रतिभाजन्यं ज्ञानं प्रत्यपि योगविशेषादिसहकारेणैव निर्वहन्ति। इत्थं च वाक्यपदीयकाराभिमतस्य अभ्यासादिप्रमाणत्रिकस्य क्लृप्ते प्रत्यक्ष एवान्तर्भावेण प्रत्यक्षानुमानशाब्दार्थापत्तिरूपाणि चत्वार्येव प्रमासाधनानीत्यामनन्ति[५]।

तत्र क्लृप्तचतुस्साधनेभ्यो जायमानानि ज्ञानान्यपि प्रत्यक्षानुमितिशाब्दबोधार्थापत्तिज्ञानाख्यानि चतुःप्रकारकाण्येवावसितानि। अमीषु ज्ञानेषु शब्दश्रवणानन्तरं शब्दनिष्ठोद्बुद्धवृत्त्योपस्थापितपदार्थानां संसर्गावगाहिज्ञानं शाब्दबोधरूपेणाभिमतम्। शाब्दबोधे भासमानाः खलु पदार्था वृत्तिभास्या आकाङ्क्षाभास्याश्चेति द्विविधा मन्यन्ते।

१ तर्कसंग्रहपदकृत्यम् पृ० ८७, प्रमाणमीमांसा, द्वितीयाह्निकद्वितीयसूत्रम् पृ० ३३।
२ वाक्यपदीयब्रह्मकाण्डम् श्लो० ३५।
३ पूर्ववत् श्लो० ३६।
४ वाक्यपदीयद्वितीयकाण्डम् श्लो० १४३, १४७।
५ पाणिनीयव्याकरणे प्रमाणसमीक्षा पृ० ३२१-३२२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिभास्यपदार्थेषु शाब्दवोधनिरूपिता प्रकारताख्यविषयता विशेष्यताख्यविषयता वा विलसति। आकाङ्क्षाभास्यपदार्थेषु संसर्गताख्यविषयतैवावतिष्ठते। तत्राकाङ्क्षाभास्य-पदार्थोऽभेदात्मको भेदात्मकश्चेति द्वेधा प्रथते। तदनुरोधेन शाब्दबोधोऽपि अभेदान्वयबोधो भेदान्वयबोधश्चेति द्वेधैव प्रसिद्धो विद्यते। प्रकृतलेखे, अभेदान्वयवोधव्युत्पत्तिविषये किंचित् परिशीलनं करिष्यते।

१-२-अभेदसंबन्धविषये नैयायिकविचारः

शाब्दबोधे वृत्त्युपस्थापिताः पदार्था भासन्ते इति सिद्धान्तादरे **'नीलो घट'** इत्यादौ नीलपदनिष्ठवृत्त्या नीलत्वविशिष्टनीलपदार्थस्य घटपदनिष्ठवृत्या घटत्वविशिष्टघटपदार्थस्य चोपस्थित्या शाब्दबोधे तयोर्भासनं युक्तियुक्तं जायते। परन्तु नीलो घट इत्यस्माद् नीलप्रकारकोऽभेदसंसर्गको घटविशेष्यको बोधः सर्वानुभूतो विद्यते। तत्र बोधे नीलपदार्थः प्रकारतया घटपदार्थो विशेष्यतया भासितौ लभ्येते तदुपस्थापकपदे समुच्चारितेअपि स्तः। किन्तु वोधे नीलपदार्थघटपदार्थ-व्यतिरिक्तोऽभेदपदार्थोऽपि संसर्गविधया भासितो दृश्यते तदुपस्थापकं पदन्तु नोच्चारितं पदानुपस्थापितस्यापि पदार्थस्य शाब्दबोधव्यवहारे च प्रत्यक्षादावपि तदापत्तिः प्रसज्येतेति पूर्वपक्षोपस्थितौ तार्किकैः प्रोच्यते- **शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते**[६] इति।

तत्र नैयायिकसिद्धान्ते प्रथमान्तार्थमुख्यविशेष्यकश्शाब्दवोधः स्वीकृतः। तथा च प्रकृतवाक्ये संसर्गपदार्थमुख्यविशेष्यकशाब्दवोध इष्यते। एवं च एकपदार्थे इति एकपदार्थरूपप्रकृत्यर्थोऽनुयोगित्वरूपप्रत्ययार्थे निष्ठत्वरूपाकाङ्क्षाभास्यसंवन्धेनान्वेति। प्रत्ययार्थानुयोगित्वञ्च निरूपकत्वेन संसर्गेऽपरपदार्थस्य इति प्रकृत्यर्थस्य निष्ठत्वसंवन्धेन प्रत्ययार्थप्रतियोगितायां तस्यापि निरूपकत्वसंबन्धेन संसर्गे संसर्गमर्यादया इति प्रकृत्यर्थाकाङ्क्षा प्रत्ययार्थे प्रयोज्यत्वे तस्य च भास्धात्वर्थविषयतायां विषयतायाश्चाख्यातार्थाश्रयतायां पुनः तस्याः प्रथमान्तार्थसंसर्गपदार्थे, ऽन्वयः। तथा च एकपदार्थनिष्ठानुयोगितानिरूपकोऽपरपदार्थप्रतियोगिकः संसर्गः शाब्दवोधनिरूपिताकाङ्क्षाप्रयोज्यविषयताश्रय इति वाक्यार्थबोधो नैयायिकमते सिद्ध्यति।

आकाङ्क्षाभास्यस्तादृशसवन्धो नीलो घट इत्यादौ, अभेदरूपः। अत्र हि नीलगुणवाचकनीलशब्दात् संसर्गार्थे **तदस्यास्त्यस्मिन्निति मतुप्**[७] इति सूत्रेण विहितस्य मतुपः **गुणवचनादिभ्यो मतुपो लुग् इष्टः**[८] इति वार्तिकेन लुग्विधानात् प्रकृतवाक्ये प्रयुक्तं नीलपदं नीलरूपवतो द्रव्यस्यैव वाचकं न तु गुणस्य। तथा च प्रकृते नीलपदोपस्थापितस्य नीलरूपवतो द्रव्यस्य घटपदोपस्थापितस्य घटद्रव्यस्य चैक्यात् नीलरूपाश्रयाभिन्नो घट इत्यभेदान्वयबोधः संगच्छते। तेन एकपदार्थेऽपरपदार्थस्येत्यत्र एकत्वस्य अपरत्वस्य च पदे पदार्थे पदार्थतावच्छेदके वान्वये सर्वत्र निर्वाहाभावात् **एकपदार्थेऽपरपदार्थस्य संसर्ग** इति समग्रस्य उपस्थितीयविषयताविशिष्टसंसर्गतावान् तत्र वैशिष्ट्यसंबन्धश्च स्वप्रयोज्यविशेष्यतानिरूपकत्व-स्वनिरूपितत्वाभाववदुपस्थितीय-विषयताप्रयोज्यप्रकारतानिरूपकत्वोभयरूप[९] इति परिभाषितः, परिष्कृतश्चार्थोऽपेक्षितः। प्रकृतप्रसङ्गे नीलो घट इत्यत्र घटे उपस्थितीयघटनिष्ठविशेष्यताप्रयोज्य-शाब्दवोधीयघटनिष्ठविशेष्यता वर्तते तस्या विशेष्यताया निरूपकोऽभेदसंबन्धो वर्तते। एवं नीलनिष्ठोपस्थितीयविशेष्यता-घटनिष्ठोपस्थितीयविशेष्यतयोर्मिथो निरूप्यनिरूपकभावविरहात् नीले चोपस्थितीयघटनिष्ठविशेष्यतया निरूपितत्वाभाववदुप-

६ व्युत्पत्तिवादः, प्रथमकारकम् पृ० १।
७ पाणिनीयसूत्रम् ५। २। ९४।
८ कात्यायनवार्तिकम्। सिद्धान्तकौमुदी पृ० ३०३।
९ व्युत्पत्तिवादः, गूढार्थतत्त्वालोकव्याख्या पृ० २।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्थितीयनीलनिष्ठविशेष्यताख्यविषयताप्रयोज्यशाब्दबोधीयप्रकारता विद्यते तन्निरूपकोऽपि अभेदसंबन्ध एव। तत्राभेदे शाब्दबोधीयसंसर्गताख्यविषयता सा चाकाङ्क्षाप्रयोज्या जायत इत्यादिदिशा समाधानमार्गो मृग्यते।

१-३- अभेदसंबन्धविषये वैयाकरणविचारः

वैयाकरणनिकाये भट्टोजिदीक्षितप्रभृतयः प्राचीनवैयाकरणा अभेदे संसर्गत्वव्यवहारं निश्शङ्कं कुर्वन्ति स्म। तदानीं संबन्धस्य नागेशादिनव्यवैयाकरणाभिमता परिभाषापि नैव विचारिता स्यात्। अतस्तैरभेदस्य संबन्धत्वासंबन्धत्वविषये कृता विचारणा न दृष्टिगोचरीभवति अपि तु अभेदे संबन्धत्वाभिव्यक्तिरेवोपलभ्यते। तथाहि- **अभेदश्चात्र संसर्ग आम्रेयादावियं स्थितिः**[१०]। **प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणमिति**[११] च। नागेशादिनव्यवैयाकरणानां मतानुसारेण तु अभेदो न संबन्धः। यतो हि **संबन्धो हि संबन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः**[१२] इति तल्लक्षणमभीष्टं तच्चाभेदे न संघटते। द्विष्ठत्वं तत्र नैवास्ते यतश्च नीलो घट इत्यादिवाक्ये नीलवाच्यघटवाच्यपदार्थस्यैक्याद् अभेद एकनिष्ठः संबन्धिद्वयस्यापि तत्राप्रसिद्धेः संबन्धिद्वयभिन्नत्वञ्चाभेदेऽप्रसिद्धमिति संबन्धलक्षणमभेदे न प्रसरति तेनाभेदो न संबन्ध इति नव्यवैयाकरणा ब्रुवन्ति। यद्यभेदः संबन्धो न स्यात्तर्हि संबन्धे विधीयमाना षष्ठी 'राहोः शिर' इत्यत्र इत्यभेदे भाष्यकाराभिमता कथमुपपद्येतेत्याशङ्कायां तैरुच्यते - 'राहोः शिर' इत्यत्राभेदेऽपि आरोपितभेदेनावयवावयविभावसंबन्धस्य परिकल्पनेन षष्ठ्याः साधुत्वमिति। अभेदस्तु इतरसंबन्धानवच्छिन्न-विशेष्यविशेषणभावरूपो मन्यते। राज्ञः पुरुष इत्यादौ राजपदार्थे विशेषणत्वं पुरुषपदार्थे च विशेष्यत्वम्। अत्र हि विशेष्यविशेषणभावस्य नियामकः स्वस्वामिभावसंबन्धः। स च विशेष्यविशेषणभावेतररूपस्तेन संबन्धेनावच्छिन्नो राजपुरुषपदार्थनिष्ठो विशेष्यविशेषणभाव इति 'राहोः शिर' इत्यत्रापि कल्पितावयवावयविभावसंबन्धावच्छिन्न-राहुशिरोनिष्ठविशेष्यविशेषणभाव इत्युभयत्र इतरसंबन्धावच्छिन्नविशेष्यविशेषणभावदर्शनात् षष्ठी उपपन्ना। नीलो घट इत्यत्र तु इतरसंबन्धानवच्छिन्नविशेष्यविशेषणभावरूपाभेददर्शनाद् न संबन्धो नापि षष्ठीति। यद्यभेदःसबन्ध इष्येत तर्हि नीलो घट इत्यत्रैव संबन्धे विधीयमाना षष्ठी दुर्वारा स्यात्। तथोक्तं नागेशेन- **यत्त्वभेदसंबन्धेनान्वय इति तन्न तस्य संबन्धत्वे मानाभावात्। संबन्धिभेदनियतत्वात्संबन्धस्य। न चाकाङ्क्षालभ्यः सः? वाक्ये विशेष्य विशेषणभावातिरिक्तस्याकाङ्क्षालभ्यत्वाभावात्। एवं विना संबन्धं विशेष्यविशेषणभावस्यैकविषयत्वात्**[१३]। एवं चाभेदस्य संबन्धत्वाभावः स्पष्टमेव तेनाभिहित इति। एवं हरिदीक्षितेनाप्युक्तम्- **यद्यप्यभेदो न संसर्गः 'राहोः शिर' इत्यादावौपाधिकभेदेन षष्ठ्युपपादनस्य भाष्ये कृतत्वात्तथापि, इतरसंबन्धानवच्छिन्नविशेष्यविशेषणभाव-संसर्गस्य तेन शब्देनाभिधानात्**[१४] इति। इतरपदमपि न देयं तस्य व्यावर्त्यालाभादिति नित्यानन्दपर्वतीयस्याकूतमवाप्यते एवं चाभेदे सम्बन्धत्वस्यानादरो वैयाकरणानां मते स्फुटतरमुपलभ्यते।

१-४- अभेदान्वयबोधे नैयायिकव्युत्पत्तिः

शाब्दबोधे भासितो वृत्त्यानुपस्थापित आकाङ्क्षाभास्यसंबन्धोऽभेदात्मको भेदात्मकश्चेति प्रागुक्त एव तत्राभेदान्वयबोधनियामिका व्युत्पत्तिर्न्यायमते- **अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना**

१० वैयाकरणभूषणसारः, कारिका सं० ५३।
११ वैयाकरणसिद्धान्तकौमुदी, कारकप्रकरणम् पृ० १३१।
१२ परमलघुमञ्जूषा, शक्तिनिरूपणम् पृ० २६।
१३ वैयाकरणलघुमञ्जूषा, सुबर्थविचारः पृ० ११७८-११८१।
१४ प्रौढमनोरमाशब्दरत्नम्, कारकप्रकरणम् पृ० ४४९।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

च **पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते**[१५] **इति**। विशेष्याभिमतपदसमानविभक्तिकपदोपस्थाप्यपदार्थस्य विशेष्याभिमतपदाव्यवहितपूर्ववर्तिपदोपस्थाप्यपदार्थस्य च विशेष्याभिमतपदार्थेऽभेदेन संवन्धो भवति स संवन्धः शाब्दबोधे आकाङ्क्षाभास्यो जायत इति तदाशयः। तथाहि- नीलो घट इत्यत्र विशेष्यत्वेनाभिमतपदं घटपदं तत्समानविभक्तिकपदं नीलपदं तदुपस्थाप्यः पदार्थो नीलत्वावच्छिन्ननीलपदार्थस्तस्य विशेष्यत्वेनाभिमते घटत्वावच्छिन्नघटपदार्थे. एवं नीलघट इत्यादौ विशेष्याभिमतघटपदाव्यवहितपूर्ववर्त्तिनीलपदोपस्थाप्यनीलपदार्थस्य घटपदार्थे च भेदेन संवन्धः स चाकाङ्क्षाभास्य इति। नीलो घट इत्यस्य शाब्दबोधे नीलपदार्थः प्रकारस्तत्र प्रकारतारूपा विषयता घटपदार्थो विशेष्यस्तत्र विशेष्यतारूपा विषयता आकाङ्क्षाभास्ये ऽभेदे च संसर्गतारूपा विषयता एवं तत्र न्यायनये प्रकारताधर्मावच्छिन्ना संबन्धावच्छिन्ना च विशेष्यता केवलं धर्मावच्छिना प्रकारताविशेष्यतयोर्निरूप्यनिरूपकभावो मन्यते। एवं चोक्तवाक्याद् अभेदसंवन्धावच्छिन्ननील-त्वावच्छिन्ननीलनिष्ठप्रकारतानिरूपितघटत्वावच्छिन्न-घटनिष्ठविशेष्यताकं ज्ञानमिति शाब्दबोधप्रक्रिया नैयायिकमते इष्यते।

तत्राभेदान्वयप्रयोजकव्युत्पत्तौ स्वसमानविभक्तिकत्वं समानानुपूर्वीकत्वेन नैव विवक्ष्यते अन्यथा वेदाः प्रमाणम्, शतं ब्राह्मणाः, त्रयः समुदिता हेतुरित्यादिशिष्टप्रयोगेभ्य इष्टाभेदान्वयबोधानुपपत्तिस्तत्रासाधुत्वापत्तिश्च प्रसज्येयाताम्। एवं च यत्र विशेषणपदोत्तरवर्त्तिनी विभक्तिः साधुत्वमात्रार्थमानीयते तत्र विशेष्यविशेषणवाचकपदयोः समानवचनकत्वे साधुत्वमभेदान्वये प्रयोजकत्वञ्च। यत्र खलु विशेषणोत्तरवर्तिनी विभक्तिर्विशेषार्थबोधनाय विवक्ष्यते तत्र समानवचनकत्वाभावेऽपि साधुता विभक्तिविभाजकधर्मप्रथमात्वादिना समानविभक्तिकत्वसिद्धौ अभेदबोधश्चाभ्युपगम्यते। 'वेदा प्रमाणम्' इत्यत्र विशेषणभूतप्रमाणपदोत्तरवर्तिनी सुविभक्तिः साधुत्वार्थं नापेक्षिता किन्तु प्रमितिकरणभूतेषु वेदेषु एकमेव प्रमितिकरणत्वं तिष्ठतीति बुबोधयिषया विवक्षितास्ति। अतोऽत्र समानवचनकत्वाभावे साधुत्वमभेदान्वयबोधश्च न हीयेते। तदुक्तम् - **यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमः**[१६] इति। एवञ्च **किञ्च भो श्लोका अपि प्रमाणम्**[१७] इति भाष्यप्रयोगः, **अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्**[१८] इति भर्तृहरिप्रयोगः, **प्रमाणमन्तःकरणप्रवृत्तयः**[१९] इति कालिदासप्रयोगः, **ब्रह्माद्वितीये श्रुतयः प्रमाणम्**[२०] इति शङ्कराचार्यप्रयोगश्च प्रोक्तव्युत्पत्तिं प्रति प्रमाणाय प्रकल्पन्ते। वेदाः प्रमाणम् श्लोकाः प्रमाणमित्यादौ साधुत्वार्थं तु अहम्, शुभम्, अस्ति इत्यादिवत् **उपसर्गविभक्तिस्वरप्रतिरूपकाश्चेति**[२१] अव्ययविधानेनापि स्वीकर्तुं शक्येत परमुपर्युक्तवक्तृतात्पर्यार्थो नैव निःसरति। अतस्तत्र साधुतासिद्धयेऽपि उक्तव्युत्पत्तिरेव न्याय्या। यद्यप्यत्र प्रमाणपदोत्तरसुविभक्तेरेकत्वे प्रमितिकरणत्वे अन्विते **पदार्थः पदार्थेनान्वेती**तिव्युत्पत्तिविरोध आपद्यते तथापि संख्यान्वयव्यतिरिक्तस्थले तादृशव्युत्पत्तिसंकोचेन दोषाभावो विवक्षितव्यः।

अभेदान्वयप्रयोजकं स्वसमानविभक्तिकत्वमिति प्राक् चर्चितं तद्धि घटो घटः, दण्डवान् दण्डवान् इत्यादावपि सुलभाद् अत्रापि घटप्रकारकोऽभेदसंसर्गको घटविशेष्यको बोध एवं दण्डवत्प्रकारकोऽभेदसंसर्गको दण्दवद्विशेष्यकको बोधो जायताम्। तत्र लोकानुभूतिविरुद्धत्वसद्भावेऽपि सामग्रीसत्त्वे कार्यस्यावश्यंभावात् तादृशान्वयबोधो हठादापन्नो भवति। अतस्तद्वारणाय

---

१५ व्युत्पत्तिवादः, प्रथमकारकम् पृ० १।

१६ पूर्ववत् पृ० ५।

१७ व्याकरणमहाभाष्यम्। पस्पाशाह्निकम् पृ० ३६।

१८ वाक्यपदीयब्रह्मकाण्डम् श्लो० १३।

१९ अभिज्ञानशाकुन्तलम्। प्रथमोङ्कः श्लो० २२।

२० विवेकचूडामणिः,श्लो० ४७९।

२१ गणवार्तिकम्।सिद्धान्तकौमुदी, अव्ययप्रकरणम् पृ० १०७।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अभेदश्च विरूपोपस्थितयोरेवेति[२२] व्युत्पत्यन्तरं समावेश्यते। विरुद्धाभ्यां रूपाभ्यां- धर्माभ्यामुपस्थितो याभ्यां पदाभ्यां ते विरुद्धोपस्थिते तयोरिति बहुव्रीहिसमासेन षष्ठ्यर्थजन्यत्वं स्वीकृत्य यत्पदद्वयद्वारा विरुद्धाभ्यां धर्माभ्यामुपस्थितैकपदार्थरूपधर्मी भवति तत्पदद्वयजन्य एवाभेदान्वयबोध इति तदाशयः। एवं च नीलो घट इत्यत्र नीलत्वघटत्वरूपधर्मद्वयेन एकपदार्थरूपघटधर्मी द्वाभ्यां नीलघटपदाभ्यामुपतिष्ठते तेन तत्राभेदान्वयवोधे न बाधा। घटो घट इत्यादौ तु द्वाभ्यां घटपदाभ्यां घटत्वरूपैकधर्मेणैव धर्म्युपस्थितेर्नाभेदान्वयबोधापत्तिरिति।

ननु कल्पितव्युत्पत्त्या प्राप्तानुभूतिर्निवर्तयितुं न शक्यते। किन्तु प्रथममनुभवविश्लेषणद्वारा पश्चादनुभूत्यनुसारेण व्युत्पत्तिर्व्यवस्थाप्यते। अतो घटो घट इत्यतः प्रसिद्धसामग्रीवलात् प्राक् प्राप्तामभेदान्वयावोधापत्तिं प्रति अभेदश्च विरूपोपस्थितयोरेवेति व्युत्पत्तिरकिञ्चित्करा भवतीत्यत्राह गदाधरः- **यादृशं च फलं क्वचित् प्रसिध्यति तादृशस्यैवापत्तिः संभवति क्लृप्तसामग्रीबलात्। यादृशं च सर्वथाप्रसिद्धं तादृशस्य चापादकाप्रसिद्धेरापत्तिरशक्यैवेति**[२३]। लोके प्राक् कार्यं दृष्ट्वैव तदनुकूलं कारणं निश्चीयते। ततः कारणदर्शनानन्तरं कार्यविषयिणी जिज्ञासा समुदेति। प्राक् कार्ये अदृष्टे सति तु न तदनुकूलकारणसिद्धिर्न कारणदर्शनं न च तादृशकार्यविषयिणी जिज्ञासा जागर्तीत्यभिप्रायः। तेन लोके क्वापि अभेदसंबन्धावच्छिन्नतद्धर्मावच्छिन्न-प्रकारतानिरूपिततद्धर्मावच्छिन्न-विशेष्यताकशाब्दवोधः, अर्थात् अभेदसंसर्गकस्तत्प्रकारकस्तद्विशेष्यकश्शाब्दवोध इति कार्यं न श्रुतं नानुभूतञ्च। तेन प्रकृतेऽपि अभेदसंसर्गको घटप्रकारको घटविशेष्यकः शाब्दबोधस्याप्रसिद्धेस्तत्कारणाप्रसिद्धिस्तथा च तादृशबोधापत्तिरपि नोपतिष्ठत इति।

उद्देश्यस्य प्रथमावगततया तस्यापूर्वबोध्यत्वरूपविधेयत्वासंभवेन विधेयतयोद्देश्यावगाहिशाव्दबोधो न संभवतीति प्राचीननैयायिका मन्वते। परन्तु घटत्वेन रूपेण घटे ज्ञातेऽपि घटो नीलघटो न वेति संदेहोदयः सर्वेषां मनसि भवत्येव। तत्र संशये सति नीलघटार्थिनस्तत्र प्रवृत्तिर्नभवेत् तत्र प्रवृत्तिसंपादनाय प्राक् संशयं छेत्तुं घटो नीलघट इति वक्तव्यं भवति ततः संशयनिवृत्त्या नीलघटार्थिनस्तत्र प्रवृत्तिर्जायते इत्यादितर्कमग्रे सारयित्वा विधेयकोटौ अधिकावगाहिशाव्दवोधो नव्यनैयायिकैः स्वीक्रियते। तदनुसारेण 'घटो नीलघट' इत्यस्मात् नीलघटप्रकारको घटविशेष्यकोभेदसंसर्गकश्शाव्दबोधः संभवति। अत एवालङ्कारिकैरपि **रविकिरणगृहीतानि भवन्ति कमलानि कमलानि**[२४] इत्यादिप्रयोगे कमलान्युद्दिश्य कमलत्वस्यैव विधाने अपूर्वबोध्यत्वाभावेन अन्वयबोधाभावरूपामसङ्गतिमभिलक्ष्य द्वितीयकमलपदे लक्षणावृत्तिमाश्रित्य सौरभातिशयविशिष्टकमलार्थो गृह्यते। तेन कमलेषु सौरभातिशयकमलत्वविहिते, अपूर्वबोध्यत्वसिद्धिस्तात्पर्योपपत्तिः शाव्दवोधसंगतिश्च सुष्ठु संपद्यन्ते।

एवं च घटो नीलघट इत्यस्य शाब्दवोधे **अधिकं प्रविष्टं न तद्धानिकरं** भवतीति सिद्धान्तादरेण यद्यपि तच्छाब्दवोधकुक्षौ घटप्रकारकघटविशेष्यकाभेदसंसर्गकशाब्दवोधः प्रसिद्धस्तत्प्रसिद्धफलवलेन घटो घट इत्यत्रापि अभेदवोधापत्तिराशङ्कितुं शक्यते, तथापि नीलपदसमभिव्याहारवलेन जायमानं शाब्दवोधैकदेशमादाय फलप्रसिद्ध्युपस्थापने दृष्टान्तवैकल्यं दृश्यते। शुद्धघटप्रकारकशुद्धघटविशेष्यकाभेदसंसर्गकशाब्दवोधस्य तु घटो नीलघट इत्यत्रापि सर्वथा अप्रसिद्धिरिति तदुदाहरणेन घटो घट इत्यत्र अभेदान्वयापत्तिर्दुरुपपादनीया उभयोः सामग्रीगतवैषम्यात्। अथापि विषयनिष्ठप्रत्यासत्तिमाश्रित्य 'द्रव्यं घट' इत्यादौ धर्मितावच्छेदकसंवन्धेन द्रव्यत्वे शुद्धघटप्रकारकाभेदसंसर्गकशाब्दवोधस्याभिलषितत्वात् तदाधारेण 'घटो घट' इत्यत्रापि घटत्वे तत्सवन्धेन तदापत्तिरित्युच्यते तर्हि **तद्धर्मान्यवृत्तिविषयतासंबन्धेन ज्ञानं प्रति तद्धर्मभेदत्वेन हेतुतेति**[२५] व्युत्पत्तिस्वीकारेण न्यायनये ऽभेदान्वयगताः

२२ व्युत्पत्तिवादः, प्रथमकारकम् पृ० ४०।
२३ पूर्ववत् पृ० ४०।
२४ ध्वन्यालोकः, द्वितीयोद्योतोद्धृतप्राकृतानुवादः पृ० ६२।
२५ पूर्ववत् पृ० ६२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वा आपत्तयोऽनुपपत्तयश्च समाधीयन्ते। यत्र स्वान्यस्थितविषयतासंबन्धेन ज्ञानं विवक्ष्यते तत्र स्वगतधर्मस्य स्वान्यपदार्थगतधर्मस्य च भेदः कारणमिति समग्रज्ञानगतकार्यकारणभावस्य निर्मितौ व्याप्यधर्मावच्छिन्ने कार्योत्पादने व्यापकधर्मावच्छिन्नकार्यस्य सामग्री आवश्यकीति नियमेन अभेदान्वयशाब्दबोधेऽपि विशेषणतावच्छेदका-दिविशेष्यतावच्छेदकादिधर्मयोर्भेदः कारणमिति व्युत्पत्तिस्वीकारे न क्वापि समस्येति।

एवं स्तोकं पचति, मृदु पचति इत्यादौ स्वसमानविभक्तिकत्वस्य स्वाव्यहितपूर्ववर्तित्वस्य च विरहेऽपि स्तोकमृदुपदार्थयोर्धात्वर्थपाकेऽभेदान्वयेन स्तोकाभिन्नपाकः, मृद्वभिन्नपाक इति बोधस्य सर्वानुभवसिद्धतया तादृशस्थलानुरोधेन **द्वितीयान्तपदधातुपदयोः समभिव्याहारस्याप्यभेदान्वयबोधौपयिकाङ्क्षात्वमुपगम्यते**[२६] इति व्युत्पत्त्यन्तरमाश्रीयते। अत्र द्वितीयान्तपदं क्रियाविशेषणीभूतमेव गृह्यते। तेन सुन्दरं लिखति, मधुरं गायति, मन्दं गच्छति, इत्यादिषु प्रयोगेषु क्रियाविशेषणीभूतपदार्थानां क्रियायामभेदान्वयेन सुन्दराभिन्नं लेखनम्, मधुराभिन्नं गानम्, मन्दाभिन्नं गमनमिति रीत्या शाब्दबोध उपपाद्यते। अत्रापि पाकं पचति इत्यादावभेदान्वयबोधव्यावृत्तये विशेषणतावच्छेदक विशेष्यतावच्छेदक धर्मयोर्भेदस्यावश्यकतापेक्ष्यत एव।

१-५- अभेदान्वयबोधे वैयाकरणव्युत्पत्तिः

'पक्ता देवदत्तः' इत्यादौ पचिक्रियाश्रयाभिन्नो देवदत्त इति पचन्तं देवदत्तं पश्य इत्यादौ च वर्तमानकालिकपाकक्रियाश्रयाभिन्नदेवदत्तकर्मकः प्रेरणाविषयीभूतस्त्वत्कर्तृको दर्शनानुकूलव्यापार इत्यादिशाब्दबोधानुरोधेन **विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिः**[२७] इति सामान्यतो ऽभेदान्वयप्रयोजिका व्युत्पत्तिर्वैयाकरणैरङ्गीकृता। समासस्थले, अजहत्स्वार्थावृत्तिपक्षमभिलक्ष्य एकयैव व्युत्पत्त्या नीलोत्पलमित्यादिसमस्तपदगतबोधसंग्रहार्थं विरुद्धविभक्तिरहितत्वमिति। एवं सत्यपि चैत्रस्य सुतस्य धनम् इत्यत्र चैत्रसुतपदयोर्विरुद्धविभक्तिरहितप्रातिपदिकार्थतया तयोर्मिथोऽभेदान्वयबोधस्यातिप्रसक्तिरापद्यते। तन्निवारणार्थं यत्र सार्थकविभक्तिरहितं यद् विशेषणवाचकपदं तत्र विरुद्धविभक्तिरहितयोः प्रातिपदिकार्थयोरभेदान्वय इति परिष्कारे प्रकृते विषेशणीभूतचैत्रपदोत्तरस्थायाः षष्ठ्या जन्यजनकभावरूपसंबन्धार्थतया नातिव्याप्तिः। परन्तु वेदाः प्रमाणमित्यादिप्रयोगे प्रमाणरूपविशेषणोत्तरविभक्तेरेकत्वसंख्यार्थस्य विवक्षितत्वात् तत्संग्राहार्थं संख्याव्यतिरिक्त-सार्थकविभक्तिरहितविशेषणवाचकपदं यत्र तत्रैव विरुद्धविभक्तिरहितनामार्थयोरभेद इत्यर्थो विवक्षणीयः।

वैयाकरणनये आख्यातस्य कर्तृकर्मणोरपि वाचकतया देवदत्तः पचति इत्यादौ देवदत्तरूपप्रातिपदिकार्थस्य तिप्प्रत्ययार्थरूपकर्त्रा सहाभेदान्वयेन देवदत्ताभिन्नैककर्तृको वर्त्तमानकालिको विक्लित्यनुकूलव्यापार इत्यर्थोऽवगम्यते। द्रोणो व्रीहिरित्यत्र भट्टोजिदीक्षितमते द्रोणशब्दात् प्रातिपदिकार्थे प्रथमादाने द्रोणपदार्थस्य व्रीहिपदार्थस्य च प्रातिपदिकार्थतया व्रीहौ द्रोणस्याभेदान्वयापत्तिः परिच्छेद्यपरिच्छेदकभावेनान्वयानुपपत्तिश्च स्याताम्। अतस्तत्र द्रोणत्वेन परिमाणविशेषवाचकाद् द्रोणशब्दात् परिमाणसामान्यार्थे प्रथमायां जातायां सामान्यविशेषयोरभेदान्वय इति सिद्धान्ताद् द्रोणरूपपरिमाणविशेषाभिन्नं यत्सामान्यपरिमाणं तत्परिच्छिन्नो व्रीहिरित्यभीष्टार्थ उपपाद्यते। तदुक्तम्- **परिमाणमात्रे द्रोणो व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणं प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति**[२८]।

एवं 'सोमेन यजेत' इति वेदवाक्ये मिथः सुप्तिङ्रूपविभक्तितया विरुद्धविभक्तिराहित्यस्य विरहेऽपि तत्राभीष्टार्थसंगत्यर्थं सोमपदस्य मत्वर्थलक्षणया सोमवता यागेन इष्टं भावयेत् अर्थात् सोमवदभिन्नयागकरणिका इष्टजनिका भावना इति शाब्दबोधो

२६ व्युत्पत्तिवादः, प्रथमकारकम् पृ० ३१।

२७ वैयाकरणभूषणसारः, समासशक्तिनिर्णयः पृ० २५७।

२८ वैयाकरणसिद्धान्तकौमुदी, कारकप्रकरणम्, पृ० १३१।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मीमांसकैरपि स्वीक्रियते। स्तोकं पचति इत्यादिक्रियाविशेषणस्थले स्तोकाभिन्नविक्लित्यनुकूलो वर्तमानकालिको व्यापार इति शाब्दबोधो वैयाकरणैरभ्युपगम्यते। तथा च अग्निर्देवता अस्य हविषः इति विग्रहे **सास्य देवता**[२९] इति सूत्रार्थाधिकारे **अग्नेर्ढक्**[३०] इति सूत्रेण ढक्प्रत्यये विहिते आग्नेयं हविरिति प्रयोगः संपद्यते। तत्र देवताविशिष्टं देयं प्रत्ययार्थः प्रत्ययार्थस्यैकदेशे देवतार्थे प्रकृत्यर्थाग्निपदार्थस्याभेदान्वयस्तेन अग्न्यभिन्नदेवताविशिष्टदेयाभिन्नं हविरिति शाब्दबोधस्तत्रापेक्षितः। यदि चात्र प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थान्वयकरणे पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन इति व्युत्पत्तिविरोध आशङ्क्यते तर्हि एकवृन्तगतफलद्वयन्यायेन प्रत्ययस्य देवतायां देये च पृथक् पृथक् शक्तिस्वीकारेण अग्नेर्देवतापदार्थेऽभेदेन देवतायाश्च देयपदार्थे स्वस्वामिभावसम्बन्धेन देयस्य च हविषि अभेदेनान्वयः क्रियते तथा च अग्न्यभिन्नदेवतासंबन्धिदेयाभिन्नं हविरिति सर्वाभिमतो बोधः सुकरं संपद्यते।

तदुक्तम्-

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् ॥
अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः।
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥[३१]

उपर्युक्तेषु स्थलेषु विरुद्धविभक्तिरहितप्रातिपदिकार्थत्वाभावेऽपि अभेदान्वयबोधोपपत्तेस्तदनुरोधेन **भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्यानेकस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति**[३२] व्युत्पत्त्यङ्गीकारे सर्वत्रैव निर्वाहः। तदुक्तम्- **सामानाधिकरण्यं चैकधर्मिबोधकत्वमेव। अभेदान्वय इत्यस्याभेदेऽप्यन्वयो विशेषणविशेष्य भाव इत्येवार्थो न त्वभेदसंसर्गको बोध इति**[३३]।

इत्थं च भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्यानेकस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति व्युत्पत्त्या वैयाकरणा अभेदात्मकं बोधमुपपादयितुं कामयन्ते। तथाहि- कृष्णः तिल इत्यादौ गुणवाचककृष्णशब्दाद् विहितमतुपो लुक्करणेन प्रकृते प्रयुक्तकृष्णशब्दो गुणिवाचकोऽभिप्रेतः। कृष्णगुणाश्रितानि घटपटतिलादीनि द्रव्याण्यनियतानि तत्र घटत्वपटत्वादिजातेश्चानियतत्वं परं कृष्णत्वरूपकृष्णगुणस्य नियतत्वं तेन कृष्णगुणप्रवृत्तिनिमित्तं कृष्णे। तिले पुनः शुक्लकृष्णादिगुणा अनियताः तिलत्वजातिस्तु नियता। अतः सैव जातिस्तत्प्रवृत्तिनिमित्तमिति कृष्णशब्दस्य प्रवृत्तिनिमित्तं कृष्णत्वं तिलशब्दस्य प्रवृत्तिनिमित्तञ्च तिलत्वं भिन्नप्रवृत्तिनिमित्तयोः कृष्णतिलशब्दयोः परस्पराभिसंबन्धाद् एकार्थवाचकता अभ्युपगम्यते। तिलशब्दसान्निध्यवशात् कृष्णपटकृष्णघटादिसकलकृष्णगुणाश्रयद्रव्यस्य वाचकतां विहाय तिलरूपे कृष्णे नियम्यते कृष्णशब्दः। तिलशब्दोऽपि कृष्णशब्दसान्निध्यवशात् शुक्लहरितादिसकलतिलजातीयानां वाचकतां विहाय कृष्णरूपे तिले पर्यवस्यति। एतावता पृथक्-पृथग्रूपेणावस्थितौ कृष्णतिलशब्दौ सामान्यार्थवाचकौ मिलितोपस्थितौ तु विशेषार्थे व्यवस्थितौ भवतः। तेन कृष्णतिलोभयशब्दयोरेकार्थवृत्तित्वं संघटते एवं परस्परमभेदात्मको बोध इष्यते। तदुक्तं महाभाष्ये- **कृष्णशब्दस्तिलशब्देनाभिसम्बध्यमानो विशेषवचनः सम्पद्यते। तथा तिलशब्दः कृष्णशब्देनाभिसंबध्यमानो विशेषवचनः संपद्यते**[३४]। इति एवं तदेवं संबन्धः समर्थितः। स चात्र सामानाधिकरण्यस्वभावः। तस्यार्थैक्ये

२९ पाणिनीयसूत्रम् ४। २। २४।
३० पाणिनीयसूत्रम् ४। २। ३३।
३१ वैयाकरणभूषणसारः, देवताप्रत्ययार्थनिर्णयः श्लो० ५२-५३।
३२ 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इति पाणिनीयसूत्रभाष्यस्थप्रदीपः, पृ० ३७ द्वितीयभागः।
३३ वैयाकरणसिद्धान्तलघुमञ्जूषा, सुवर्थविचारः पृ० ११८२।
३४ विशेषणं विशेष्येण बहुलम् इति पा०सू०भाष्यम्, पृ० ३९९ द्वितीयभागः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदभावात्[३५]। सामानाधिकरण्यमूलको विशेष्यविशेषणभावसंवन्धः तादृशसंवन्धस्थलेऽर्थयोरैक्यं भवति तदभावात् - अर्थभेदाभावादिति तदाशयः। अनेन समानाधिकरणयोरर्थयोरभेदवोधो विज्ञायते।

एवं वैयाकरणनये सादृश्यमभेदेऽपि स्वीक्रियते। तत्र भेदघटिते एव सादृश्याङ्गीकारे तुल्यस्थानप्रयत्नयोः सतोर्विधीयमाना सवर्णसंज्ञा कखादीनां स्वस्ववर्गस्थवर्णानां मिथोऽपि सवर्णसंज्ञाया अनुपपत्तिः तेषां स्थानप्रयत्नैक्येन भेदघटितस्थानप्रयत्नदौर्लभ्यात्। अत एव **नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिरिति**[३६] परिभाषाया-मन्यपदोपादानस्य सार्थक्यं दृश्यते। भेदघटितस्यैव सादृश्ये तु सदृशपदेनैव भेदार्थलाभात् तत्रान्यपदस्य वैयर्थ्यं सिद्ध्येत। तेन **गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव॥** इत्यादिप्रयोगः सुसंगच्छते। निपातानामपि स्वसमभिव्याहृतपदशक्त्युद्बोधकत्वरूपद्योतकतया चन्द्र इव मुखमित्यत्र चन्द्रपदस्य चन्द्रसादृश्याश्रयपदार्थे अप्रसिद्धा शक्तिः समाद्रियते। तथा च चन्द्रसदृशाभिन्नं मुखमिति शाब्दवोधः।

राजपुरुष इत्यादिसमासवृत्तौ राज्ञः राज्ञोः राज्ञां वा पुरुष इति जिज्ञासाया जागरूकतया प्रायो वृत्त्यर्थे विग्रहवाक्ये राज्ञः पुरुषः, पुत्रमिच्छति, कुम्भं करोतीत्याद्येकवचनान्तस्यैव प्रदर्शनेन संख्यान्तरस्य भाने वाधा स्यात्। वृत्त्यर्हविग्रहवाक्यान्तःपात्येकत्वसंख्या संख्यासामान्यार्थिका न तु संख्याविशेषार्थवोधिका। यथा सर्वौषधिरसा एकस्मिन् मधुन्याहिताः सन्तो मिथोऽविरोधेन तिष्ठन्ति तद्वद् वृत्तौ स्वविरुद्धसंख्यावोधाप्रतिवन्धिकाया अभेदैकत्वसंख्याया भानं भवति।

तदुक्तम्- **अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः।**[३७]
यथौषधिरसाः सर्वे मधुन्याहितशक्तयः।
अविभागेन वर्त्तन्ते संख्यां तां तादृशीं विदुः॥[३८] इति

सामान्यतो वृत्तौ खलु साधुत्वार्थमेकवचनान्तपातिविग्रहो विधीयते, प्रकरणादिना यदा द्वित्ववहुत्वाद्यर्थोविवक्षितो भवति तदा तत्संख्यावगतौ वाधा न भवति अजहत्स्वार्थायां वृत्तावेव। जहत्स्वार्थायां वृत्तौ तु तादृशविचारणैव नोदेति तत्रावयवार्थासंभवादिति।

१-६- उपसंहारः

नैयायिकनये आकाङ्क्षाभास्यस्थले प्रत्ययार्थेन सहाभेदान्वयबोधानभिमतत्वदर्शनात् प्रातिपदिकार्थयोर्मिथः प्रतिपदिकार्थधात्वर्थयोर्मिथ एवाभेदान्वयवोध इष्यते। तन्मते निपातस्यापि सार्थकतया निपातार्थरूपप्रातिपदिकार्थस्य तदन्यप्रातिपदिकार्थेन धात्वर्थेन च सममभेदान्वयवोधो नेष्टः। तेन निपातातिरिक्तप्रातिपदिकार्थयोः क्रियानिपातार्थ-प्रतिपदिकार्थयोश्च मिथः साक्षाद् भेदेनान्वयोऽव्युत्पन्न इति निष्कृष्याभिहितं वर्तते। तार्किकमते उपरि चर्चितानुसारेण तिस्रो व्युत्पत्तयोऽभेदान्वयबोधप्रयोजिका उपलभ्यन्ते–

१- **प्रातिपदिकार्थे स्वसमानविभक्तिकपदेनोपस्थापितस्य स्वविरुद्धधर्मान्वितपदार्थस्याभेदान्वयबोधः,**
२- **प्रातिपदिकार्थे स्वाव्यहितपूर्ववर्तिपदोपस्थापितस्य स्वविरुद्धधर्मान्वितपदार्थस्याभेदान्वयबोधः,**
३- **धात्वर्थे द्वितीयान्तपदोपस्थापितस्य स्वविरुद्धधर्मान्वितक्रियाविशेषणीभूतपदार्थस्याभेदान्वयबोध इति च।**

---

३५ वाक्यपदीयम् वृत्तिसमुद्देशःश्लो० ११, हेलाराजविरचितप्रकाशव्याख्या, पृ० १७।
३६ परिभाषेन्दुशेखरः, पृ० २९६।
३७ वैयाकरणभूषणसारः, अभेदैकत्वसंख्यानिर्णयः श्लो० ५६।
३८ वाक्यपदीयम् वृत्तिसमुद्देशः श्लो० १००।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नैयायिकमते दृष्टास्वमूषु व्युपत्तिषु सतीष्वपि स्तोकश्वासौ अग्निरिति विग्रहे गृष्टिः-सकृत्प्रसूता चासौ गौरिति विग्रहे च अग्निस्तोकः, गोगृष्टिरित्यादिविशेषणोत्तरपदघटितस्थले स्तोकाभिन्नोऽग्निः, गृष्ट्यभिन्ना गौः, इत्यपेक्षिताभेदान्वयबोधलाभार्थं ता व्युत्पत्तयोऽपर्याप्ता दृश्यन्ते। तदर्थं प्रातिपदिकार्थे स्वोत्तरवर्त्तिपदोपस्थापितस्य स्वविरुद्धधर्मान्वितपदार्थस्याप्यभेदान्वयबोध इत्यपि योजनीयं भवति।

अथापि **'तत् त्वमसि'**[३९] इति महावाक्ये तदिति पदवाच्यं सर्वज्ञत्वादिविशिष्टचैतन्यं त्वमिति पदवाच्यमल्पज्ञत्वादिविशिष्टचैतन्यमिति सर्वज्ञत्वाल्पज्ञत्वादिधर्मभेदस्याप्युपलब्धेरुभयत्र प्रथमया स्वसमानविभक्तिकत्वमपि सिद्धमेव तेन तदभिन्नस्त्वमसि इति अभेदबोधो व्युत्पत्त्या न बाध्यते। परन्तु नैयायिकैश्वरमसिद्धान्ते जीवेश्वरयोरभेदो नाद्रियते स्वव्युत्पत्त्यनुसारेण स्वविरुद्धसिद्धान्तापातो नैयायिकानां दरीदृश्यत एव।

अभेदस्य संबन्धत्वानङ्गीकारेऽपि अविद्यमानो भेदो विशेष्यविशेषणभावव्यतिरिक्तो यत्रेति व्युत्पत्त्या समानाधिकरणस्थविशेष्यविशेषणभावे अभेदशब्दस्य व्यवहारो नव्यवैयाकरणैरभिप्रेतो विज्ञायते। तत्रैवाभेदान्वयबोधश्च सर्वैः शाब्दिकमूर्धन्यैः क्रोडीकृतो विद्यते। उपर्युक्तविवेचनद्वारा प्रातिपदिकार्थयोर्मिथः क्वचित् प्रातिपदिकधात्वर्थयोर्मिथः क्वचित् प्रकृत्यर्थप्रत्ययार्थयोर्मिथः कुत्रचिच्च प्रातिपदिकार्थप्रत्ययार्थयोर्मिथो ऽपि अभेदान्वयबोधो वैयाकरणमते विलोक्यते। तदनुसारेण सामान्यतो द्वे व्युत्पत्ती प्रमीयेते-

१- **विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयबोधः,**

२- **भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्यानेकस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् तच्चाभेदान्वयबोधप्रयोजकम्।**

अनयोः परीक्षणेन द्वितीया एकैव व्युत्पत्तिरुपयुक्ता सिद्धान्तरूपेण सुनिश्चितास्ति। तत्र पदयोः समानविभक्त्यन्तत्वरूपसामानाधिकरण्यस्वीकृतौ तु द्रोणो व्रीहिः, देवदत्तः पचति, चैत्रस्य सुतस्य धनमित्यादिषु दोषः प्रसज्यते। अतोऽर्थसामानाधिकरण्यमपेक्षितं तत्रार्थे धर्मभेदेऽपि धर्म्यैक्ये सुलभे, अभेदबोधो वैयाकरणाभिमतस्तेन तत्त्वमस्यादिवाक्येऽपि अभेदप्रतीतौ वैयाकरणानां बाधा न दृश्यते। परमार्थतः सर्वत्रैव वाक्ये प्राक् विच्छिन्नपदेभ्यो विच्छिन्नपदार्थबुद्ध्यनन्तरं तैः पदार्थैरभिव्यञ्जिता, स्वसंवेदनरूपा, परेषामसमाख्येया अखण्डबुद्ध्यात्मिका प्रतिभा समुदेति सैव वाक्यार्थ इति वैयाकरणानां चरमसिद्धान्तात् प्रकृतवाक्यात्तथा बोधे स्वसिद्धान्तहानिरपि नापद्यते।

एतावता अभेदान्वबोधव्युत्पत्तिविचारप्रसङ्गे नैयायिकमते प्रत्ययार्थेन साकमितरपदार्थस्याभेदान्वयबोधासंभवात् क्षेत्रगतसंकुचितत्वं, व्युत्पत्तिगतबाहुल्यं, परं व्युत्पत्तौ स्वसिद्धान्तानुसारेणातिव्याप्तिग्रस्तत्वञ्च दृग्गोचरीभवन्ति। तदपेक्षया वैयाकरणसरणिरेव व्यापकतरा, स्वल्पतरा, निर्दुष्टतरा च संलक्ष्यते।

सन्दर्भग्रन्थाः

१- आचार्यः, आनन्दवर्धनः, **ध्वन्यालोकः**, अभिनवगुप्तविरचितलोचनव्याख्यायुतः, (संशोधकः, वासुदेवशर्मा), मुम्बई, निर्णयसागरमुद्रणालयः, ई०सं० १९२८।

२- आचार्यः, हेमचन्द्रः, **प्रमाणमीमांसा** स्वोपज्ञवृत्तिसहिता, (संपादकः, पण्डितसुखलालजी संघवी), अहमदावाद-कलकत्ता, संचालक-सिंघी जैन ग्रन्थमालाप्रकाशनम्। वि०सं० १९९५।

३- कालिदासः, **अभिज्ञानशाकुन्तलम्**, संस्कृतहिन्दी-व्याख्यासहितम्, (व्याख्याता, सुबोधचन्द्रपन्तः), मोतीलालबनारसीदास-दिल्लीप्रकाशनम् ई०स० १९८८।

४- **छान्दोग्योपनिषद्**, शांकरभाष्य-हिन्द्यनुवादसहिता, प्रकाशकः, गोविन्दभवनकार्यालयः, गीताप्रेसगोरखपुरम्। संवत् २०५२।

---

३९ छान्दोग्योपनिषद्, षष्ठोऽध्यायः, अष्टमखण्डः, मन्त्रः ७।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५- झा, धर्मदत्तः, व्युत्पत्तिवादस्य **गूढार्थतत्त्वालोकव्याख्या**, (संपादकः कीर्त्यानन्दझा), वाराणसी, चौखम्बाअमरभारतीप्रकाशनम्। वि० स० २०३३।
६- त्रिपाठी, डा रामप्रसादः, **पाणिनीयव्याकरणे प्रमाणसमीक्षा**, वाराणसी सरस्वतीभवन-अध्ययनमाला, ई सं १९७२।
७- पण्डितः, श्रीचन्द्रधरशर्मा संपादकः, **शतपथब्राह्मणम्**। काशी अच्युतग्रन्थमालाकार्यालयः, संवत् १९९४।
८- पतञ्जलिः, **व्याकरणमहाभाष्यम्** (संशोधकः, जोशी, भार्गवः शास्त्री), चौखम्वासंस्कृतप्रतिष्ठानम्, दिल्ली, ई सं १९९१।
९- पण्डितराजः, डा गोपालशास्त्री दर्शनकेशरी परिष्कारकः, **पाणिन्यष्टाध्यायी पदच्छेद-वृत्ति-वार्त्तिक-टिप्पणीसहिता** (सम्पादकः प्रो गोपालदत्तपाण्डेयः), वाराणसी, चौखम्वासुरभारतीप्रकाशनम्। तृ०सं० ई सं १९८७।
१०- भट्टः, अन्नम्, **तर्कसंग्रहः न्यायबोधिनी-पदकृत्य-दीपिका-किरणावलीव्याख्याचतुष्टयोपेतः**, (व्याख्यकाराः, गोवर्धनसुधीः, चन्द्रजसिंहः, अन्नंभट्टः, श्रीकृष्णवल्लभाचार्यः), वाराणसी, व्यासप्रकाशनम्। तृतीयसंस्करणम्।
११- भट्टाचार्यः, गदाधरः, व्युत्पत्तिवादः, व्याख्यासहितः, (व्याख्याता सुदर्शनाचार्यः), वाराणसी, वाणीविलासप्रकाशनम्। वि०सं० २०४१।
१२- भट्टोजिदीक्षितः, सिद्धान्तकौमुदी तत्त्ववोधिनीसमाख्यव्याख्यासंवलिता, (व्याख्याकारः ज्ञानेन्द्रसरस्वती), चौखम्वासंस्कृत-प्रतिष्ठानम्, दिल्ली, ई सं १९८५।
१३- भट्टोजिदीक्षितः, **प्रौढमनोरमा हरिदीक्षितविरचितशब्दरत्नसहिता**, (संपादकःसदाशिवशास्त्री), वाराणसी, चौखम्वा-अमरभारतीप्रकाशनम्। वि०स० २०३९।
१४- भट्टः, कौण्डः, **वैयाकरणभूषणसारः**, दर्पणव्याख्यासंवलितः, (व्याख्याता श्रीहरिवल्लभः), तथा सुबोधिनीहिन्दीव्याख्योपेतः, (व्याख्याकारः, डा चन्द्रिकाप्रसादद्विवेदी), दिल्ली, चौखम्वासंस्कृतप्रतिष्ठानम्, ई सं २००१।
१५- भट्टः, कुमारिलः, **श्लोकवार्त्तिकम्**, न्यायरत्नाकरव्याख्यया सनाथम्, (व्याख्याकारः पार्थसारथिमिश्रः), (सम्पादक एवं परिष्कारकश्च डा गङ्गासागरराय), वाराणसी, रत्नापब्लिकेशन, ई सं १९९३।
१६- भट्टः, नागेशः, **वैयाकरणसिद्धान्तलघुमञ्जूषा** (संपादकः त्रिपाठी, आचार्यश्रीरामप्रसादः), वाराणसी, सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, ई सं १९९०।
१७- भट्टः, नागेशः, **वैयाकरणसिद्धान्तपरमलघुमञ्जूषा**, किरणावलिसंस्कृतव्याख्योपेतहिन्द्यनुवादसहिता, (व्याख्याकारः लोकमणिदाहालः), वाराणसी, चौखम्वासुरभारतीप्रकाशनम्, ई, सं,, १९९१।
१८- भट्टः, नागेशः,, **परिभाषेन्दुशेखरः**, तात्त्याशास्त्रिविरचितभूतितिलकसहिततत्त्वप्रकाशिकाव्याख्यासमलङ्कृतः, (व्याख्याता गणपतिशास्त्री), (संपादकः गोविन्दशर्मा) वाराणसी, दुर्गाघाट- राजराजेश्वरीप्रेस-पुस्तकालयः, वि०स० २०३९।
१९- भट्टाचार्यः, श्रीविश्वनाथपञ्चाननः, **कारिकावली-न्यायसिद्धान्तमुक्तावली**, किरणावलीसमाख्यव्याख्योपेता (व्याख्याकारः पंश्रीकृष्णवल्लभाचार्यः), वाराणसी, चौखम्भासंस्कृतसंस्थानम्, ई सं १९९५।
२०- भर्तृहरिः, **वाक्यपदीयम्**, हेलाराजव्याख्यायुतम्। अम्वाकर्त्रीव्याख्यया च सहितम्। व्याख्याकारः संपादकश्चः, शर्मा, पण्डितरघुनाथः, पद्मश्रीः), वाराणसी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वि सं २०४५।
२१- महर्षिः, गौतमः, **न्यायदर्शनम्** वात्स्यायनभाष्यसहितम्। (सम्पादकः नारायणमिश्रः), वाराणसी, चौखम्भासंस्कृतसंस्थानम्, (तृतीयसं) वि सं २०३९।
२२- मिश्रः, डा सच्चिदानन्दः, **सुनन्दाख्यव्युत्पत्तिवादहिन्दीटीका**, वाराणसी, भारतीयविद्याप्रकाशनम्। वि०सं० २०५८।
२३- मिश्रः, पार्थसारथिः, **शास्त्रदीपिका**, (सम्पादक एवं हिन्दीटीकाकारः डाकशोरदासस्वामी), वाराणसी, श्रीसाधुबेलासंस्कृत-महाविद्यालयः, ई सं १९७७।
२४- शंकराचार्यः, **विवेकचूडामणिः**, नेपालीभाषानुवादसहितः, अनुवादकः, शम्भुप्रसादप्याकुरेलः, भक्तगणटङ्गालगहनापोखरी काठमाण्डौ वि०सं० २०५१।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रूपकभेदानुशीलनम्

डा. भीमप्रसादः खतिवडा

सहप्राध्यापकः

१. प्रारम्भः

संस्कृतवाङ्मये स्ववैशिष्टयविशिष्टभूतायां नाटयशास्त्रीयायां परम्परायां प्रथमं रूपकाणि रूपकवर्गे उपरूपकवर्गे च द्विधा विभक्तानि दृश्यन्ते । तत्र रूपकवर्गे नाटक-प्रकरण-भाण-व्यायोग-समवकार-डिमेहामृगाङ्कवीथि-प्रहसनरूपत्वेन दश गण्यन्ते । अत्र नाटयभेदानुशीलनपूर्वकं रूपकाणामुपरूपकाणाञ्च स्वरूपं प्रदर्श्यते

२. रूपकनाटकयोः सम्बन्धः

अजन्तानटपदान्निष्पन्नस्य नाटयस्य नटनमर्थः । अवस्थाया अनुकृतिर्नाटयमुच्यते ।[१] आङ्गिकादिभिरभिनयैर्नटैर्विधीयतेऽवस्थानुकृतिः । अनुकृतिर्नामानुकरणम्, यत्रानुकर्तृभिर्नटादिभिरनुकार्याणां रामादीनाम-भेदप्रतित्त्या अभिनीयते, तदेव नाटयमिति ।[२] आङ्गलभाषायां यदर्थे ड्रामा (Drama) इति शब्द उपयुज्यते, संस्कृतसाहित्ये तस्मिन्नेवार्थे रूपकमिति शब्दः प्रयुज्यते । यद्यपि वर्तमानसमये प्रायः 'ड्रामा' इत्यर्थेन नाटकं वुध्यते, परं पौरस्त्यनाटयसिद्धान्तस्य परिशीलनेन ज्ञायते यन्नाटकं नाम रूपकाणामेको विभेद एव । संस्कृतसाहित्यपरम्परायां सर्वप्रथमं नाटयशास्त्रकारेण भरतेन रूपकाणां समीक्षणं विहितम् ।

नाटयं दृश्यत्वात् चक्षुरिन्द्रियग्राह्यत्वाद् वा 'रूपम्' उच्यते, रूपस्यारोपत्वाद्रूपकमिति ।[३] नाटयदर्पणकारेणापि रूपितेन कारणेन नाटकादीनि रूपत्वेन रूपकत्वेन वा व्यवह्रियन्त इत्युक्तम् । नाटयस्य कृते भरताचार्येण नाटयशास्त्रे रूपस्य प्रयोगो विहितः । दशरूपककारः नाटयं रूपकनाम्ना सम्वोधयति । अनेन रूप-रूपक-नाटयशव्दाः पर्यायत्वेन ज्ञेया इति मन्ये ।

१. 'अवस्थानुकृर्तिनाटयम् ।' **दशरूपके**, १:७ (सावलोकम्) वाराणसी, चौखम्वा विद्याभवन, षष्ठ-सं., ई. १९७९१:७ ।

२. 'Drama is the reproduction of certain situation so as to induce in the spectators a sense of identification with he here and other characters by the way the actors render them.' – डा. एस.एन. शास्त्री, The laws and practice of sanskrit Drama, varanasi, Chaukhamba Publication, 1961, पृ. १ ।

३. 'रूपकं तत्समारोपात्', **दशरूपके.**, १:७, 'नटे रामाद्यवस्थारोपेण वर्तमानत्वाद्रूपकं, मुखचन्द्रादिवत्-'. तत्रैवावलोकवृत्तौ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. रूपकभेदविमर्शः

अभिनयप्रधानभूतानां रूपकाणां कृते रूपकाभिधानेन, नृत्यप्रधानानाञ्च रूपकाणां कृते उपरूपकाभिधानेन नृत्यरूपकाभिधानेन वा व्यवहारः क्रियते (द्विवेदी : पृ. २९१) । नाट्यशास्त्रपरम्परायां रूपकाणां संख्याविषये आचार्याणां विभिन्नानि मतानि दृश्यन्ते । नाट्याचार्येण भरतेन दशसंख्यकानां रूपकाणां चर्चा विहिता । नाटक-प्रकरण-भाण-व्यायोग-समवकार-वीथी-प्रहसन-डिमेहामृगाङ्काख्यानां दशरूपकाणामुल्लेखनं विधाय पुनर्नाटकप्रकरणयोर्मिश्रणेन संकीर्णा 'नाटी' अपि एकादशभेदत्वेनोक्ता । एषैव नाटी पश्चाद्वर्तिभिराचार्यैर्नाटिका उक्ता नाटी एव नाटिका स्वार्थे कनि तत्सिद्धिः ।

अग्निपुराणे सप्तविंशतिसंख्यकानां रूपकाणां चर्चा दृश्यते । विष्णुधर्मोत्तरपुराणे, शृङ्गारप्रकाशे च द्वादशसंख्यकानि रूपकाणि निर्दिष्टानि । नाटिका प्रकरणी च तत्र रूपकत्वेनैव स्वीकृते । नाट्यदर्पणकारेणापि पूर्वोक्तयोर्द्वयोः संयोजनेन द्वादशसंख्यकानां रूपकाणामवस्थितिः स्वीकृता । स त्वन्यान्यपि रूपकाणि सम्भावयति ।[४] रूपकाणां सन्दर्भे धनञ्जयेनापि दशरूपके भरतसरण्या एव दशरूपकाणामस्तित्वं स्वीकृतम् । प्रसङ्गात्तत्र नाटकप्रकरणयोः संकीर्णत्वेन नाटिकायाः सङ्केतो दृश्यते ।

प्रतापरुद्रीयस्य कर्ता विद्यानाथोऽपि रूपकभेदकत्वेन पूर्वोक्तानां वस्तुनेतृरसानां भूमिकां समर्थयति । अनेन दशरूपकविकल्पने प्रमुख आधारो वस्तुनेतृरसानां संस्थितिरिति सम्पूर्णानामप्याचार्यणां सम्मतिर्दृश्यते ।

प्रस्तुतेनैतेन विमर्शेन निर्विवादतया रूपकसंख्यापरिगणने आधारशिला सम्प्राप्ता । यतो हि संस्कृतनाट्यसाहित्ये दशसंख्यकानि रूपकाणि भवन्तीति-

'नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥' (सा.द., ६:३)

पूर्वविमष्टानां निर्णीतानाञ्च दशसंख्यकानां रूपकाणामाख्यानात्मक-सामाजिकयोर्भेदेन समीक्षकैराधुनिकैःपुनर्द्विधा विभागः कृतो दृश्यते । तेषां दृष्ट्या प्रथमे वर्गे नाटक-समवकार-डिम-व्यायोगेहामृगाङ्कानां सन्निवेशो भवति, पुनर्द्वितीये च वर्गे प्रकरण-भाण-प्रहसन-वीथीनां रूपकाणां सन्निवेशनं भवति ।

अत्र तेषां धारणास्ति यत् परम्परागतानां लोकविश्रुतानां कथानां पात्राणाञ्च योजना विधीयते प्रथमवर्ग्येषु रूपकेषु पुनर्द्वितीयवर्ग्येषु रूपकेषु तु समकालिकस्य सामाजिकस्य जीवनस्य रोचकं चित्राङ्कनं विधीयते । एतेष्वाख्यानात्मकेषु रूपकेषु प्रायो वीरकाव्यानां कथाः, पौराणिकाख्यानानि, लोकप्रचलिताश्च कथा वर्ण्यन्ते ।

३.१ नाटकम्

अवस्यन्दनेऽर्थे 'नट्' धातोर्ण्वुल् प्रत्यये अकादेशे च नाटकशब्दव्युत्पत्तिः । अवस्यन्दनस्य व्युत्पत्तिजन्यार्थो नाट्यमिति । पाणिनेः व्याकरणानुसारेण अजन्तान्नटशबदात् ष्यञिनाट्यं व्युत्पाद्यते । नाटकमिति नाटयति विचित्रं रञ्जनाप्रवेशेन सभ्यानां हृदयं नर्तयतीति नाटकम् ।

---

४. **नाट्यदर्पणे**, दिल्ली, परिमल पब्लिकेशन, ई. १९८६, १:३-४ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पौरस्त्यसाहित्यसिद्धान्तस्यादिपुरुषेण नाटचशास्त्रकारेणाचार्येण भरतेनोक्तं यन्नाटकं नाम राजर्षीणां देवानाञ्च लोकप्रियासु कथास्वाधारितं तादृशं सर्जनमस्ति यत्र धीरोदात्तः नायको भवति तदीयस्योन्न-तिर्विलासादयश्च प्रदर्श्यन्ते, पुनर्यत्र अङ्कस्य प्रवेशकस्य च व्यवस्था भवति । संस्कृतनाटकपरम्परायां नाटकं नाटचमपि उच्यते पुनर्नाटकरूपेणैव परिभाषितं दृश्यते । आचार्यो धनञ्जयः नाटचं रसाश्रितं भवतीति धारणां प्रस्तौति[५] । नन्दिकेश्वरः पूर्वाचार्यैर्नाटच-नृत्त-नृत्यादयः नटनभेदत्वेन स्वीकृतमित्युक्त्वा नाटचं पूजनीयासु पूर्वकथास्वाधारितं नाटकमस्तीति धारणां प्रकाशयति । नाटचदर्पणकारेण नाटचस्योत्पत्ति र्नट्धातोर्जातमित्युक्तं परं नट्धातुः 'नृत्' धातोः प्राकृतं रूपमस्ति, नट्धातोस्तुलनायां 'नृत्' इत्यस्य प्राचीनता दृश्यते, द्वयोः ऋग्वैदिककालादेव प्रचलनमस्ति, निरपेक्षरूपेण द्वयोरेव प्रयोग-परम्पराप्यविच्छिन्ना इति समीक्षकैश्चर्चा विहिता दृश्यते ।

नाटचसन्दर्भे संस्कृतनाटचग्रन्थेषु नृत्त-नृत्य-नाटचानां शब्दानां समीक्षणं विहितमाप्यते । नृत्तं नाम प्रकृत्या भावरहितमनुकरणं पुनर्नृत्यं भावाभिनययुतमनुकरणं, नाटचन्तु द्वाभ्यां संपुष्टमाख्यानात्मकं रसभावात्मकञ्चाभिनययुतमनुकरणमस्तीति[६] धनञ्जय-धनिक-नन्दिकेश्वरमुख्यैराचार्यैरभिव्यक्तम् ।

नाटकस्याभिधानमन्वर्थकं भवतीत्यभिनवगुप्तपादाचार्येणोक्तं यत् सहृदयहृदयरञ्जनोल्लासेन नर्तयति इति नाटकम् । नाटकदर्शनेन सहृदयाणां कृते आन्तरिकी वाह्या च सन्तुष्टिर्जायत इति । दृश्यकाव्यभेदरूपेण 'नट्'धातोर्णिचि, ण्वुलि च नाटकमिति नपुंसके निष्पत्तिः । पञ्चसन्धियुक्तं पुरुषार्थचतुष्टयकेन्द्रितं समृद्धिविलासादिभिरनुप्राणितं राजर्षिचरितयुतं पौराणिकमैतिहासिकं प्रख्यातञ्च वस्तुनियोजितं रूपकमेव नाटकमिति नाटचशास्त्रिभिरुक्तम् ।

पौरस्त्यैराचार्यैर्नाटके नायकवधवर्जनमेव न, अपि तु प्रवेशकादिभितज्जन्यं सूचनमपि पूर्णतया निषिद्धम् । पौरस्त्य-पाश्चात्यनाटचसिद्धान्तयोर्मध्ये मूलं विभेदतत्वभूतमिदमेव वृत्तम् । अत्रैवास्ति सुखान्त-दुःखान्तयोर्द्वयोराधारः । पञ्चाङ्कयुतं नाटकं निम्नकोटिकं दशाङ्कपूर्णमुत्कृष्टं मन्यते ।

३.२ प्रकरणम्

प्रपूर्वकात् प्रकृष्टार्थकात् कृधातोर्ल्युट्प्रत्ययेन व्युत्पादितं प्रकरणं नाम रूपकम् । प्रकरणे कविः स्वसामर्थ्येनोद्भावनं करोति काल्पनिकानां वस्तुनायकादीनामितिवृत्तमित्याचार्यो भरतः । नाटच-दर्पणकारेणापि प्रकरणे नायकफलवस्तूनां नाटककारस्योत्पाद्यता स्वीकृता । कल्पनाप्रधानत्वेनैवास्य रूपकस्याभिधेयं प्रकरणमिति-प्रकर्षेण क्रियते कल्प्यते वाऽस्य वास्तविकं चमत्कृतित्वमुत्पाद्यत्वमेवेति नाटचसमीक्षकाणां सम्मतिः । प्रकरणपदनिर्वचनेनैतद् ज्ञायते यत् प्रकरणस्य कथानकं लौकिकं कविकल्पितञ्च भवति । प्रकरणे नायकादीनां पात्रचरित्राणां संयोजनं स्वयमेव कविरुत्पादयति । अत्र ध्येयं यदस्ति कथावस्तुनो नूतनतया, कवेः कल्पनाशीलतया च प्रकरणं नाटकाद्भिन्नं भवति । अङ्ग-सन्ध्यर्थप्रकृति-कार्यावस्थादिभिरन्यैः तत्वविशेषैः प्रकरणनाटकयोः साम्यं साध्यते । प्रकरणकारस्य मौलिकत्वमेव मूलतत्वमत्र दृश्यते ।

---

५ डा भोलाशंकर-व्यासः, **दशरूपके**, (भूमिकायाम्) ।

६. 'अवस्थानुकृतिर्नाटचम्, अन्यद्भावाश्रय नृत्यंताललयाश्रयम् ।' **दशरूपके**, १:७-८, धनिकावलोकयुते, पृ. ४, ५, ६ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३.३ भाणः

शब्दार्थकाद् भण् धातोः घञ्प्रत्यये संयोजिते भाणशब्दनिष्पत्तिर्जायते । भाणस्य निर्वचनमभिनवगुप्तेन विहितं यत् एक एव पात्रविशेषो रङ्गमञ्चेऽप्रविष्टैरपि पात्रविशेषैः संभाषमाण इव दृश्यते, अतः भाण इत्युक्तमिति ।[७] वाचिकस्याभिनयस्य प्रधानत्वाद् भाण इत्यभिधानं जातमिति धनञ्जयः । वाचिकाभिनयप्रधानायाः भारतीनामिकायाः शब्दवृत्याः प्रयोगेणास्य रूपकस्याभिधानं भाण इति धनिकाभिमतम् । परं नाटचदर्पणकारः नायकस्याकाशोक्त्या 'भण्यते यत्रेति भाणः' इति व्युत्पत्तिमर्थयति । अनेनाऽपि धनञ्जयस्य मतं स्वीकृत्य कथितं यद्वाचिकाभिनयस्य प्राधान्यं भवति भाणे । अन्यैरप्याचार्यैः एक एव विटः स्वकृतं परकृतं वा धूर्तचरितभणनं करोतीति भाण इत्युक्तम् ।

कल्पितस्य वस्तुनः समायोजनम्, एकस्यैवाङ्कस्य नियोजनम्, वीर-शृङ्गारयोर्मध्ये अन्यतमस्याङ्गित्वेनोपयोजनम्, भारतीवृत्याधिक्यञ्च भाणरूपकस्य सामान्यस्वरूपम् । यथा,

'भाणः स्याद् धूर्तचरितो नानावस्थान्तरात्मकः ।
एकाङ्क एक एवाऽत्र निपुणः पण्डितो विटः ॥
....
सूचयेत् वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः ॥' सा.द., ६:२२७-२२९ ।

धूर्तवञ्चकानां वञ्चनेन नागरिकान् सचेतनान् सम्पादयितुं मनोरञ्जकतया, अत्राभिनीयते पात्रेणेति व्यङ्ग्यमूलस्यास्य रूपकस्य भाणस्योपयोगित्वं दृश्यते । वस्तुतः सामाजिकानां कतिपयभ्रष्टरीतीनामन्धविश्वासानां कुसंस्कृतीनाञ्च समाप्तये भाणरूपकं साहित्यिकमस्त्रमेवास्ति ।

३.४ व्यायोगः

'वि+आङ्' उपसर्गपूर्वकात् 'युज्'धातोः घञ् प्रत्यये व्यायोगपदव्युत्पत्तिः । व्यायोगस्यान्वर्थकतां प्रकाशयत्यभिनगुप्तपादाचार्यः, यत्रानेकानां पुरुषाणां मल्लयुद्धादिकं जायते, युद्धञ्च वर्ण्यते स व्यायोग इति । 'व्यायोगे युद्धप्राये नियुध्यन्ते पुरुषा यत्रेति व्यायोगः' इत्यर्थः (ना.शा., अभि.भा., अध्यायः १८, पृ. ४४५) । धनिकस्याभिमतानुसारेण 'व्यायुज्यन्तेऽस्मिन् वहवः पुरुषा इति व्यायोगः' (द.रू., ३:६२ वृत्तौ, पृ. १७८) इति व्यायोगव्युत्पत्तिः । नायकवाहुल्यं प्रकाशयति धनिकव्युत्पत्तिः । नाटचदर्पणकारेण व्यायोगपदनिर्वचने उक्तं यद्यत्र विशेषेण युज्यन्ते नायकाः कार्यं कर्तुं प्रयतन्त इति व्यायोग इत्युक्तम् ।

प्रसिद्धस्यैतिहासिकस्य पौराणिकस्य वृत्तस्यायोजनं, वीरशान्तयोर्निषेधनम्, नायिकाहीनत्वं, पुरुषपात्रापेक्षया स्त्रीपात्राणां न्यूनत्वं, एकाङ्कत्वं, कैशिक्या वृत्या गर्भविमर्शयोः सन्ध्योर्द्वयोरभावत्वमाचार्यैरुक्तं व्यायोगसामान्यलक्षणम् ।

३.५ समवकारः

'सम्+अव' इत्युपसर्गपूर्वकात् 'कृ' धातोः घञ्प्रत्यये समवकारपदनिर्वचनं भवति । नाटचदर्पणकारेणोक्तं यत् सङ्गतैरसङ्गतैश्च पूर्वप्रसिद्धभूतैस्त्रिवर्गोपायैर्यत्र निवध्यत इत्येव समवकाराभिधानेनाभिहितं

७. 'एकमुखेनैव भाष्यन्ते उक्तिमन्तः क्रियन्ते अप्रविष्टा अपि पात्रविशेषा यत्रेति' **ना.शा.**, अष्टादशाऽध्याये, अभिनवभारतीटीकायाम्, पृ.४४१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रूपकमिति । 'संगतैरवकीर्णेश्चार्थैः त्रिवर्गोपायैः पूर्वप्रसिद्धैरेव क्रियते निवध्यते इति समवकारः' (ना.द., पृ. २२१, वृत्तौ) ।

विश्वनाथ-धनिकमुख्यैराचार्यैरुक्तं यदत्र काव्यप्रयोजनानि समवकीर्यन्ते, अतस्तस्य समवकाराभिधा-नमर्थसङ्गतमिति । अत्रानेकविधानां नायकानां वृत्तानाञ्च निबन्धनं जायत इति तस्यान्वर्थकतासिद्धिः । देवासुरसम्वद्धस्य वृत्तस्यायोजनं, विमर्शातिरिक्तानां सन्धीनां संयोजनं, वीररसावतरणं भवति समवकारे । अत्र द्वादशप्रकारकाणां नायकानामायोजनं भवति । समवकारस्य वैशिष्ट्यं यदस्ति अत्राङ्कपटविद्रवादी-नामायोजनं विधीयते ।

३.६ डिमः

डिम्धातोः 'क' प्रत्यये संयोजिते डिमपदं व्युत्पाद्यते । डिम-डिम्ब-विद्रवशब्दान् पर्यायत्वेन स्वीकुर्वन्नभिनवगुप्ते निदर्शयति यदुद्धतप्रकृतिकाणां नायकानां वृत्तिर्यत्रेति डिम इति । 'डिम सङ्घाते' इति धातोर्डिमव्युत्पत्तिं स्वीकुर्वता धनञ्जयेन 'डिम सङ्घाते' इति नायक-सङ्घात-व्यापारात्मकत्वाद् डिमः' (धनिकवृत्तौ, द.रु., ३:६०) इति नायकानां हिंस्रकव्यापारत्वं डिमत्वमुक्तं दृश्यते । 'डिमो डिम्वो विद्रव इति पर्यायाः, उद्धतनायकास्तेषामात्मनां वृत्तिर्यत्रेति', (ना.शा. १८, अ.भा., पृ. ४४३-४४४) नाटचदर्पणकारोऽपि विप्लवादित्वेन डिमस्याऽर्थे प्रकाशयति । 'डिमो डिम्बो विप्लव इत्यर्थः, तद्योगादयं डिमः, डिमे संघातार्थत्वादिति', ना.द., द्वि.वि., वृत्तिभागे, पृ. २२५ । निष्कर्षेण शक्यते वक्तुं यदत्र नायकसंघातव्यापारबाहुल्यं भवति ।

प्रख्यातवस्तुयोजनं, शान्तहास्यशृङ्गारातिरिक्तानां रसानां संस्थितिः, रौद्रस्याङ्गित्वं, विमर्शातिरिक्तानां सन्धिचतुर्णां समायोजनं, उद्धतानां देवासुराणामौद्धत्यपूर्णानां कार्याणां वर्णनं, अङ्कचतुर्णां नियोजनं चोक्तमाचार्यैर्डिमसामान्यलक्षणम् ।

'डिमः संघात इत्यस्य धातोर्डिमपदोदयात् ।
नाटचसंघातव्यापारस्यैकत्वात् डिम उच्यते ॥' (संगीतदामोदरे, पृ. ८३)

३.७ ईहामृगः

ईहामृगपदनिर्व्वचने आचार्येणाभिनवगुप्तेनोक्तं यत् 'ईहा चेष्टा मृगस्येव स्त्रीमात्रार्था यत्र इतीहामृगः' इति (सा.द. ६:२४१-२४४) । धनिकेन पुनरुक्तं यत् 'मृगवदलभ्यां नायिकां नायकोऽस्मिन्नीहते इतीहामृगः ।' (ना.शा., अभिनवभारत्याम्, पृ. ४४१-४२) विश्वनाथोऽपि मतमिदं स्वीकरोति परं तस्याऽभिप्रायो धनिकोक्तायाः मृगवदलभ्यायाः नायिकायाः स्थाने नायकस्य मृगतुल्येच्छा इत्यर्थः । नाटचदर्पणकारेणापि अभिनवगुप्तमतमेव समर्थितं दृश्यते ।

अत्रानासक्तां दिव्यां नायिकां प्रति प्रतिनायकस्यासक्तिरुपवर्ण्यते । पौराणिकस्यैतिहासिकस्य वा कल्पितस्य कथावस्तुनः सम्मिश्रणं विधीयते । अङ्कानां चतुर्णां सीमाङ्कनम्, गर्भविमर्शयोर्द्वयोः सन्ध्योरतिरिक्तानां सन्धीनामुपयोजनं, शृङ्गाराभासस्य, रौद्रस्य च रसस्यायोजनं, प्रसिद्धानां धीरोदात्त-मनुष्याणां देवानां वा नायकत्वं, प्रच्छन्नपापाचरितस्य प्रतिनायकस्यायोजनंञ्च ईहामृगरूपकस्य सामान्यलक्षणम् (सा.द., ६:२४५-२४९) । विष्णुधर्मोत्तरपुराणे ईमामृगे गन्धर्वनायको भवतीत्युक्तमस्ति । (विष्णुधर्मोत्तरपुराणे,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१:७) कतिपयैराचार्यैः देवनायकत्वम्, एकाङ्कत्वमुक्तं पुनराचार्यैरन्यैः षड्नायकत्वमप्युक्तम् (सा.द., ६: २४९-५०)।

३.८ अङ्कः, उत्सृष्टिकाङ्को वा

शोकविह्वलानां स्त्रीणां कथा यत्र निबद्धचते तस्याभिधेयमङ्कोत्सृष्टिकाङ्को वा इत्यभिनवगुप्तपादाचार्यस्याङ्कनिर्वचनस्याशयः। धनञ्जयेन रूपकगणनेऽङ्क एवोक्तं परं लक्षणप्रसङ्गे पुनरुत्सृष्टिकाङ्क इत्यभिधेयं प्रदर्शितम्। धनिकस्तु नाटकस्य परिच्छेदार्थकेणाङ्केन सह अस्य वैभिन्यं प्रस्तोतुमुत्सृष्टिकाङ्काभिधेयत्वमित्यस्योपयुक्तत्वं प्रतिपादयति। उत्सृष्टिकाङ्क इति नाटकान्तर्गताङ्कव्यवच्छेदार्थमित्युक्त्वा (द.रू., ३:७०, धनिकस्यावलोकवृत्तौ)। नाट्यदर्पणकारेणापि शव्दपरिवर्तनेनाभिनवगुप्ताभिमतसमं स्वमतं दत्तम्। कतिपयैः समीक्षकैरुक्तं यत् नानाप्रकारार्थसंविधानरसाश्रयत्वमङ्कत्वं, परमङ्कस्यास्य लक्षणहीनत्वादुत्सृष्टिकाङ्क इत्यस्याभिधानं विहितम्।

३.९ वीथी

'विथृ याचने' धातोः इनि ङीपि च कृते 'वीथी' शव्दनिष्पत्तिर्जायते। वीथीसामान्यत्वेनास्याभिधानं वीथी इति धनिकः[८]। मार्ग-श्रेणि-पंक्तिपर्यायत्वेन 'वीथी' प्रयुज्यते। नाट्यदर्पणकारः 'वक्रोक्तिमार्गेण गमनात् वीथीव वीथी' (ना.द., पृ. २४०) इति विश्वसिति। दर्पणकारः 'वीथीव नानारसानां चात्र मालारूपतया स्थितत्वाद्वीथीयम्' (सा.द., ६:२६३) इति नानारसयोजनेन रसमालारूपत्वाद्वीथी इत्यभिधानमिति कथयति। कल्पितवस्तुनः संयोजनेन निर्मितं रूपकमस्ति वीथी, यत्रोक्ति-प्रत्युक्तीनां वाहुल्यं, शृङ्गाररसप्राधान्यं दिव्य-प्राकृतयोर्मध्ये एकस्य नायकत्वं, नायिकायाः पात्राणाञ्चान्येषामभावत्वं, कैशिकीवृत्तियोजनमाकाशभाषणेन शृङ्गाररससूचनादिकमस्य सामान्यलक्षणम्। अभिनवगुप्ताचार्यस्य मते वीथी सर्वरसमया, अविस्तृता, सरलव्युत्पत्तियुक्ता सर्वरूपकोपजीव्या भवति। स उत्तमाधममध्यमनायकानामनेकप्रकारकाणाञ्च वक्रोक्तिभेदानां लोकज्ञानकारकत्वं वीथीप्रयोजनं स्वीकरोति।

३.१० प्रहसनम्

'प्र' इत्युपसर्गपूर्वकाद्धासोपहासाद्यर्थकात् 'हस्' धातोर्ल्युट् प्रत्यये विहिते प्रहसनपदव्युत्पत्तिर्भवति हास्यरसाधिक्येनास्य सार्थकाभिधेयत्वमित्यभिनवगुप्ताचार्यः (ना.शा., अ.भा., पृ. ४४७)। 'हास्यवचः प्रचुरत्वादिदं प्रहसनमुच्यते' (प्रतापरुद्रीये, पृ. ८९) इति हास्यवचनवाहुल्यादस्याभिधानस्य सार्थकतां पश्यन्ति समीक्षकाः। एकस्मिन्नेवाङ्के संयोजितं प्रहसनं कविकल्पिताधमनायकसम्वद्धवृत्तयुतं भवति। हास्यरसस्याङ्गित्वेन स्वीकृते प्रहसने अन्यद्योजनन्तु भाणवद् भवति। अस्य नायकः तपस्वि-सन्यासि-व्राह्मणवर्गाणामन्यतमो धूर्तो भवति। भरतादिभिर्विहितस्यास्य द्विभेदमालोच्य धनञ्जयमुख्यैराचार्यैरस्य प्रहसनस्य शुद्ध-संकीर्ण-वैकृतत्वेन त्रैविध्यमुपकल्पितम्।

---

८. 'वीथीवद्वीथीमार्गः अङ्गानां पङ्क्तिर्वा- ' **द.रू.**, ३:६८ धनिकवृत्तौ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यत्र सन्यासि-तपस्वि-चेट-चेटी-विटादिभिरभिनीयते तत्छुद्धं प्रहसनं भवति । पुनः धूर्तैःपूर्णं संकीर्णं, नपुंसकैः कचुकैर्वा तपस्विभिः कामुकवद् व्यवह्रियते यत्र तद्वैकृतम् । अस्याधिकारिणः स्त्रीवालमूर्खाः भवन्तीत्यभिनवगुप्तमतम् । स कथयति तेषां मनोरञ्जनमस्य मुख्यं प्रयोजनञ्चापरँल्लोकजागरणमिति ।

४ उपरूपकविमर्शः

रूपकभेदविमर्शश्रृङ्खलायामुपरूपकाणामपि सन्दर्भ आयाति । नाटचशास्त्रिभिः कृतो रूपकोपरूपक-विभेदो वास्तविकः याथार्थ्यपरो न तु काल्पनिकः । यतो हि रूपकं नाटचमुपरूपकन्तु नृत्यपरमित्याचार्याणा-माशयः । नाटचं सर्वदैव रसाश्रितं स्यात् पुनर्नृत्यं तु भावाश्रितमेव । अतः रूपकं वाक्यार्थाभिनयात्मक-मुपरूपकञ्च पदार्थाभिनयात्मकमित्याचार्याणां सिद्धान्तः ।

नाटचाचार्यस्य भरतस्य मुनो र्नाटचशास्त्रे दशसंख्यकानां रूपकाणां पूर्ण निरूपणमस्ति परमुपरूकाणान्तु तत्र निर्देशनं नास्तीति प्रकाशयन्तः समीक्षकाः नाटचवेदे उपरूपकविमर्शपरम्परा प्रथमं नाटचाचार्येण कोहलेन प्रस्थापिता स्यादिति विश्वसन्ति । अभिनवगुप्ताचार्येणापि कोहलादिभिराचार्यैरुपरूपकाणां समायोजनं विहित स्यादित्युक्तमस्ति । अनेन प्रकारेण नाटचशास्त्रीयाणामुपरूपकचर्चाकाराणामनुशीलने कोहलाचायस्तत्पश्चवर्तिनो वाऽऽचार्या एवोपरूपकप्रस्तावका आसन्निति निष्कर्षे गन्तुं पार्यते ।

उपरूपकाणां भिन्नमस्तित्वमस्वीकुर्वता धनञ्जयाचार्येण दशरूपके नृत्यविभेदवर्णनसन्दर्भे उक्तं यत् दोम्वी-श्रीगदित-भाण-भाणी-प्रस्थान-रासक-काव्याऽभिधेयानि सप्तनृत्यरूपाणीत्युक्तम्–

'डोम्वी श्रीगदितं भाणो भाणीप्रस्थानरासकाः ।

काव्यं च सप्तनृत्यस्य भेदाः स्युस्तेऽपि भाणवत् ॥' (द.रू. १:८) इति । नृत्यं नाटकादिभन्नं भवतीत्यस्यां धारणायां दृढः धनञ्जयाचार्यः रसाश्रितेषु नाटचेषु भावाश्रितानां नृत्यरूपाणां नितान्तं वैभिन्यं भवतीति द्रढयति । रसाश्रितापि नाटिका, नाटक-प्रकरणयोर्मिश्रणजन्यत्वेनाचार्यैः संकीर्णत्वान्नैव नाटचत्वेन स्वीकृता । अग्निपुराणकारेण रूपकत्वेन प्रस्तुतानां सप्तविंशतिसंख्यकानां मध्ये पश्चवर्तिभिराचार्यैः दशसंख्यकानामेव रूपकमान्यता प्रदत्ता, अतिरिक्तभूतानां सप्तदशसंख्यकानां कृते उपरूपकाभिधानं प्रत्तम् । साहित्यदर्पणकारेण विश्वनाथेन तत्रैवाग्निपुराणे वर्णितेषु सप्तदशसंख्य-केषूपरूपकेषु 'विलासिका' नामिकामेकां संयोज्य अष्टादशसंख्यकानामुपरूपकाणां लक्षणोदाहरणानि प्रस्तुतानि,

'नाटिका त्रोटकं गोष्ठी सट्टकं नाटचरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥' (सा.द., ६:४-५) इति ।

५ निष्कर्षः

रूपकोपरूपकाणां संक्षिप्तस्वरूपसङ्केतेन नाटचभेदविमर्शने तात्विकमार्थिकं वा प्रयोजनमनुसन्धातुं शक्यते । उपर्युक्तैः समीक्षणैः रूपकस्य रसाश्रितत्वेन नाटचभेदे परिगणनं जातं पुनः भावाश्रितत्वेनोप-रूपकाणां नृत्यभेदे समायोजनं जातमिति स्पष्टम् । पुनरेतयोः द्वयोः प्रकृतिवैषम्यमअभिनयेनापि स्फुटं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकाश्यते । रूपकाणामभिनये आङ्गिकादीनां चतुर्णामेवाभिनयकलानां प्रदर्शनं भवति परमुपरूपकेषु एकस्यैवाङ्गिकस्याभिनयस्य बाहुल्यं प्रदर्श्यते ।

उपरूपकचर्चाप्रसङ्गे महत्त्वपूर्णं तत्त्वमपरन्त्वस्य प्रकारगतं वैभिन्यमप्यस्ति । अधुना प्रचलितस्यैकाङ्किशब्दस्य पौरस्त्य-नाटचशास्त्रे पृथक्तया विवेचनं न दृश्यते परं रूपकोपरूपकाणां मध्ये एकाङ्गसीमितानां व्यायोगाङ्ग-भाण-वीथी-प्रहसन-गोष्ठी-नाटचरासकोल्लाप्य-काव्य-रासक-श्रीगदित-विलासिका-हल्लीश-भाणिका-प्रेङ्क्षणानां कृते 'एकाङ्कि'पदाभिधानमुपयुक्तमित्याधुनिकैः समीक्षकैः प्रस्तावितं यदस्ति तद्वैज्ञानिकं व्यावहारिकं सैद्धान्तिकञ्च दृश्यते ।

प्राचीनकाले रूपकाणां द्विविधे परम्परे प्रचलिते आस्ताम् । एका साहित्यिकी परम्परा, अपरा च लौकिकी परम्परा । साहित्य-परम्परानुगतानां रूपकाणां रूपकत्वेन, लोकपरम्परानुगतानां रूपकाणां गीत-नृत्य-प्रधानत्वादुपरूपकत्वेन परम्परया नाटचशास्त्रीयसिद्धान्तेऽपि परिशीलनं जातमिति निष्कर्षः ।

सन्दर्भग्रन्थाः

१ अभिनवगुप्तः, **अभिनवभारती**, वडौदा, गायकवाड ओरियण्टल सिरीज, ई. १९६४ ।
२ अमरसिंहः, **अमरकोशः** (टीकाकारः-वालकृष्णाचार्यः), यशोदा पुस्तकालय, वाराणसी, वि.सं. २०१७ ।
३ कृष्णकविः, **मन्दारमरन्दचम्पू**, वम्वई, निर्णयसागरप्रेस, ई. १९२४ ।
४ चतुर्वेदी, सीतारामः, **अभिनवनाटचशास्त्रम्**, इलाहवाद, किताव महल, द्वि.सं., वि.सं. २०२१ ।
५ द्विवेदी, पारसनाथः (सं), **अग्निपुराणोक्तं काव्यालङ्कारशास्त्रम्**, वाराणसी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, ई. १९८५ ।
६ धनञ्जयः, **दशरूपकम्**, सावलोकम् (व्याख्याकारः भोलाशङ्कर व्यासः), वाराणसी, चौखम्वा विद्याभवन, ई. १९७९ ।
७ नन्दिकेश्वरः, **अभिनयदर्पणः**, (सं., व्या., डा.एम.एम.घोषः), कलकत्ता, ई. १९३४ ।
८ पाणिनिः, **अष्टाध्यायी**, वम्वई, वेङ्कटेश्वर मुद्रणालय, ई. १९५४ ।
९ भट्टोजिदीक्षितः, **सिद्धान्तकौमुदी**, (तत्त्ववोधिनीयुता), मुम्मई, खेमराज श्रीकृष्णदासः, ०२५ ।
१० भरताचार्यः, **नाटचशास्त्रम्** (अभिभा युतम्), टी. आचार्यो विश्वेश्वरः, दिल्ली, दिल्ली- विश्वविद्यालय, ई. १९६० ।
११ मङ्कुकः, **साहित्यमीमांसा**, (सं. गौरीनाथशास्त्री), वाराणसी, सं.सं.वि., वि.सं. २०४० ।
१२ रामचन्द्र-गुणचन्द्रौ, **नाटचदर्पणः**, दिल्ली, परिमल पब्लिकेशन, ई. १९८६ ।
१३ विद्यानाथः, **प्रतापरुद्रीयम्**, मद्रास, वालमनोरमा प्रेस, ई. १९५० ।
१४ विश्वनाथः, **साहित्यदर्पणः** वाराणसी, चौखम्वा विद्याभवन, षष्ठ-सं., ई. १९८२ ।
१५ विश्वनाथः, **साहित्यदर्पणः**, रुचिराटीकायुता (टी.-म.म.शिवदत्तदाधीचः),
१६ व्यासः, **अग्निपुराणम्**, कलकत्ता, गुरुमण्डल ग्रन्थमाला, ई. १९५७ ।
१७ व्यासः, **विष्णुधर्मोत्तरपुराणम्**, वडौदा, गायकवाड, ई. १९५८ ।
१८ शारदातनयः, **भावप्रकाशनम्**, वडौदा, गायकवाड ओरियण्टल सिरीज, ई. १९३० ।
१९ शिङ्गभूपालः, **रसार्णवसुधाकरः**, मद्रास, अनन्तशयनम् संस्कृतग्रन्थावली, ई. १९१६ ।
२० द्विवेदी, पारसनाथ, **नाटचशास्त्रका इतिहास**, वाराणसी, चौखम्वा सुरभारती प्रकाशन, ई. १९९५ ।
२१ द्विवेदी, हजारीप्रसादः, **भारतीय नाटचशास्त्रकी परम्परा और दशरूपक**, दिल्ली, नेशनल पब्लिसिङ हाउस, ई. १९६५ ।
२२ पाठकः, मूलचन्द्रः, **संस्कृत नाटकों मे अतिप्राकृत तत्त्व**, जयपुर, देवनागर प्रकाशन ।
२३ Shastri, S.N., **The Laws and Practise of Sanskrit Drama**, 1st Edition, Varanasi, Chaukhamba Publication, 1961.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रमाणविषये न्यायमीमांसकयोर्मतम्

अच्युतप्रसादः लामिछाने
सहप्राध्यापकः

प्रेक्षणार्थकदृश्धातोः ल्युटि कृते दर्शनशब्दो निष्पद्यते[1]। दृश्यते(ज्ञायते) येन वस्तुतत्त्वं तदेव दर्शनम्। तत्र दर्शनानि विविधानि सन्ति। विशेषतः प्राच्यदर्शनानि आस्तिकनास्तिकभेदेन द्विविधानि एव। नास्तिकदर्शनानि चार्वाकार्हत-वैभाषिक-सौत्रान्तिक-योगाचार माध्यमिकप्रस्थानभेदेन षट् सन्ति। आस्तिकदर्शनानि च न्यायवैशेषिकसांख्ययोगपूर्वोत्तरमीमांसाख्यानि षडेव।

प्राच्यदर्शनपरम्परायां न्यायदर्शनस्याद्वितीयं स्थानमस्ति। अत्र नितरामतिशयेन वा ईयते- अवगम्यते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्त्या न्यायशब्दस्य निष्पत्तिर्भवति[2]। न्यायभाष्यानुसारेण "प्रमाणैरर्थपरीक्षणं न्यायः[3]", न्यायवार्तिकानुसारेण "वाक्यभावापन्नानि प्रमाणान्येव न्यायः[4], तत्त्वचिन्तामणिकृतो गङ्गेशोपाध्यायस्य मतानुसारेण "अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः[5], दीधितिकृतो रघुनाथस्यानुसारेण "उचितानुपूर्वीकप्रतिज्ञादिवाक्यपञ्चकं न्यायः[6] प्राचीनपरिभाषानुसारेण पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृतत्त्वाबाधितत्त्वसत्प्रतिपक्षितत्त्व-रूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्याय[7]:

अत्र न्यायो हि प्रमाणशास्त्रम्, अत एवोक्तं प्रमाणैरर्थपरीक्षणं न्यायः। प्रमाणमन्तरेण नार्थप्रतिपत्तिः, नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्, प्रमाणेन खल्वयं ज्ञातार्थमुपलभ्य तमर्थमभीप्सति जिहासति वा तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते, सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः, समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वेति[8] वात्स्यायनभाष्यवचनं न्यायविद्यायाः

---

(१) स्यार राजा राधाकान्तदेववहादुरः "शव्दकल्पद्रुमस्य द्वितीयो भागः पृष्ठम् ६८९।
(२) न्यायदर्शन कक्षा १० (अस्मदीयं कथनम्)।
(३) न्यायभाष्यम् पृ. ६
(४) तर्कसङ्ग्रहः पृ. V (प्रास्ताविकम्) पूर्ववत् पृ. ४
(५) तत्त्वचिन्तामणिः पृ. ६९१
(६) तर्कसङ्ग्रहः, पृ. V (प्रास्ताविकम्)
(७) पूर्ववत् पृ. V
(८) प्रसन्नपदापरिभूषितं न्यायभाष्यं पृ. १,२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महत्त्वमुपयोगित्वञ्च प्रमाणीकरोति । अस्य शास्त्रस्य महत्त्वमुपयोगित्वञ्च प्रतिपादयन् कौटिल्यमहोदयोऽपि कौटिलीयार्थशास्त्रस्य विद्यासमुद्देशाख्यप्रकरणे लिखति-

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वद् आन्वीक्षिकी मता ।

प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्[९] । अत्रानुपश्चादीक्षणमेवान्वीक्षा, तया अन्वीक्षया = अनुमानेन प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या = न्यायशास्त्रम् । एतादृशस्य न्यायशास्त्रस्य प्रवर्तको न्यायसूत्रकर्ता महर्षिगौतमः । न्यायशास्त्रे प्रमाणानां प्रमेयाणाञ्च विस्तरो ऽस्ति । आस्तिकदर्शने यथा महत्त्वं न्यायदर्शनस्य तथा महत्त्वं मीमांसादर्शनस्यापि । मीमांसाशव्दो "मान पूजायामित्यस्माद्धातोर्मानेर्जिज्ञासायामिति[१०] वार्तिकेन जिज्ञासारूपेऽर्थे निष्पन्नः । मीमांसादर्शनस्य तर्कशव्देनापि व्यवहारो भवति । "विधिर्विधेयस्तर्कश्च वेदः[११] इति पारस्करगृह–सूत्रानुसारमस्यायमर्थः- विधिर्ब्राह्माणम्, विधेयः- मन्त्रः, तर्कः-मीमांसादर्शनम् । तत्तु वेदोद्भव एवेति । यथोक्तम्-

मीमांसासंज्ञकस्तर्कस्सर्ववेदसमुद्भवः ।
सोऽतो वेदो रुमाप्राप्तः काष्ठादिलवणात्मवत्[१२]

अत्र पूजितविचारवचनो हि मीमांसाशव्दः । अतोऽस्य विचारशास्त्रस्य तर्करूपत्वं वेदोद्भवत्त्वञ्च सिद्ध्यति ।

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः[१३] ॥

इति मनुवचनादपि तर्कशव्देन मीमांसायाः ग्रहणं भवति । अत्र प्रमाणशव्देन व्यवह्रियमाणस्य न्यायशास्त्रस्य सर्वविद्यानां प्रदीपत्वेन, सर्वकर्मणामुपायत्त्वेन, सर्वधर्माणामाश्रयत्त्वेनोपयोगो दृश्यते चेत् तर्कशव्देन व्यवह्रियमाणस्य मीमांसाशास्त्रस्य वाक्यार्थनिर्णयेतितरामुपयोगो दृश्यते । तत्र मीमांसादर्शने कुमारिलभट्टस्य, प्रभाकरमिश्रस्य, मुरारिमिश्रस्येति प्रस्थानत्रयं प्रसिद्धम् । एषु प्रस्थानेषु मुरारिमिश्रस्य अर्थात् तृतीयः पन्था विशेषतोऽधुना प्रसिद्धो नास्ति । भट्टस्य प्रस्थानं, प्रभाकरस्य प्रस्थानन्तु अधुनापि शास्त्ररूपेण व्याप्तं वर्तते । प्रमाणप्रमेयविषये भट्टप्रभाकरयोर्मतभेदो दृश्यते । अत्र प्रमाणविषय एव तयोर्मतभेदनिरूपणपूर्वकं ताभ्यां सह नैयायिकमते कीदृशो भेदः? इति जिज्ञासायां निरूप्यते-

---

(९) पूर्ववत् पृ. ६,७
(१०) सिद्धान्तकौमुदी वातिर्कसंख्या ५३७
(११) प्रकरणपञ्चिका पृ. १ (भूमिका)
(१२) न्यायवार्तिकतात्पर्यटीका पृ. ६१
(१३) मनुस्मृतिः १२/१०६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नैयायिकानान्तु नये-

"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[१४] इति चतुर्विधमेव प्रमाणम्। तत्र नैयायिकैः स्वीकृतेषु प्रमाणेषु भट्टप्रभाकरयोः (मीमांसकयोः) वैमत्यं नास्ति किन्तु तयोर्मते चतुर्विधादतिरिक्तमपि प्रमाणं स्वीकृतम्। किञ्च तदिति चेदुच्यते **प्रभाकरमते**।

तत्र पञ्चविधं मानं प्रत्यक्षमनुमानं तथा शास्त्रं तथोपमानामर्थापत्ती। रिति गुरोर्मतम्[१५] गुरोरर्थात् प्रभाकरमते चतुर्विधादतिरिक्तमर्थापत्तिरपि प्रमाणम्।

कुमारिलभट्टमते-

प्रत्यक्षमनुमानञ्च शाब्दं चोपमितिस्तथा।
अर्थापत्तिरभावश्च षट्प्रमाणानि मादृशाम्[१६]॥

अत्र नैयायिकैरस्वीकृतानामर्थापत्त्यनुपलब्धिप्रमाणानामपि स्वीकृतत्वात् षड्विधं प्रमाणम्। इत्थं प्रमाणसंख्याविषये न्यायमीमांसकयोर्मतभेदो दृश्यते।

प्रमीयतेऽनेनेति प्रमाणम् प्रत्यक्षादिचतुष्टयम्[१७]। प्रमाकरणं प्रमाणमिति[१८] प्रमाणस्य लक्षणम्। एतल्लक्षणन्तु न्यायमतेन। मीमांसकयोरपि अर्थतः प्रमाणलक्षणविषये भेदो न दृश्यते, केवलं शब्दत एव भेदः। भट्टमते कारणदोषबाधज्ञानरहितमगृहीतग्राहिज्ञानं प्रमाणम्-[१९]। प्रभाकरमते त्वनुभूतिरेव प्रमाणम्। उक्तञ्च-

अनुभूतिः प्रमाणं सा स्मृतेरन्या स्मृतिः पुनः।
पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते[२०]॥

"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसमार्थ्यादर्थवत्प्रमाणम्[२१]" इति न्यायभाष्यानुसारात् न्यायमीमांसकयोरुभयोरपि मते प्रमाणमर्थवदेव भवति किन्तु "प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः[२२] इत्यनुसारात् प्रमाणानां प्रामाण्यं नैयायिकाः परतो भवतीति स्वीकुर्वन्ति। "प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम्"[२३] इत्यनुसारात् भट्टमते प्रमाणानां प्रामाण्यं स्वतो भवति। त्रिपुटीप्रतिभासवादी गुरुस्तन्मतेऽपि ज्ञानस्य स्वप्रकाशरूपत्वात् ज्ञानप्रामाण्यं स्वत एव भवति। इत्थमुपरि निर्दिष्टरीत्या प्रमाणभेदविषये प्रमाणानां प्रामाण्यविषये निरुच्य अधुना प्रत्यक्षादिप्रमाणानां प्रत्येकस्य लक्षणं निरूप्यते-

(१४) न्यायभाष्यम्-पृ. १७
(१५) प्रकरणपञ्चिका., पृ. १२८
(१६) मानमेयोदयः पृ. ९
(१७) न्यायभाष्यम्-पृ. १
(१८) मानमेयोदय पृ. ९
(१९) शास्त्रदीपिका पृ. ४५
(२०) प्रकरणपञ्चिका. पृ. १२४
(२१) न्यायभाष्यम् पृ. १
(२२) सर्वदर्शनसङ्ग्रहः हिन्दी व्याख्या पृ. ४७६
(२३) पूर्ववत् पृ. ४७६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्यायमते-

"इन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं ज्ञानं[२४], ज्ञानाकरणकं ज्ञानं[२५] वा प्रत्यक्षमिति प्रत्यक्षस्य लक्षणम्"। सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षं द्विविधम्। तत्र त्रिविधविषयताया मध्ये निर्विकल्पके एकापि नास्ति, तत्र चतुर्थी विषयता स्वीक्रियते। अत्र प्रकारताशून्यत्वे सति ज्ञानत्वं, संसर्गताशून्यत्वे सति ज्ञानत्वं विशेष्यताशून्यत्वे सति ज्ञानत्वं निर्विकल्पकस्य[२६] लक्षणं भवति। प्रकारतानिरूपकज्ञानत्वं, संसर्गतानिरूपकज्ञानत्वं, विशेष्यतानिरूपकज्ञानत्वं सविकल्पकमर्थात्[२७] सविकल्पकप्रत्यक्षस्य लक्षणम्। "घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्"[२८] इत्यनुसारात्। घ्राणजरासनचाक्षुषश्रावणस्पार्शनमानसभेदात् प्रत्यक्षं षड्विधम्। प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षोऽपि षड्विधः, संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति"[२९]।

भट्टमते-

इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षम्[३०] तच्च सविकल्पकनिर्विकल्पकभेदेन भट्टमतेऽपि द्विविधम्। तत्र द्रव्यादिस्वरूपमात्रावगाहि शब्दानुगमशून्यं यत्संमुग्धज्ञानं तदेव निर्विकल्पकम्[३१]। तदेव स्पष्टीकृत्य वार्तिककारो लिखति-

अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥
न विशेषो न सामान्यं तदानीमनुभूयते।
तयोराधारभूता तु व्यक्तिरेवावसीयते[३२]॥

एवं शब्दस्मरणसहकारित्वे सति जात्यादिविशिष्टवस्तुविषयकं ज्ञानं सविकल्पकम्[३३]।

यथा घटोऽयं रक्तोऽयमित्यादि। चक्षूरसनघ्राणस्पर्शाः श्रोत्राणि मनसश्चेति प्रत्यक्षज्ञानकारणीभूतानि षडिन्द्रियाणि[३४]। प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः, संयोगः, संयुक्ततादात्म्यञ्चेति द्विविधः। रूपत्वादिग्रहणाय

---

(२४) न्यायसिद्धान्तमुक्तावली पृ. १७४
(२५) तर्कसङ्ग्रहः पृ. ३४
(२६) पूर्ववत् पृ. ३४
(२७) पूर्ववत् पृ. ३४
(२८) न्यायसिद्धान्तमुक्तावली पृ. १७८
(२९) पूर्ववत् पृ. १८९
(३०) मानमेयोदयः पृ. ११
(३१) पूर्ववत् पृ. २०
(३२) श्लोकवार्तिकम् पृ. १२०-१२२
(३३) मानमेयोदयः पृ. २०
(३४) पूर्ववत् पृ. ११

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नैयायिकाः संयुक्तसमवेतसमवायमाश्रयन्ते, तथा कुमारिलमतेऽपि संयुक्ततदात्मतादात्म्यं नाम तृतीयः सन्निकर्षोऽस्तु अन्यथा कुमारिलमते द्विविध[३५] एव सन्निकर्षः ।

प्रभाकरमते-

साक्षात्प्रतीतिप्रत्यक्षं मेयमातृप्रमासु सा[३६] इत्यनुसारात् साक्षात्प्रतीतिप्रत्यक्षमिति प्रत्यक्षस्य लक्षणम् । तच्च प्रत्यक्षं मेयमातृप्रमास्वरूपमिति त्रिपुटं भवति । अत्रापि प्रत्यक्षज्ञानकारणीभूतानीन्द्रियाणि षडेव । एतन्मते सन्निकर्षास्त्रयः- संयोगसंयुक्तसमवायसमवाय[३७]भेदात् । अत्र मते रूपत्वादीनां, शब्दत्वस्य, अभावस्य च अभावात् संयुक्तसमवेतसमवायः, समवेतसमवायः, विशेषणविशेष्यभावो न स्वीक्रियते । अतस्तन्मते त्रिविध एव सन्निकर्षः । अत्रैव सन्निकर्षनिरूपणप्रसङ्गे भाट्टाः समवायस्थाने तादात्म्यमुल्लिखन्ति चेत् न्यायप्रभाकरमते तु समवाय एवोल्लिखितो वर्तते । अतः संयुक्ततदात्मतादात्म्यं संयुक्तसमवेतसमवाय इत्येकमेवार्थमभिव्यनक्ति ।

न्यायमते-

अनुमितिकरणमनुमानम्[३८] । तत्त्रिविधम्-पूर्ववच्छेषवत्सामान्यतो दृष्टञ्च[३९] ।

१. यत्र कारणेन कार्यमनुमीयते तत्पूर्ववदनुमानम्, यथा मेघोन्नत्या वृष्टेरनुमानम् । अर्थात् वृष्ट्युन्मुखेन मेघेन भविष्यत्कालिका वृष्टिरनुमीयते ।
२. यत्र कार्येण कारणमनुमीयते तच्छेषवदनुमानम् । यथा पूर्वोदकस्वच्छनिर्मलविपरीतं मलीनमुदकं दृष्ट्वा, नद्या पूर्णत्वं दृष्ट्वा, स्रोतसः शीघ्रत्वञ्च दृष्ट्वा तत्कारणीभूता वृष्टिरनुमीयते, भूता वृष्टिरिति ।
३. गतिपूर्वकमेवान्यत्र दृष्टस्यान्यत्रानुमानं सामान्यतो दृष्टानुमानम् । यथा गोकुले दृष्टस्य कृष्णस्य यन्मथुरायां दर्शनं तद्गतिपूर्वकमेव । यतो हि गतिहीनस्य तथा दर्शनासम्भवात् । तथा आदित्यस्यापि यत्प्रातः काले पूर्वस्यां दृष्टस्य अपराह्ने यत्पश्चिमायां दर्शनं तद्गतिपूर्वकमेवेति सामान्यतो दृष्टानुमानेन आदित्यस्यापि गतिरनुमीयते ।

अनुमानं पुनरपि त्रिविधम्-केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्[४०] । न्यायमतेऽ-नुमानस्यानुग्राहकस्तर्कः । तन्मते शङ्काव्याघातपर्यन्तं तर्कमार्गेण गन्तव्यम् । उक्तञ्च-

"व्याघातावधिराशङ्का तर्कशङ्कावधिःकुतः[४१]" इति ।

---

(३५) पूर्ववत् पृ. १५-१६
(३६) प्रकरणपञ्चिका पृ. १४६
(३७) पूर्ववत् पृ. १३४
(३८) तर्कसङ्ग्रहः पृ. ३९
(३९) न्यायभाष्यम् पृ. २४
(४०) न्यायसिद्धान्तमुक्तावली पृ. १४२
(४१)न्यायकुसुमाञ्जलिः ३/७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भट्टमते-

व्याप्यदर्शनादसन्निकृष्टार्थज्ञानमनुमानम्[४२]। यथा पर्वते धूमवत्त्वदर्शनादग्निमत्त्वज्ञानम्। प्रभाकरमतेऽपि अनुमानस्य लक्षणं तत्तसदृशमेव। यथाह प्रकरणपञ्चिकायाम्-

ज्ञातसम्बन्धनियमस्यैकदेशस्य दर्शनात्-
एकदेशान्तरे बुद्धिरनुमानमबाधिते[४३]।

न्यायमत इव अन्वयव्यतिरेकिकेवलान्वियिकेवलव्यतिरेकिभेदात् प्राभाकराः अनुमानस्य त्रैविध्यं स्वीकुर्वन्ति। केवलव्यतिरेक्यनुमानन्तु नैव स्वीकुर्वन्ति भाट्टाः। उक्तञ्च-

"ते च कौमारिलाः प्रायो नेच्छन्ति व्यतिरेकिणम्[४४] इति।

अतो भट्टमतेऽनुमानं केवलान्वयि-अन्वयव्यतिरेकिभेदात् द्विविधमेव। दृष्टं सामान्यतो दृष्टञ्चेति[४५] अनुमानस्य द्वैविध्यन्तु मीमांसकमत एव। स्वार्थपरार्थभेदेनानुमानस्य द्वैविध्यन्तु न्यायमीमांसकयोरुभयोरपि मते प्रसिद्धम्। तत्र न्यायाप्रयोज्यानुमानं[४६] स्वार्थानुमानम्। न्यायप्रयोज्यानुमानञ्च[४७] परार्थानुमानम्। अत्र न्यायत्वं नाम प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वम्। परार्थानुमाने पञ्चावयववाक्यप्रयोगो भवतीति नैयायिकाः। तेषां मते प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदात् अवयवाःपञ्च। प्रतिज्ञाहेतूदाहरणभेदेन उत उदाहरणोपनयनिगमनभेदेन त्रय एवावयवाः मीमांसकमते। उक्तञ्च-

प्रतिज्ञया निगमनं हेतुनोपनयस्तथा।
गतार्थ इति कः कुर्यात्पञ्चावयवघोषणाः।
तस्मात् त्र्यवयवं ब्रूमः पौनरुक्त्या सहावयम्-
उदाहरणपर्यन्तं यद्वोदाहरणादिकम्[४८]। एवं रीत्यावयवसंख्याविषयेऽपि मीमांसकनैयायिकयोर्मतभेदो दृश्यते। एवञ्च

"अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा[४९]॥

अर्थात् अनैकान्तविरुद्धसत्प्रतिपक्षासिद्धवाधितभेदा न्यायमते हेत्वाभासाः पञ्च। मीमांसकमते तु असिद्धो विरुद्धोऽनैकान्तिकोऽसाधारणश्चेति चत्वारस्तदाभासाः[५०] प्रकरणपञ्चिकायां यन्निर्दिष्टिं तदनुसारन्तु

(४२) मानमेयोदयः पृ. ३१
(४३) प्रकरणपञ्चिका पृ. १९६
(४४) मानमेयोदयः पृ. ६१
(४५) पूर्ववत् पृ. ६५
(४६) तर्कसङ्ग्रहः पृ. ४४
(४७) पूर्ववत् पृ. ४४
(४८) मानमेयादयः पृ. ६९
(४९) न्यायसिद्धान्तमुक्तावली पृ. २३८
(५०) मानमेयोदयः पृ. ७५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

असिद्धोऽनैकान्तिको बाधकश्चेति हेत्वाभासास्त्रय[५१] एवेति कौमारिलाः । तस्मात्त्रेधा चतुर्धा वा हेत्वाभासा व्यवस्थिता न तु पञ्चेति उभयमते (भट्टप्रभाकरमते) ।

न्यायमते-

उपमितिकरणमुपमानम् । अत्रोपमानं नाम अतिदेशवाक्यार्थज्ञानम्[५२] । भाष्यानुसारेणतु "प्रसिद्धसाध्यसाधर्म्यात्साध्यसाधनमुपमानम्[५३] । अर्थात् प्रज्ञातेन प्रसिद्धेन दृष्टेन गवा सामान्यात् प्रज्ञापनीयस्य गवयगवयशब्दयोर्वाच्यवाचकभावसम्बन्धस्य प्रज्ञापनं यदवधारणं भवति, तद्विषयकं यत्प्रमाणं तदुपमानम् । भट्टप्रभाकरयोरुभयोरपि मते उपमानन्त्वेकरूपम् । उक्तञ्च मानमेयोदये कुमारिलमतेनोपमानस्वरूपम्-

दृश्यमानार्थसादृश्यात्स्मर्यमाणार्थगोचरम् ।
असन्निकृष्टसादृश्यज्ञानं ह्युपमितिर्मता[५४] ॥

यथा गवये गोसादृश्यदर्शनानन्तरं स्मर्यमाणे गवि यद्गवयसादृश्यज्ञानं तदेवोपमानम् । प्रभाकरमते तु

सादृश्याद्दृश्यमानाद् यत्प्रतियोगिनि जायते ।
सादृश्यविषयं ज्ञानमुपमानं तदुच्यते[५५] ।

इत्थं भट्टप्रभाकरमतेऽपि गोर्गतसादृश्यप्रतीतिरेवोपमानम् ।

न्यायमते-

आप्तोपदेशः शब्दः । आप्तस्तु खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा[५६] । दृष्टार्थादृष्टार्थञ्चेति शब्दस्य द्वैविध्यम् । यस्येहलोके योऽर्थो दृष्यते स दृष्टार्थः । यथा घटमानय इत्यत्र घटादेरिह लोके दृश्यमानत्वात्स दृष्टार्थः । यस्यार्थोऽमुत्र परलोके दृश्यते सोऽदृष्टार्थः । यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र स्वर्गादेरिह लोकेऽदृश्यमानत्वात् सोऽदृष्टार्थः । आप्तोच्चरितत्त्वमपि शब्दस्य लक्षणं भवति । तद वैदिकावैदिकभेदेन द्विविधम्[५७] । अत्र वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणं, लौकिकन्त्वाप्तोक्तं प्रमाणम् ।

पदैः स्मारितैः पदार्थैर्यदसन्निकृष्टविषयं वाक्यार्थज्ञानं तच्छाब्दं प्रमाणमिति भाट्टाः । उक्तञ्च-

तत्र तावत्पदैर्ज्ञातैः पदार्थस्मरणे कृते ।
असन्निकृष्टवाक्यार्थज्ञानं शाव्दमितीर्यते[५८]

---

(५१) प्रकरणपञ्चिका पृ. २२६
(५२) तर्कसङ्ग्रहः पृ. ४७-४८
(५३) (न्यायभाष्यम्) पृ. २६-२७
(५४) मानमेयोदयः पृ. १०९
(५५) प्रकरणपञ्चिका, पृ. २६७
(५६) न्यायभाष्यम्, पृ. २७-२८
(५७) तर्कसङ्ग्रहः, पृ. १७५
(५८) मानमेयोदयः, पृ. ९५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तच्च शाब्दं पौरुषेयापौरुषेयञ्चेति द्विविधम्। तत्राप्तवचः पौरुषेयं वेदवचोऽपौरुषेयम् इति। गुरुस्तु अपौरुषेयमर्थात् वैदिकमेव शाब्दमस्तीति स्वीकुर्वन्ति, न तु पौरुषेयम्[५९]। गुरु-(प्रभाकर-) मते शब्दविज्ञानापेक्षादात्ममनःसन्निकर्षाद् यद् अदृष्टविषयं ज्ञानं तच्छास्त्रं प्रमाणम्। उक्तञ्च शालिकनाथेन-

"शास्त्रं तु शब्दविज्ञानाद् यदसन्निकृष्टार्थविज्ञानम्"[६०] इति।

अत्र गुरुमते शब्दो द्रव्यं, भट्टमते तु शब्दो गुणः, न्यायमतेऽपि शब्दो गुण एव। आकांक्षा योग्यता सन्निधिश्च शाब्दज्ञाने हेतव इति तु न्यायमीमांसकयोरुभयोरपि मतैक्यं वर्तते। अतो गौरश्वः पुरुषो हस्तीति न प्रमाणम् आकांक्षाविरहात्। आकांक्षासत्त्वे तु शाब्दवोधो भवत्येव। अग्निना सिञ्चतीति वाक्यमपि अप्रमाणं योग्यताया अभावात्। अतो योग्यतापि शाब्दवोधे सहकारिकारणम्। सन्निधिरपि शाब्दवोधेऽपेक्षितो भवति। अन्यथा प्रथमे प्रहरे गामित्युक्ते द्वितीये प्रहरे आनय इत्युक्ते शाब्दवोधः स्यात्तत्तु पदसान्निध्याभावात् न सम्भवति, सन्निधिसत्त्वे तु शाब्दवोधो भवत्येवेति। अत्र निरुक्तस्य शाब्दवोधसहकारिकारणस्य स्पष्टीकरणन्तु भेदोदाहरणनिरूपणपूर्वकं मानमेयोदयदर्शितअधोलिखितरीत्या भवति। तच्च-

अत्राकांक्षा च योग्यत्वं सन्निधिश्चेति तत्त्रयम्।
वाक्यार्थावगमे सर्वैः कारणत्वेन कल्प्यते॥
गौरश्वः पुरुषो हस्तीत्याकाङ्क्षारहितेष्विह।
अन्वयादर्शनात् तावदाकांक्षा परिगृह्यते।
अग्निना सिञ्चतीत्यादावयोग्यानामनन्वयात्।
योग्यतापि परिग्राह्या सन्निधिस्त्वथ कल्प्यत[६१] इत्यादि।

न्यायमतेऽर्थापत्तेरनुमानगतार्थत्वात्[६२] प्रमाणान्तरत्वं नास्ति। यतो हि 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र अर्थापत्तौ पीनत्वे सति दिवा भोजनबाधे रात्रिभोजनन्त्वनुमानेन सिद्ध्यति। एवं देवदत्तस्य शतवर्षजीवित्त्वं ज्योतिषशास्त्रादवगम्यते, तत्र जीविनो देवदत्तस्य गृहाभावे वहिःसत्त्वं त्वनुमानेन सिध्यत्येवेत्यर्थापत्तेः प्रमाणान्तरत्वस्वीकरणमनावश्यकं किन्तु भट्टप्रभाकरयोरुभयोरपि मतेऽर्थापत्तेः प्रमाणान्तरत्वमस्ति। भट्टमते दृष्टार्थापत्तिरश्रुतार्थापत्तिश्चेति अर्थापत्तेर्द्वैविध्यम्। सा किंस्वरूपेति चेदुच्यते–

अन्यथानुपपत्त्या यदुपपादककल्पनम्।
तदर्थापत्तिरित्येवं लक्षणं भाष्यभाषितम्[६३]॥

---

(५९) पूर्ववत्, पृ. १०४
(६०) प्रकरणपञ्चिका, पृ. २२९
(६१) मानमेयोदय, पृ. १००-१०१
(६२) न्यायसिद्धान्तमुक्तावली, पृ. ५०३-५०४
(६३) मानमेयोदयः पृ. ११६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तथैव अर्थापत्तेरेव स्पष्टीकरणरूपेण श्लोकवार्तिकेऽपि वार्तिककारो लिखति-

प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत्।
अदृष्टं कल्पयेदन्यं साऽर्थापत्तिरुदाहृता[६४] ॥

भट्टमते अन्यथानुपपत्तिमाश्रित्य यदुपपादककल्पना भवति सा अर्थापत्तिः। यथा देवदत्तस्य पीनत्वे सति दिवाभोजनवाधे तदुपपादिका या रात्रिभोजनकल्पना सा अर्थापत्तिः । अथ च जीविनो देवदत्तस्य गृहासत्त्वे तदुपपादकं यद् वहिः सत्त्वकल्पनं साऽपि अर्थापत्तिरेव । अत्र निर्दिष्टभट्टमत इव गुरुमते कार्थापत्तिरिति जिज्ञासायामुच्यते-

विना कल्पनार्थेन दृष्टेनाऽनुपपन्नताम् ।
नयताऽदृष्टमर्थं या साऽर्थापत्तिस्तु कल्पना ॥

अर्थात् प्रभाकरमते दृष्टेनार्थेनादृष्टार्थस्य या कल्पना, साऽर्थापत्तिः । तन्मतेऽर्थापत्तेः प्रमाणान्तरत्वसिद्धेऽपि ते श्रुतार्थापत्तिं, न स्वीकुर्वन्ति, ते तु दृष्टार्थापत्तिमेवैकां स्वीकुर्वन्ति[६५] ।

एवम्-

अभावाख्यन्तु वस्त्वेव नास्तीत्याह प्रभाकरः ।
तेन प्रमाणचिन्तामेवैनां परिहसत्यसौ[६६] ॥

इत्यनेनापि ज्ञातुं शक्यते यत् प्रभाकरमते तु अभावाख्यं प्रमाणमेव नास्ति । ते तु अभावप्रमाणस्वीकर्तृणां कौमारिलानामुपाहासमेव कुर्वन्ति । नैयायिका अप्यनुपलब्धिप्रमाणं न स्वीकुर्वन्ति, तन्मते अनुपलब्धेरर्थादभावाख्यप्रमाणस्य प्रत्यक्ष एवान्तर्गतत्वात् । अभावस्य प्रत्यक्षविषयत्वमेवाङ्गीकुर्वता श्रीमता उदयनाचार्येणाऽपि लिखितं वर्तते यत्–

प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात् ।
अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः[६७] ॥

अनुमानञ्च वर्तते-अभावज्ञानं प्रत्यक्षम् अनुपक्षीणेन्द्रियजन्यत्वात् घटवद् । किन्तु नैयायिकानां मतमेतन्न स्वीकुर्वन्ति भाट्टाः । ते तु अभावाख्यं स्वतन्त्रं प्रमाणं मन्यन्ते । तन्मते-

अत्रोपलम्भयोग्यत्वे सति अनुपलम्भनमेव अनुपलब्धिरर्थाद् अभावाख्यं प्रमाणम् । उक्तञ्च मानमेयोदये-

अथोपलम्भयोग्यत्वे सत्यप्यनुपलम्भनम् ।
अभावाख्यं प्रमाणं स्यादभावस्याववोधकम्[६८] ॥

(६४) श्लोकवार्तिके पृ. ३२०
(६५) प्रकरणपञ्चिकाया पृ. २७४-२७५
(६६) मानमेयोदये पृ. १३८
(६७) न्यायकुसुमाञ्जलै ३/२०
(६८) मानमेयोदये पृ. १२९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एतावताअभावप्रमाणस्यास्त्वं स्वीकुर्वन्ति कौमारिलाः । तन्मते स्मरणाभावप्रमाणाभाव–भेदेनानुपलब्धिप्रमाणं द्विविधम्[६९] । इत्थमुपरि चर्चितरीत्या न्यायमीमांसामतेन तुलनात्मकदृष्ट्या च भेदोदाहरणपूर्वकं प्रमाणविषयकविमर्शनं मया संक्षेपेण निवेदितम् । अधुना विस्तरभयादत्रैव विरामो विधीयते ।

सन्दर्भग्रन्थसूची

१. अन्नं भट्टः, तर्कसङ्ग्रहः, (न्यायबोधिनीसहितः), मोतीलाल वनारसीदास, दिल्ली, द्वितीयं संस्करणं, १९८५ ई.सं. ।

२. उदयनाचार्यः, न्यायकुसुमाञ्जलिः (आचार्यःविश्वेश्वरसिद्धान्तशिरोमणिः, हिन्दीव्याख्याकारः) चौखम्वा विद्याभवन वाराणसी, २०१९ वि.सं. ।

३. कुमारिलभट्टः श्लोकवार्तिकम्, सम्पादकः- द्वारिकादासशास्त्री, तारापब्लिकेशन, वनारस १९७८ ई.सं. ।

४. गङ्गेशोपाध्यायः तत्वचिन्तामणिः (मथुरानाथतर्कवागीशकृत-"रहस्य" नामकटीकया सहितो, द्वितीयभागः) प्रथमपरिच्छेदः, चौखम्वा संस्कृतप्रतिष्ठानं दिल्ली प्रथमसंस्करणं १९९०ई.सं. ।

५. नारायणपण्डितः मानमेयोदयः, षड्दर्शनप्रकाशनप्रतिष्ठानं, वाराणसी १९७८ ई.सं. ।

६. पार्थसारथिमिश्रः शास्त्रदीपिका, (रामकृष्णप्रणीतसिद्धान्तचन्द्रिकाव्याख्यासहिता), कृष्णदास अकादमी, वाराणसी, द्वितीय संस्करण, २०४५ वि.सं. ।

७. भट्टोजिदीक्षितः सिद्धान्तकौमुदी, (तत्त्ववोधिनीटीकासहिता), प्रकाशकः खेमराज- श्रीकृष्णदासः बम्वई, २०१५ वि.सं. ।

८. माधवाचार्यः सर्वदर्शनसङ्ग्रहः, चौखम्वा विद्याभवनं वाराणसी, तृतीयं संस्करणं १९८४ ई.सं. ।

९. वाचस्पतिमिश्रः न्यायवार्तिकतात्पर्यटीका, प्रकाशकः जयकृष्णदास-हरिकृष्णदासः, चौखम्वा संस्कृत सिरिज, वनारस, १९२५ ई.सं. ।

१०. वात्स्यायनः न्यायभाष्यम्, (प्रसन्नपदापरिभूषितम्), सम्पादकः- स्वामीद्वारिकादासशास्त्री, सुधीप्रकाशन, वाराणसी, २०४३ वि.सं. ।

११. विद्यानाथ उपाध्यायः पद्मप्रसाद भट्टराई, न्यायदर्शनम्, कक्षा १०, (परिमार्जनकर्तारौ), पाठ्यक्रमविकासकेन्द्र सानोठिमी भक्तपुर, प्रथमं संस्करणं, २०५९ वि.सं. ।

१२. विश्वनाथपञ्चाननभट्टाचार्यः न्यायसिद्धान्तमुक्तक्रावली, सम्पादकः हरिरामशुक्लः, चौखम्वा संस्कृतसंस्थानं वाराणसी चतुर्थसंस्करणम् २०४५ वि.सं. ।

१३. शालिकनाथमिश्रः प्रकरणपञ्चिकाप्रमाणपारायणं, काशीहिन्दूविश्वविद्यालयः, २०१८ वि.सं. ।

१४. शिवराजकौण्डिन्न्यायनः, (परिमार्जकोऽनुवादकश्च) मनुस्मृतिः, चौखम्वाविद्याभवनं वाराणसी २००७ ई.सं. ।

(६९) पूर्ववत् पृ. १३०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जैमिनीयधर्ममीमांसाशास्त्रे स्मार्तकर्मविचारः

प्रमोदवर्धनः कौण्डिन्न्यायनः

सहप्राध्यापकः

१. विषयप्रवेशः

वेदेषु यज्ञानां प्रतिपादनमस्ति। अत एव वेदा यज्ञार्थमेव प्रवृत्ता इत्यप्युच्यते[1]। तत्र यजुर्वेदोऽध्वर्युवेदनाम्नाऽपि प्रसिद्धोऽस्ति। यजुर्वेदे दर्शपूर्णमासा-ऽग्निहोत्र-चातुर्मास्य-पशुवन्ध-सोमयागादिषु श्रौतयज्ञेषु प्रयोज्यानां मन्त्राणां सङ्ग्रहोऽस्ति। व्राह्मणभागे तत्सम्बद्धा विधयः समुपलभ्यन्ते। श्रौतसूत्रेषु च तेषामेव यज्ञानामनुष्ठानस्य पद्धतिर्वर्णिताऽस्ति। स्मार्तकर्माणि गृह्यसूत्रेषु, वर्णाश्रमनियमाश्च धर्मसूत्रेषु सङ्गृहीतानि सन्ति। धर्ममीमांसाशास्त्रे मुख्यतया श्रौतयज्ञनिरूपणसम्बद्धतया न्यायानां विचारः कृतोऽस्ति। अत एवेदं शास्त्रमध्वरमीमांसाशास्त्रमित्यप्युच्यते। वस्तुतस्त्विदं शास्त्रं धर्ममीमांसाशास्त्रमस्ति। अत्र स्मार्तकर्मसम्वद्धतयाऽपि केषाञ्चन न्यायानां विचारः कृतः प्राप्यते।

धर्मस्य यथार्थज्ञानस्य साधनमपौरुषेयं शास्त्रं भवितुं शक्नोतीति धर्ममीमांसकादिभिः स्वीक्रियते। तच्च वेदशास्त्रमेव। वेदाः खल्वज्ञाना-ऽल्पज्ञान-काम-क्रोध-लोभ-मोह-मद-मात्सर्यादि-पुरुषदोषरहिता धर्मे मोक्षे च निरपेक्षप्रमाणभूता इति वैदिकैरार्यैरादरेण तेषामध्ययनं क्रियते। वेदशास्त्रेण खलु मनुष्यो धर्ममोक्षोपयोगिन्यां प्रवृत्तावारोढुं प्रेर्यते। अत एव वेदाध्ययनाय त्रैवर्णिकानामुपनयनसंस्कारः क्रियते, येन त्रैवर्णिकानां द्विजत्वं सम्पाद्यते[2]।

शव्दराशिरूपस्याऽनादिपरम्परागतस्य वेदशास्त्रस्य स्वरूपं केनाऽपि विप्रलम्भनप्रयोजनेन प्रक्षेपादिना विनष्टं कर्तुं न शक्यते। अध्ययनाध्यापनव्यवस्थाविशेषरहितेषु पुराणादिषु प्रक्षेपादिकं जातमस्तीति

---

१. वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानपर्व्या विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम् ॥–इति वेदाङ्गज्योतिषे, ३ श्लो.।

२. आचार्यस्त्वस्य यां जातिं विधिवद् वेदपारगः।
उत्पादयति सावित्र्या सा सत्या साऽजराऽमरा ॥–इति मनुस्मृतौ २।१४८।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनैराधुनिकैश्च विद्वद्भिः स्वीकृतं वर्तते । किन्तु गुरुशिष्यपरम्परासमधिगम्ये वेदे तादृशी सम्भावना नाऽस्तीत्यवगम्यते । अस्मिन् विषये मीमांसावार्त्तिककारैः कुमारिलभट्टैर् विशेषप्रतिपादनमपि कृतं वर्तते[३] ।

वेदस्वरूपरक्षायै वेदार्थप्रकाशनाय च शिक्षा-व्याकरण-निरुक्तानामङ्गानां रचना वेदविद्भिः कृता । वेदस्य यज्ञियं प्रयोगं दर्शयितुं कल्पशास्त्र-च्छन्दश्शास्त्र-ज्योतिषशास्त्राणि प्रवृत्तानि । एवं वेदस्वरूपाऽर्थ-प्रयोग-रहस्यबोधनायर्षिभिर्मुनिभिश्चैतेषां वेदाङ्गानां प्रणयनं कृतम् ।

२. मीमांसाशास्त्रे श्रौतयज्ञविचारः

एतस्य चाऽनादिगुरुशिष्यपरम्परयाऽऽगतस्य[४] तत्तच्छाखाध्यायिभिर् मात्रामात्रमप्यनपहाया-ऽपरिवर्त्या-ऽप्रक्षिप्य च सुमहता प्रयासेनाऽनुपाल्यमानस्य वेदस्य मूलं रहस्यं यज्ञस्वरूपे गर्भितं भूत्वा सुरक्षितं वर्तते । कर्मसु यज्ञः श्रेष्ठतमं कर्म मन्यते[५] । यज्ञः खल्वाधिभौतिकाऽधिदैविका-ऽऽध्यात्मिकपक्षैर्युक्तोऽस्ति प्रजापतिप्रतिमारूपश्चास्तीति वेदवचनादेव ज्ञायते । लौकिकं वैदिकं च प्रयोगं परिशील्य मीमांसाभाष्यकारेण शबरस्वामिना यज्ञस्यैव मुख्यं धर्मत्वं प्रतिपादितम्[६] । यथा वैदिकयज्ञरहस्यज्ञानाय ब्राह्मणग्रन्थानां गभीरमध्ययनमावश्यकं भवति, तथैव स्थूलस्य यज्ञरूपस्य यथार्थरूपेण ज्ञानाय कल्पसूत्राणामध्ययनमावश्यकं भवति । ब्राह्मणवाक्यमनुसृत्य कल्पसूत्रे प्रतिपादितेषु येषु विषयेषु संशय उत्पन्नो भवितुं शक्नोति, तेषु विषयेषु ब्राह्मणगतविध्यादिवाक्यार्थविचारपूर्वकं धर्ममीमांसाशास्त्रे निर्णयः कृतो निर्णयसिद्धान्तप्रतिपादनञ्च कृतम् । अत एव मन्त्रब्राह्मणानुसारं कल्पसूत्रे प्रतिपादितस्य यज्ञप्रयोगमार्गस्य न्याय्यत्वस्याऽवबोधो वाक्यशास्त्रं विचारशास्त्रम् अध्वरमीमांसाशास्त्रं पूर्वमीमांसाशास्त्रम् इत्यादिभिर्नामभिर्व्यवह्रियमाणस्य धर्ममीमांसाशास्त्रस्याऽध्ययनेन भवति ।

अनेन प्रकारेण धर्ममीमांसाशास्त्रे मुख्यतया श्रौतकर्मणां विषये विचारो विहितः । वैदिकयज्ञस्वरूपज्ञानं विना मीमांसान्यायानां तत्त्विकं ज्ञानं न भवति । धर्ममीमांसायां खलु अग्न्याधानम्,

---

३. सहाध्यायिभिरेवातो वेदः कार्त्स्न्येन रक्ष्यते ।
स्वराक्षरविनष्टोऽपि द्वेषादन्यैर्न मृष्यते ।
तस्मात् प्रीतैरुपाध्यायैर् द्विष्टैः कारुणिकादिभिः ।
न विनाशयितुं शक्यो लभ्यते तेन रक्ष्यते ॥–इति तन्त्रवार्त्तिके १।३।४, १९५ पृ. ।

४. वेदस्याऽध्यनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनवाच्यत्वादधुनाध्ययनं यथा ॥– इति श्लोकवार्त्तिके, वाक्याधिकरणे, ३६६ श्लो. ।

५. यज्ञो वै श्रेष्ठतमं कर्म ।–इति मा.वा. शतपथब्राह्मणे १।७।१।५ ।

६. यो हि यागमनुतिष्ठति तं धार्मिक इति समाचक्षते । यश्च यस्य कर्ता स तेन व्यपदिश्यते, यथा पाचको लावक इति । तेन यः परुषं निश्श्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते । न केवलं लोके वेदेऽपि "यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्" ऋ.सं.१०।९०।१६, मा.वा.शु.य.सं.३१।१६) इति यजतिशब्दवाच्यं धर्मं समामनन्ति– इति जै. ध. मी. सू. शाबरभाष्ये १।१।२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यम्, पशुवन्धः, अग्निष्टोमसोमयागः, वाजपेयः, गवामयनम्, कुण्डपायिनामयनम्, राजसूयः, अश्वमेधः, विश्वजिद्यागः, सारस्वतसत्रम्, सर्वस्वारः, श्येनः, इषुः, जातेष्टिः, स्थपतीष्टिः इत्यादीनां वेदमन्त्रसंहिता-ब्राह्मणग्रन्थ-श्रौतसूत्रेषु प्रतिपादितानां यज्ञानां विषये विचारं कृत्वा न्याया व्युत्पादिताः । तथाप्येतेषां न्यायानां मूलं तु प्राकृता लौकिका न्याया एव[७] । अत एवैतेषां मीमांसान्यायानां प्रयोगः सुसम्बद्धार्थानां व्यवस्थितानां येषां केषामपि वाक्यानामर्थनिर्णयाय कर्तुं शक्यते । अत एव धर्माधिकरणेऽपि (न्यायालयेऽपि) मीमांसान्यायानां प्रयोगो भवितुं शक्नोति । एतेषां न्यायानां स्मार्तधर्मविचारे पौराणधर्मविचारे च धर्मशास्त्रनिवन्धिभिः प्रचुरतयोपयोगः कृतो दृश्यते[८] ।

३. मीमांसाशास्त्रे स्मार्तकर्मविचारः

यद्यपि धर्ममीमांसाशास्त्रे प्रायः श्रौतयज्ञसम्बद्धानि वचनान्युदाहृत्य श्रौतयज्ञविचारं कृत्वा न्याया व्युत्पादिताः, तथापि धर्ममीमांसाशास्त्रे कुत्रचित् तु गृह्यसूत्रे तत्परिशिष्टेषु च चर्चितानां स्मार्तकर्मणां विषयेऽपि विचारः कृतः प्राप्यते ।

स्मार्तकर्मानुष्ठानानन्तरमेव श्रौतकर्मानुष्ठानेऽधिकारो भवति । गृह्याग्न्याधानं कृत्वा तत्र कर्तव्यानां नित्यपाकयज्ञानामनुष्ठानं कृतवद्भिस् त्रैवर्णिकैः श्रौताग्न्याधानं कर्तव्यं भवति । स्वशाखावेद-वेदाङ्गादि-शास्त्राणाम् आवश्यकानां परशाखा-वेदकल्पानामपि यथाविधि अध्ययनं कृतवन्तः श्रौताग्निसाध्याना-मग्निहोत्रादिनित्यकर्मणामनुष्ठाने समर्था वृत्त्यर्थमक्लिश्यन्तः समृद्धा द्विजाः श्रौताग्न्याधाने, श्रौतकर्मानुष्ठाने चाऽधिकारिणो भवन्ति[९] । इत्थमनुष्ठानदृष्ट्या स्मार्तकर्मणां पूर्वभावित्वं भवति ।

४. स्मार्तकर्मणां वेदमूलकत्वम्

मीमांसाशास्त्रस्य प्रथमोऽध्यायो धर्मप्रमाणविचारपरोऽस्ति । तत्र प्रथम-द्वितीयपादाभ्यां विध्यर्थवादमन्त्रात्मकस्य वेदस्य प्रामाण्यं निरूपितम् । तदनन्तरं तृतीये पादे धर्मे स्मृतेः प्रामाण्यं भवति न वेति चिन्तितम् । स्मृतिशब्देनाऽत्र मुख्यतया गृह्यसूत्रग्रन्थानां ग्रहणं कृतमिति बोध्यम् ।

गृह्यसूत्रेषु वेदोक्तानामुपनयनादीनां संस्काराणां साङ्गोपाङ्गं विधानं कृतमस्ति । तदतिरिक्तान्यपि सन्ति स्मृतिकारैर्विहितानि कानिचन कर्माणि, येषां प्रतिपादनं वेदेषु नोपलभ्यते । स्मृत्यधिकरणे भाष्यकारेण "अष्टकाः कर्तव्याः", "गुरुरनुगन्तव्यः", "तडागं खनितव्यम्", "प्रपा प्रवर्तयितव्या" "शिखाकर्म कर्तव्यम्" इत्येतेषामुदाहरणत्वेनोल्लेखः कृतो वर्तते ।

---

७. मीमांसा तु लोकादेव प्रत्यक्षानुमानोपमानादिभिरविच्छिन्नसम्प्रदायपण्डितव्यवहारैः प्रवृत्ता । न हि कश्चिदपि प्रथममेतावन्तं युक्तिकलापमुपसंहर्तुं क्षमः ।–इति तन्त्रवार्त्तिके १।३।२ ।

८. द्रष्टव्यः– **नैपालधर्मशास्त्रिकृतधर्मशास्त्रनिबन्धानां मीमांसान्यायदृष्ट्या संक्षिप्तं पर्यालोचनम्** इत्याख्यो लघ्वनुसन्धानप्रवन्धः, प्रमोदवर्धनः कौण्डिन्न्यायनः, ७२ पृ.।

९. द्रष्टव्यः– **कतिपयवैदिकयज्ञपरिचयः,** प्रमोदवर्धनः कौण्डिन्न्यायनः, २० पृ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मार्गशीर्षस्य (सहोमासस्य), पौषस्य (सहस्यमासस्य), माघस्य (तपोमासस्य), भाद्रस्य नभस्यमासस्य) कृष्णपक्षस्याऽष्टमीषु आज्यादिभिः इन्द्रः, विश्वेदेवाः, प्रजापतिः, पितरश्चेति प्रधानदेवता इज्यन्ते। इमानि कृत्यान्येव अष्टका इत्युच्यन्ते[१०]। अष्टकानां सप्तसु पाकयज्ञ-संस्थासु गणनाऽपि भवति[११]। अष्टकानां विधानं गृह्यसूत्रेषु प्राप्यते[१२]।

तत्र पूर्वपक्षः– धर्मः शब्दमूलोऽस्ति। तस्माद् यस्य कर्मणः प्रतिपादको वैदिकः शब्दो नोपलभ्यते, तस्य प्रामाण्यं स्वीकर्तुं न शक्यते। शब्दलक्षणो धर्म इति सूत्रकारेणोक्तम्– "चोदनालक्षणो धर्मः"[१३] इति। अतोऽष्टकादिस्मृतेः प्रामाण्यं किंमूलमिति विचारणीयम्। प्रत्यक्षादिप्रमाणमूलकत्वेन तासां स्मृतीनां प्रामाण्यं न भवति, प्रत्यक्षादीनां धर्मनिरूपणे सामर्थ्याभावात्। न च स्वातन्त्र्येण वेदवत् तासां प्रामाण्यं संभवति, पौरुषेयत्वात्। अतो जात्यन्धपरम्परासदृशी व्यामोहस्मृतिपरम्परेयमिति पूर्वपक्षः। तथा च स्मृत्यधिकरणे पूर्वपक्षसूत्रे उक्तम्–

"धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्"[१४] इति।

अत्र स्मृतिप्रामाण्यसाधकः सिद्धान्तपक्षः– अष्टकादिस्मृतयः प्रमाणमेव। वैदिकानां शिष्टानां स्मरणमप्रमाणं भवितुं नाऽर्हति। गृह्यसूत्रप्रणेतारः शाङ्खायना-ऽश्वलायन-बौधायन-पारस्कर-गोभिलादयो वैदिकाः शिष्टा इति तेषामाचार्याणां स्मृतीनां वेदमूलकत्वं स्फुटं भवति। यदुक्तं स्मृतिमूलभूतो वैदिकः शब्दो नोच्चार्यत इति, तन्न, यतो हि नानाशाखासु विप्रकीर्णरूपेण स्मृतिमूलभूताः श्रुतय उपलभ्यन्ते। श्रुतीनामुच्चार्यमाणत्वे स्मृतिप्रणयनमेव व्यर्थमित्यपि न वक्तव्यम्, शाखान्तराध्यायिभिः शाखान्तरेषु विप्रकीर्णरूपेण स्थितानां वेदवचनानामनुपलभ्यमानत्वात्। अतस्तदर्थं स्मृतिप्रणयनं सार्थकमेव। यासां स्मृतीनां सम्प्रति कस्यामपि वेदशाखायां मूलं न दृश्यते तासामपि दृढस्मरणबलान्मूलभूता श्रुतिरनुमीयत एव। एतादृशीनामपि स्मृतीनां भ्रान्त्यादिमूलकत्वकल्पनातश्श्रुतिमूलकत्वकल्पनैव ज्यायसी। उक्तं च वार्त्तिककारैः–

भ्रान्तेरनुभवाद् वाऽपि पुंवाक्याद् विप्रलम्भनात्।
दृष्टानुगुण्यसाध्यत्वाच्चोदनैव लघीयसी॥[१५] इति।

---

१०. तत्रैव, १९ पृ.।

११. अष्टका पार्वणः (स्थालीपाकः) श्राद्धं (मासिश्राद्धं) श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः।–इति गौतमधर्मसूत्रे १।८।१९।

१२. हेमन्त-शिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः।–इति आश्वलायनगृह्यसूत्रे २।४।१, ऊर्ध्वमाग्रहायण्यास् तिस्रोऽष्टमीष्वष्टका अपरपक्षेषु।–इति कौषीतकिगृह्यसूत्रे ३।१५।१।

१३. जैमिनीयधर्ममीमांसासूत्रे १।१।२।

१४. तत्रैव १।३।१।

१५. तन्त्रवार्त्तिके १।३।२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इत्थं गृह्यसूत्रादिस्मृतीनां वेदमूलकत्वं मीमांसाशास्त्रे निर्णीतम्। तत्रैतादृशीनां स्मृतीनां प्रलीनश्रुतिमूलकत्वं भाट्टैः स्वीक्रियते। प्राभाकरैस्तु नित्यानुमेयश्रुतिमूलकत्वमास्थीयते। अतः स्मरणदार्ढ्यात् स्मृतीनां मूलभूतवेदवचनानुमानेन प्रामाण्यमिति सिद्धान्तः। तथा च जैमिनिसूत्रम्–

"अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्"[१६] इति।

५. स्मार्तकर्मणां वेदे सङ्केतः

गृह्यसूत्रादिस्मृतिप्रतिपादितानां विषयाणां वेदेषु साङ्गोपाङ्गस्य प्रतिपादनस्याऽनुपलम्भेऽपि स्मार्तानां केषाञ्चन कर्मणां वेदेष्वपि स्थानेस्थान उल्लेखस्तु प्राप्तुं शक्यते। यथा–

उपनयनम्–

आचार्यो गर्भी भवति हस्तमाधाय दक्षिणम्।
तृतीयस्यां स जायते सावित्र्या सह ब्राह्मणः॥[१७] इति।

स्मृतिप्रतिपादितस्य गुर्वनुगमननियमस्य सङ्केतः–

तस्माच् छ्रेयांसं पूर्वं यन्तं पापीयान् पश्चादन्वेति।[१८] इति।

स्मृतिप्रतिपादितायाः प्रपाया उल्लेखः–

धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन्।[१९] इति।

शिखाया उल्लेखः–

यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव।[२०] इति।

६. वेदविरुद्धा स्मृतिर्न प्रमाणम्

जैमिनीयधर्ममीमांसासूत्रस्य प्रथमाध्यायस्य तृतीये पादे स्मृतिप्रामाण्ये साधिते वेदविरुद्धायाः स्मृतेस्तु प्रामाण्यं न भवतीत्यपि सिद्धान्तितम्।

यत्र श्रुतिविरोधोऽस्ति तत्र स्मृतेः का गतिरिति चिन्ता भवति। तत्र भाष्यकारेण त्रीणि उदाहरणानि प्रस्तुतानि– औदुम्बर्याः सर्ववेष्टनम् "औदुम्बरीं स्पृष्ट्वोद्गायेत्"[२१] इति श्रुत्या विरुद्धम्, अष्टाचत्वारिंशतं

---

१६. जैमिनीयधर्ममीमांसासूत्रे १।३।२।

१७. माध्यन्दिनीय-वाजसनेयि-शतपथब्राह्मणे ११।५।४।१२।

१८. मैत्रायणीयसंहितायाम् ३।१।३।

१९. ऋग्वेदसंहितायाम् १०।४।१, तैत्तिरीयसंहितायाम् २।५।१२।

२०. ऋग्वेदसंहितायाम् ६।७५।१७, तैत्तिरीयसंहितायाम् ४।६।४, मा.वा. शुक्लयजर्वेदसंहितायाम् १७।४८।

२१. शाबरभाष्य उद्धृतं वचनम् १।३।३।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्षाणि वेदब्रह्मचर्यचरणं "जातपुत्रः कृष्णकेशोऽग्नीनादधीत"[२२] इत्यनेन विरुद्धम्, क्रीतराजको भोज्यान्न इति "तस्मादग्नीषोमीये संस्थिते यजमानस्य गृहेऽशितव्यम्"[२३] इत्यनेन विरुद्धम्। तत्र पूर्वपक्षी अष्टकादिस्मृतिवदेतादृश्या अपि स्मृतेः प्रामाण्यं मन्यते। सिद्धान्ती तु मूलभूतश्रुत्यनुमानाभावादेतादृशीनां स्मृतीनां प्रामाण्यं न भवतीत्याह। तथा च सिद्धान्तसूत्रम्–

"विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्"[२४] इति।

भाष्यानुसारमस्याऽधिकरणस्य व्याख्यानं कृत्वाऽस्मिन्नधिकरणे वार्त्तिककारेण विशेषस्पष्टीकरणमपि कृतं वर्तते। वार्त्तिककारेणाऽस्याऽधिकरणस्य निष्कर्षोऽनेन प्रकारेण प्रदर्शितः–

यावदेकं श्रुतौ कर्म स्मृतौ वाऽन्यत् प्रतीयते।
तावत् तयोर् विरुद्धत्वे श्रौतानुष्ठानमिष्यते॥
अतश्चैवं श्रुतिस्मृत्योर् विशेषोऽनेन दर्श्यते।
नाऽत्यन्तमेव बाध्यत्वं न चाऽप्यत्यन्ततुल्यता॥[२५] इति।

७. लोभमूलं स्मरणं न प्रमाणम्

जैमिनीयधर्ममीमांसासूत्रस्य प्रथमाध्यायस्य तृतीये पादे स्थितस्य चतुर्थस्य सूत्रस्य पृथगधिकरणत्वेनाऽपि व्याख्यानं भाष्यकारेण कृतम्। तत्रोक्तम्–

"अधिकरणान्तरं वा। "वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति" इति, "यूपहस्तिनो दानमाचरन्ति" इति। तत्कर्तृसामान्यात् प्रमाणमिति प्राप्ते– **हेतुदर्शनाच्च**। अप्रमाणं स्मृतिः। अत्राऽन्यन्मूलम्। लोभादाचरितवन्तः केचित्। तत एषा स्मृतिः। उपपन्नतरं चैतद् वैदिकवचनकल्पनात्।"[२६] इति। तत्रैव तन्त्रवार्त्तिक उक्तम्–

तत्राऽपि वेदमूलत्वकल्पना नोपपद्यते।
कर्तृसामान्यतः प्राप्ता लोभसम्भवपूर्वकात्॥[२७] इति।

८. स्मार्तस्याऽपि पदार्थस्य प्राबल्यम्

जैमिनीयधर्ममीमांसायाः प्रथमाध्यायस्य तृतीये पादे पदार्थप्राबल्याधिकरणे "आचान्तेन कर्तव्यम्", "यज्ञोपवीतिना कर्तव्यम्" इत्यादिवाक्यान्युदाहृत्य स्मृतिप्रतिपादितान्येतादृशानि श्रुतिविरुद्धत्वान्न कर्तव्यानि उताऽविरुद्धानि कर्तव्यानीति विचारः कृतः।

---

२२. शाबरभाष्ये उद्धृतं वचनम् १।३।३।
२३. मैत्रायणीयसंहितायाम् ३।७।८।
२४. जैमिनीयधर्ममीमांसासूत्रे १।३।३।
२५. तन्त्रवार्त्तिके १।३।३।
२६. शाबरभाष्ये १।३।४।
२७. तन्त्रवार्त्तिके १।३।४।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र पूर्वपक्षः– एतादृश्यः स्मृतयो न प्रमाणम् । "वेदं कृत्वा वेदिं करोति"[२८] इति श्रुतौ पूर्वकालवाचिना क्त्वाप्रत्ययेन[२९] क्रमः प्रतीयते । वेदकरण-वेदिकरणयोर्मध्ये यदि क्षुतादिनिमित्तमाचमनं कुर्यात् तदा श्रुत्युक्तं नैरन्तर्यं विहन्येत । तस्मादाचमनस्मृतिर्न प्रमाणमिति ।

अत्र सिद्धान्तः– अगृह्यमाणकारणका एवञ्जातीयकाः प्रमाणमेव । वेद-वेद्यादिश्रुत्युक्तपदार्थ–वदाचमनादयः स्मृत्युक्ता अनुष्ठेयाः पदार्थाः सन्ति । क्रमः पदार्थनिष्ठो धर्मोऽस्ति । स च पदार्थानुपजीवति । अत उपजीव्यविरोधात् क्रम एव बाध्यते । न तु क्रमेणाऽऽचमनस्य बाधोऽस्ति । तस्मादाचमनादिस्मृतिः प्रमाणम् । सूत्रकारेणोक्तम्–

"अपि वा कारणाऽग्रहणे प्रयुक्तानि प्रतीयेरन्"[३०] इति ।

अपि च पूर्वं पदार्थेषु प्राप्तेषु पश्चात् क्रम आपतति । पूर्वं तु क्रम एव नाऽस्ति । तस्मादविरोधः । वार्त्तिककारेणाऽप्युक्तम्–

तस्मादाचमनादीनां क्रतुभिः सङ्ग्रहे सति ।
पश्चात्प्राप्तक्रमेयत्ताकालशास्त्राऽविरोधिता ॥[३१] इति ।

९. उपनयनप्रभृति स्मार्तधर्मपालनम्

मीमांसायाः षष्ठाध्यायस्य द्वितीये पादे षष्ठेऽधिकरणे "प्राङ्मुखो भुञ्जीत"[३२] इत्यादीनां स्मार्तानां धर्माणां विषये विचारः कृतः । तत्र एते नियमा जनन्प्रभृति प्रवर्तन्ते- जातो यदा शक्नुयात् तदाप्रभृति पालयेदिति उतोपनयनप्रभृतीति संशये अनग्निसाध्यत्वादमन्त्रसाध्यत्वाच्चैतेषां नियमानां पालनमनुपनीतैरपि शक्तैः कार्यमिति प्राप्ते उपनीतैरेव कार्यमिति सिद्धान्तः । तथा च सूत्रम्–

"अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन्"[३३] इति ।

१०. उपनयनहोमाग्निः

मीमांसायाः षष्ठाध्यायस्याऽष्टमे पादे द्वितीयेऽधिकरणे उपनयनहोमः कस्मिन्नग्नौ कर्तव्य इति विचारः कृतो वर्तते । उपनयनाङ्गभूता होमाः किमाहवनीयाग्नौ कर्तव्या उत लौकिकेऽग्नौ कर्तव्या इति

२८. द्र.- आपस्तम्बश्रौतसूत्रम् ८।१३।२ ।
२९. समानकर्तृकयोः पूर्वकाले ।–इति अष्टाध्याय्याम् ३।४।२१ ।
३०. जैमिनीयधर्ममीमांसासूत्रे १।३।७ ।
३१. तन्त्रवार्त्तिके १।३।७ ।
३२. द्र.- आपस्तम्बधर्मसूत्रम् १।३१।१ ।
३३. जैमिनीयधर्ममीमांसासूत्रे ६।२।२२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संशयो भवति । षष्ठस्याऽष्टमस्याद्ये "एषा वा अनाहिताग्नेरिष्टिर्यच्चतुर्होतारः"[३४] इति वचनवलाच्चतुर्होतृहोमो लौकिकेऽग्नौ कर्तव्य इति निर्णीतम् । किन्तु उपनयनविषये तादृशं वचनं नाऽस्ति । तस्मादाहवनीयाग्नौ होम इति पूर्वपक्षः ।

अत्र सिद्धान्तः– विद्वानेवाऽधानेऽधिकारी भवति[३५] । अनुपनीतस्य विद्याभावादाधानेऽधिकारो न भवति । तस्मादाहवनीयासम्भवाल्लौकिकेऽग्नावुपनयनहोमः कर्तव्यः ।

११. दैवकर्मकालः

उपनयनादीनां संस्काराणां पद्धतेः साङ्गोपाङ्गं विवरणं गृह्यसूत्रेषु समुपलभ्यते । उपनयनचूडाकरणादीनि दैवानि कर्माणि कदा कर्तव्यानीति विषये मीमांसाशास्त्रस्य षष्ठेऽध्यायेऽष्टमे पादे विचारः कृतो वर्तते ।

तत्र उपनयन-चूडाकरणादीनि दैवानि कर्माणि किं सर्वदा कर्तव्यानि उत उदगयनादिष्वेवेति संशये विशेषाभावात् सर्वदैवाधिकार इति पूर्वपक्षः । सिद्धान्तस्तु– स्मृतौ उदगयन-पूर्वपक्ष-पुण्याहरूपः कालो विहितोऽस्ति[३६] । तस्मादुपनयनादीनि उदगयन-शुक्लपक्ष-पुण्याहेषु कर्तव्यानीति । तथा चोक्तं सूत्रकारेण–

"उदगयन-पूर्वपक्षा-हःपुण्याहेषु दैवानि स्मृतिरूपान्यार्थदर्शनात् । अहनि च कर्मसाकल्यम्"[३७] इति ।

मण्डनमिश्रैरपि **"पूर्वाह्णादौ देवकार्याणि कुर्यात्"**[३८] इत्युक्त्वाऽस्याऽधिकरणस्य सारः प्रस्तुतः ।

१२. दर्विहोमाः

अष्टमाध्यायस्य चतुर्थपादादौ "यदेकया जुहुयाद् दर्विहोममेव कुर्यात्"[३९] इत्यत्र दर्विहोमपदेन गुणविधानं न क्रियते, किन्तु दर्विहोमपदं नामाऽस्तीति निर्णीय[४०] तत् स्मार्तानां स्थालीपाकादीनां नामाऽस्ति, वैदिकानां वास्तुहोमादीनामपि नामाऽस्तीति साधितम्[४१] ।

एतदतिरिक्ता अपि स्मार्ता विषया धर्ममीमांसाशास्त्रे स्थाने स्थाने प्रसङ्गप्राप्ततया समुल्लिखिताः सन्ति । षष्ठस्य द्वितीये गुरुवन्दनादेर्निमित्तावृत्तावावृत्तिर्भवतीति निर्णीतम्[४२] । सप्तमाध्यायस्य चतुर्थपादे

---

३४. काठकसंहितायाम् ९।१५ ।

३५. ज्ञाते च वाचनं न ह्यविद्वान् विहितोऽस्ति ।– इति जैमिनीयधर्ममीमांसासूत्रे ३।८।१८ ।

३६. उदगयन आपूर्यमाणपक्षे कुमार्याः पाणिं गृह्णीयात् ।– इति पारस्करगृह्यसूत्रे १।४।५।

३७. जैमिनीयधर्ममीमांसासूत्रे ६।८।२३-२४ ।

३८. मीमांसानुक्रमणिकायाम् ६।८।६ ।

३९. तैत्तिरीयसंहितायाम् ३।४।१० ।

४०. दर्विहोमा यज्ञाभिधानं होमसंयोगात् ।– इति जैमिनीयधर्ममीमांसासूत्रे ८।४।१ ।

४१. स लौकिकानां स्यात् कर्तुस् तदाख्यत्वात् । सर्वेषां वा दर्शनाद् वास्तुहोमे ।– इति तत्रैव ८।४।२-३ ।

४२. याथाकाम्यमुतावृत्तिर्गुरोरनुगमादिषु ।
स्यादाद्यः प्रीतिहेतुत्वान्नियमादृष्टतोऽन्तिमः ॥ – इति जैमिनीयन्यायमालायाम् ६।३।१०, १२ श्लो., ३५२ पृ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सौर्यादौ कुतश्चिद् धर्मातिदेशो भवतीति सिद्धे स्मार्तस्थालीपाकादितो धर्माणामतिदेशो भवेदित्याशङ्क्य परिहृतम्[४३]। द्वादशस्य द्वितीये त्रेताग्नौ श्रौतकर्मैव भवति न स्मार्तमिति स्पष्टीकृतम्[४४]।

इत्थं स्मृतेः प्रामाण्यं साधयित्वा केषाञ्चन स्मार्तविषयाणां तु साक्षादपि विचारो जैमिनीय-धर्ममीमांसाशास्त्रे कृतः समुपलभ्यते ॥

आधारग्रन्थाः

१. **ऋग्वेदसंहिता**, स्वाध्यायमण्डलम्, पारडीनगरम्, पञ्चमं संस्करणम्, १९८९ कै. ।

२. **तैत्तिरीयसंहिता** (आत्रेय-तैत्तिरीय-कृष्णयजुर्वेदसंहिता), सायणभाष्ययुता (अष्टौ भागाः), आनन्दाश्रमः, पुणेः, (तृ.सं.,१९५९ कै.) ।

३. **काठकसंहिता**, कठकृष्णयजुर्वेदसंहिता), सम्पादकः श्रीपाद-दामोदर-सातवलेकरः (प्र.सं. १९४३ कै.), चतुर्थं संस्करणम् (?), स्वाध्यायमण्डलम्, पारडीनगरम्, गुर्जराः ।

४. **मैत्रायणीयसंहिता**, सम्. श्रीपाद-दामोदर-सातवलेकरः (प्र.सं. औन्धनगरम्, १९४२ कै.), चतुर्थ संस्करणम् (?), स्वाध्यायमण्डलम्, पारडीनगरम्, गुर्जराः ।

५. **मा.वा.शुक्लयजुर्वेदसंहिता**, सम्. दौलतरामगौडः (प्र.सं. १९४४ कै.), चौखम्वाविद्याभवनम्; वाराणसी (गुटका) २०४४ वै. (१९८७ कै.), पुनर्मु. २००२ कै. ।

६. **मा.वा.शतपथब्राह्मणम्**, यथोपलब्धहरिस्वामि-सायण-वासुदेवभाष्यसहितम् (पञ्च भागाः), गङ्गा-विष्णु-श्रीकृष्णदासः, कल्याण, मुम्वयी, १९४० कै., पुनर्मु. नागप्रकाशकः, दिल्ली, १९९० कै. ।

७. **आपस्तम्बश्रौतसूत्रम्**, रुद्रदत्तविरचितवृत्तिसहितम्, सम्. रिचाई-गार्वेः (Richard Garbe), प्र.सं., एसियाटिक सोसाइटि, विब्लियोथिका इण्डिका, कलकत्ता, (१८८२-१९०२ कै.) पुनर्मु. मुन्शीराम., नूतनदिल्ली (त्रयो भागाः), १९८३ कै. ।

८. **आश्वलायनगृह्यसूत्रम्**, हरदत्तमिश्रकृतया अनाविलया वृत्त्या सहितम्; सम्. टी. गणपति-शास्त्री, अनन्तशयनग्रन्थावलिः, ग्रन्थाङ्कः ७८, १९२३ कै. ।

९. **कौषीतकिगृह्यसूत्रम्**, भवत्रातव्याख्यायुतम्; सम्. टी.आर. चिन्तामणिः, (प्र.सं. मद्रास-वि.वि., १९४४ कै.), पुनर्मु. पाणिनिः, नूतनदिल्ली, १९८२ कै.।

१०. **पारस्करगृह्यसूत्रम्**, कर्क-जयराम-हरिहर-गदाधर-विश्वनाथभाष्यपञ्चकसहितम्, सम्. महादेवशर्मा, गुजराती-मुद्रणालयः, मुम्वयी, १९१७ कै., पुनर्मु. मुन्शीराम., नूतनदिल्ली, १९८२ कै. ।

११. **आपस्तम्बधर्मसूत्रम्**, हरदत्तमिश्रविरचितया उज्ज्वलाख्यया वृत्त्या सहितम् (प्र.सं. १९३२ कै.), चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, द्वि.स. १९६९ कै. ।

१२. **गौतमधर्मसूत्रम्**, हरदत्तकृतमिताक्षरायुतम्, आनन्दाश्रमः, द्वि.सं. १९३१ कै. ।

१३. **अष्टाध्यायी**, सम्. गोपालशास्त्री "दर्शनकेशरी", चौखम्बा-सुरभारती-प्रकाशनम्; वाराणसी, १९७६ कै.।

१४. **वेदाङ्गज्योतिषम्**, सोमाकरभाष्य-कौण्डिन्न्यायनव्याख्यानयुतम्, चौखम्वाविद्याभवनम्; वाराणसी, २००५ कै. ।

१५. **मनुस्मृतिः**, कुल्लूकभट्टविरचितया मन्वर्थमुक्तावल्याख्यया व्याख्यया सहिता, सम्. नारायणराम आचार्यः काव्यतीर्थः, निर्णयसागरमुद्रणालयः, मुम्वयी, दशमं संस्करणम्, १९४६ कै. ।

---

४३. विध्यन्तोऽपेक्षितस्तत्र लौकिको वाथ वैदिकः ।
आद्यो निवन्धराहित्यादन्त्यो धीसन्निकर्षतः ॥ – इति जैमिनीय-न्यायमालायाम्, ७।४।२, २ श्लो., ४२१ पृ. ।

४४. सर्वार्थो वैदिकार्थो वा विहारः शक्तिमत्त्वतः ।
आद्यः प्रत्यक्षवचनैर्निराकाङ्क्षत्वतोऽन्तिमः ॥ – इति तत्रैव १२।२।१, १ श्लो., ६९४ पृ. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१६. **श्रीमज्जैमिनिप्रणीतं मीमांसादर्शनम् (जैमिनीय-धर्ममीमांसासूत्रम्)**, शाबरभाष्य-तन्त्रवार्त्तिक-टुप्टीका-सहितम् (सप्त भागाः), सम्. सुब्बाशास्त्री, काशीनाथ-वासुदेवशास्त्री अभ्यङ्करः, गणेशशास्त्री जोशी, आनन्दाश्रमः, पुणेः, १९५३ कै. (तृ.सं.), १९७० कै. द्वि.सं.), १९७१ कै. (द्वि.सं.), १९७२ कै. (द्वि.सं.), १९३२ कै. (प्र.सं.), १९३३ कै. (प्र.सं.), १९३४ कै. (प्र.सं.)।

१७. **श्लोकवार्त्तिकम्**, कुमारिलभट्टपादविरचितम्, पार्थसारथिमिश्रविरचितया न्यायरत्नाकरव्याख्यया सनाथम्, सम्पा. द्वारिकादासशास्त्री, तारा पब्लिकेसन्स, वाराणसी, २०३४ वै. ।

१८. **मीमांसानुक्रमणिका**, मण्डनमिश्रकृता, गङ्गानाथझाशर्ममैथिलरचितेन मीमांसामण्डनेन मण्डिता, सम्. ढुण्ढिराजशास्त्री, चौखम्वा संस्कृत सीरीज आफिस, वनारस सिटी (वाराणसी), १९८७ वै. ।

१९. **जैमिनीयन्यायमाला**, माधवाचार्यविरचिता, जैमिनीयन्यायमालाविस्तरेण सहिता प्र.सं., सम्. जीवानन्दविद्यासागरभट्टाचार्यः, कलिकता, (१८८३ कै.), द्वि.सं., सम्. रामनाथदीक्षितः, पण्डिचेरी, १९८३ कै. ।

२०. **नैपालधर्मशास्त्रिकृतधर्मशास्त्रनिबन्धानां मीमांसान्यायदृष्ट्या संक्षिप्तं पर्यालोचनम्**, लघ्वनुसन्धानप्रवन्धः, प्रमोदवर्धनकौण्डिन्न्यायनरचितः, नेपाल-संकृतविश्वविद्यालयानुसन्धान-केन्द्रेण स्वीकृतः, २०५५ वै.।

२१. **कतिपयवैदिकयज्ञपरिचयः**, प्रमोदवर्धनः कौण्डिन्न्यायनः, स्वादध्यायशाला, काष्ठमण्डपजनपदः, २०६७ वै. ।

२२. **पूर्वमीमांसोद्धरणकोशः**, धन्नालाल-जवाहरलालाऽग्रवालः, वैदिकसंशोधनमण्डलम्, पुणेः, २०४१ वै. ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सबाधबीजबाध्यबाधकभावविचारः

मोहनप्रसादः पोखेल
उपप्राध्यापकः

पाणिनीयव्याकरणशास्त्रे शास्त्राणां बलावलप्रसङ्गे "पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः[1] इति परिभाषारूपः सिद्धान्तो हि मूलमन्त्रोऽस्ति। अत्रोत्तरोत्तरमिति कथनस्येदं तात्पर्यमस्ति यदुत्सर्गपूर्वशास्त्रापेक्षया परशास्त्रम्, परशास्त्रापेक्षया नित्यशास्त्रम्, नित्यशास्त्रापेक्षयान्तरङ्गशास्त्रम्, अन्तरङ्गशास्त्रापेक्षयापवादशास्त्रं बलवद् भवतीति। एतावता पूर्वादिशास्त्रापेक्षया परादिशास्त्राणां वलवत्त्वञ्च सिद्धयत्येव। अत्र शास्त्राणां बलाबलप्रसङ्गस्य चिन्तनेनेदं सिद्धं भवति यद्- यत्रोभयोः शास्त्रयोः सकृदुपस्थितिर्भवति तत्रोत्सर्गपूर्वशास्त्रापेक्षया परादिशास्त्रेण कार्यं क्रियते। लोकेऽपि येन प्रकारेण वलवान् दुर्वलं वाधते, शास्त्रेऽपि तेनैव प्रकारेण बलवच्छास्त्रेण दुर्वलच्छास्त्रं बाध्यते। अत्रैतादृशस्य शास्त्रस्य बलाबलत्वभाव-विचारात्पूर्वं शास्त्रे बाध्यबाधकभावे उपयोगे आनीतानि बाधबीजानि कानीति विषये विचारः क्रियते।

वस्तुतो व्याकरणशास्त्रे शास्त्रस्य बलावलत्वचिन्तनावसरे शास्त्रज्ञैर्बाधवीजान्यपि चिन्तितानि। आचार्यवर्येरत्र शास्त्रे यानि वाध्यवाधकभावविषये चत्वारि वाधबीजानि उपयोगे आनीतानि तेषामतिसंक्षेपेण स्वरूपाणि सोदाहरणमुपस्थाप्यन्ते–

१. तदप्राप्तियोग्येऽचरितार्थम्

इदं प्रथमं बाधवीजम्। यत्रोत्सर्गशास्त्रस्य प्रवृतिर्न स्यात्तत्रापवादशास्त्रस्यापि प्रवृति र्न भवति। अस्येदं तात्पर्यं यत्र 'आद्गुणः'[2] इति शास्त्रेण गुणस्य प्राप्ति र्न स्यात्तत्र वृद्धिरेचि[3] इति शास्त्रस्यापि प्रवृत्ति र्न भवति। अनेनैव प्रकारेण यत्र 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'[4] इति शास्त्रेण लोपो न प्राप्यते तत्र सम्बुद्धौ च[5] इति शास्त्रेणाकारस्यैकारो न प्राप्यते। अतस्तदप्राप्तियोग्ये - 'आद् गुणः' हल्ङ्याब्भ्यो दीर्घात् इत्यनयोरप्राप्तिस्थले वृद्धिरेचि, सम्बुद्धौ चेति सूत्रेअचरितार्थे अप्रवृत्ते भवतः।

१. भट्टो नागेशः- परिभाषेन्दुशेखरः (चौखम्वा संस्कृत-संस्थान, चतुर्थसंस्करणं, वि.स.२०३५, वाराणसी) परिभाषा संख्या ३८।
२. पाणिनिः, अष्टाध्यायी ६।१।८७ सूत्रम्।
३. पाणिनिः ६।१।८८ सूत्रम्।
४. पाणिनिः ६।१।६८ सूत्रम्।
५. पाणिनिः ७।३।१०६ सूत्रम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. तदप्राप्तियोग्येऽचरितार्थे सति कृतेऽपि चरितार्थम्

इदं द्वितीयं वाधवीजम्। यत्रोत्सर्गशास्त्रस्य प्रवृति र्न भवति तत्रापवादशास्त्रस्यापि प्रवृति र्न भवति। परन्तूत्सर्गशास्त्रस्य प्रवृत्तेरनन्तरमप्यपवादशास्त्रस्य तत्र प्रवृति र्भवत्येव। तदप्राप्तियोग्ये - उत्सर्गशास्त्रस्याप्राप्तिस्थले, अचरितार्थे अपवादशास्त्रस्य प्रवृत्तेरभावे सति कृतेऽपि, उत्सर्गशास्त्रस्य प्रवृतेरनन्तरमपि चरितार्थम् अपवादशास्त्रस्य प्रवृत्तिर्निर्बाधा एव। अस्येदं तात्पर्यं यत्र 'ह्रस्वनद्यापो नुट्'[६] इत्यस्याप्राप्तिस्तत्र 'आमि सर्वनाम्नः सुट्'[७] इत्यस्यापि अप्राप्तिः, परन्तु नुटि कृते सत्यपि सुट् चरितार्थो भवत्येव। अस्मात्कारणादांविधायके शास्त्रे ससुट्को निर्देशः कर्तव्य इत्युक्तमत्र शास्त्रे।

३. तदप्राप्तियोग्येऽचरितार्थे सति कृतेऽपि अचरितार्थम्

इदं तृतीयं बाधवीजम्। उत्सर्गशास्त्रस्याप्राप्तिस्थलेऽपवादशास्त्रस्य प्रवृत्यभावे सत्युत्सर्गशास्त्रस्य प्रवृत्तेरनन्तरमप्यपवादशास्त्रस्य प्रवृत्तेः सुतरामभाव एवेति। अस्येदं तात्पर्यं यत्र 'याडापः'[८] इति शास्त्रेण याडागमस्याप्राप्तिस्तत्र 'ङेराम्नद्यांनीभ्य'[९] इति शास्त्रस्यापि प्रवृत्ति र्न भवति। याटि कृते सत्यपि पुनः 'ङेराम्नद्यांनीभ्य' इत्यस्य शास्त्रस्याचारितार्थ्यमेव। अतो रमा+ङि इत्यवस्थायां प्रथममाम्, ततो याड् भवति।

४. तदप्राप्तियोग्येऽचरितार्थे सति अपवादशास्त्रप्रवृत्युत्तरमुत्सर्गशास्त्रस्य प्रवृतौ अपवादशास्त्र-प्रणयनव्यैर्थत्वसंभावना च

इदं चतुर्थं बाधवीजम्। उत्सर्गशास्त्रस्याप्राप्तिस्थलेऽपवादशास्त्रमचरितार्थम्। अपवादशास्त्र-प्रवृत्युत्तरमुत्सर्गशास्त्रस्य प्रवृतौ त्वपवादशास्त्रप्रणयनस्य वैयर्थ्यं स्पष्टमेव। अस्येदं तात्पर्यम् - ज्ञानम् इत्यत्र ज्ञान+सु इत्यवस्थायां 'स्वमोर्नपुंसकात्'[१०] इति शास्त्रेण लोपे प्राप्ते अतोऽम्[११] इत्यपवादशास्त्रेण लोपं बाधित्वा अमादेशो विधीयते। कृते अमादेशेऽपि पुनः 'स्वमोर्नपुंसकात्' इत्युत्सर्गशास्त्रेण लुक् प्राप्नोति, किन्त्वत्र लुङ्न भवति। लुकि कृते तु 'स्वमोर्नपुंसकात्' इत्युत्सर्गशास्त्रस्यापवादरूपेण पठितमतोऽम् इति शास्त्रप्रणयनस्य वैयर्थ्यं स्पष्टमेव। अस्मात्कारणादपवादशास्त्रप्रवृत्युत्तरमुत्सर्गशास्त्रस्य प्रवृतिर्भवितुं न शक्नोतीति।

एतानि चत्वारि बाधवीजान्युपस्थाप्य अत्र पूर्वपरादिशास्त्राणां बाध्यबाधकभावविषये चर्चा क्रियते-

५. पूर्वात्परं बलवत्

सामान्यतः पूर्वशास्त्रापेक्षया परं शास्त्रं बलवद् भवति। यदा पूर्वशास्त्रं नित्यमन्तरङ्गमपवादश्च स्यात्तर्हि न परं शास्त्रं बलवद् भवितुं शक्नोति। पूर्वात्परं बलवद् इत्यस्योदाहरणं प्रस्तूयते- 'रामेभ्यः'

---

६. पाणिनिः ७।१।५४ सूत्रम्।
७. पाणिनिः ७।१।५२ सूत्रम्।
८. पाणिनिः ७।३।११३ सूत्रम्।
९. पाणिनिः ७।३।११६ सूत्रम्।
१०. पाणिनिः ७।१।२३ सूत्रम्।
११. पाणिनिः ७।१।२४ सूत्रम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इति। 'फलाय' इत्यत्र पूर्वशास्त्रं 'सुपि च'[१२] इति चरितार्थम्। अत्र परशास्त्रं 'बहुवचने झल्येत्'[१३] इत्यस्य चाप्राप्तिः। एवञ्च 'रामेषु' इत्यत्र 'वहुवचने झल्येत्' इति परशास्त्रं चरितार्थम् पूर्वशास्त्रस्य चात्राप्राप्तिः। 'रामेभ्य' इत्यत्र तूभयोः सावकाशशास्त्रयोः सकृदुपस्थिति दृश्यते। एतादृशस्थले विप्रतिषेधनियमेन परत्वात् सुपि चेति शास्त्रं वाधित्वा 'बहुवचने झल्येत्' इति परशास्त्रेण एत्वं भवति। इदमेव पूर्वात्परं बलवद् भवतीत्यस्योदाहरणम्।

६. परान्नित्यं बलवत्[१४]

पूर्वशास्त्रापेक्षया परशास्त्रं बलवद् भवति। परन्तु पूर्वशास्त्रं यदा नित्यं स्यात्तदा परान्नित्यमेव बलवद् भवति। 'नुदति' इत्यस्योदाहरणं भवितुं शक्नोति। प्रेरणार्थकणुद्धातुतः तिप्प्रत्यये कृते नुद् ति इति भवति। अस्यामवस्थायां 'तुदादिभ्यः शः'[१५] इति शप्रत्ययं 'पुगन्तलघूपधस्य च'[१६] इति लघूपधगुणञ्च सकृत्प्राप्नोति। अत्र गुणविधायकं सूत्रं यद्यपि परशास्त्रं वर्तते तथाप्यत्र गुणं बाधित्वा शप्रत्ययो भवति। शप्रत्ययविधानानन्तरं ङित्वाद् गुणो न भवित। प्रथमं गुणे कृते तु शप्रत्ययो भवत्येव। अतः 'कृताकृतप्रसङ्गी यो विधिः स नित्य' इति नियममाश्रित्य नित्यत्वाच्च गुणं वाधित्वात्र शप्रत्ययो विहितः। इदमेव परान्नित्यस्य बलवत्ताया उदाहरणम्।

७. परादन्तरङ्गं बलीयः

परशास्त्रापेक्षयान्तरङ्गशास्त्रं बलवद् भवति। 'उभये देवमनुष्या' इत्युदाहरणे सर्वनामसञ्ज्ञाविधानावसरे 'सर्वादीनि सर्वनामानि'[१७] इति शास्त्रापेक्षया 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च'[१८] यद्यपीदं परं शास्त्रं वर्तते तथापि जस्विभक्त्यपेक्षितत्वाद् बहिरङ्गं भवति। तस्मादसिद्धं बहिरङ्गमन्तरङ्गे[१९] इति परिभाषाबलात् 'सर्वादीनि सर्वनामानि' इत्यनेनैवात्र सर्वनामसंज्ञा भवति। इदमेव परादन्तरङ्गस्य बलक्त्वस्योदाहरणम्।

८. परादपवादो बलीयान्

परशास्त्रापेक्षयापवादशास्त्रं बलवद् भवति। 'दध्ना' इत्यत्रानङ्ङादेशावसरे 'ङिच्च'[२०] इति शास्त्रापेक्षया 'अनेकाल्शित् सर्वस्य'[२१] इदं यद्यपि परं वर्तते तथाप्यस्यैवापवादरूपेण पठितत्वात् ङिच्चेत्यनेन तद्वाधित्वान्त्यादेशो विहितः। इदमेव परादपवादस्य वलवत्वस्योदाहरणम्।

१२. पाणिनिः ७।३।१०२ सूत्रम्।
१३. पाणिनिः ७।३।१०३ सूत्रम्।
१४. भट्टो नागेशः परिभाषेन्दुशेखरः पूर्ववत्- परिभाषा संख्या ४२।
१५. पाणिनिः पूर्ववत् ३।१।७७
१६. पाणिनिः ७।३।८६
१७. पाणिनिः १।१।२७
१८. पाणिनिः १।१।३३
१९. भट्टो नागेशः- परिभाषेन्दुशेखरः पूर्ववत्- परिभाषा संख्या ५०।
२०. पाणिनिः पूर्ववत् १।१।५३
२१. पाणिनिः १।१।५५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. नित्यादन्तरङ्गं बलीयः

नित्यशास्त्रापेक्षयान्तरङ्गशास्त्रं बलवद् भवति। 'ग्रामणीनि कुलानि' इत्युदाहरणे नित्यान्तरङ्गशास्त्रयोः सकृदुपस्थिति दृश्यते। इकोऽचि विभक्तौ[22] इदं नित्यशास्त्रं, 'ह्रस्वोनपुंसके प्रातिपदिकस्य'[23] इदन्त्वन्तरङ्गशास्त्रं ग्रामणीशाब्दाज्जसि तस्य स्थाने शि आदेशे कृते उभयोः शास्त्रयोः सकृदुपस्थिति र्भवति। अत्र नित्यशास्त्रेण नुमि कृते सत्यजन्तत्वाभावाद् 'ह्रस्वोनपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वस्य प्राप्तिरेव न भवति। ह्रस्वे कृते तु नुम् भवत्येव। नुमागमो ह्यत्र विभक्तिमपेक्षते, ह्रस्वविधाने तु विभक्तेरपेक्षा नास्ति। वह्वपेक्षं वहिरङ्गमल्पापेक्षमन्तरङ्गमिति नियमसत्वादल्पापेक्षितत्वाच्चात्र ह्रस्वविधायकं शास्त्रमन्तरङ्गशास्त्रं वर्तते। एवं नुम्विधायकं शास्त्रमत्र नित्यमस्ति। नित्यादपि वहिरङ्गत्वान्नुमागमविधायकं शास्त्रं वाधित्वान्तरङ्गेण ह्रस्वविधायकेन शास्त्रेण प्रथमं ह्रस्वो विहितस्ततो नुम्। इदमेव नित्यादन्तरङ्गस्य वलवत्वस्योदाहरणम्।

अन्तरङ्गादपि अपवादो बलीयान्

अन्तरङ्गशास्त्रापेक्षयापवादशास्त्रं वलीयो भवति। 'श्रीश' इत्युदाहरणे श्री+ईश इत्यवस्थायाम् 'इको यणचि'[24] इति यणम्, अकः सवर्णे दीर्घः[25] इति सवर्णदीर्घञ्च प्राप्नोति। अत्र सवर्णदीर्घविधायक-शास्त्रापेक्षया यण्विधायकं शास्त्रं यद्यप्यन्तरङ्गं वर्तते तथाप्यत्रापवादत्वाद् यणं वाधित्वा सवर्णदीर्घो भवति। इदमेवान्तरङ्गादपवादस्य बलवत्ताया उदाहरणम्।

१०. निष्कर्षः

पाणिनीयव्याकरणशास्त्राध्येतृभिः सर्वैरपि बाध्यबाधकभावे उपयोगे आनीतानि वाधबीजानि सम्यक् ज्ञात्वा तज्ज्ञानपूर्वकं परादीनां शास्त्राणां स्वरूपाणि सम्यक्तया वोध्यानि भवन्ति। अन्यथा युगपच्छास्त्रद्वय-प्रवृत्तिस्थले किङ्कर्तव्यता सर्वेषां पुर उपतिष्ठते। अत्र परिभाषेन्दुशेरस्थवाधवीजोपस्थापिकाःपरिभाषा उपजीव्याः।

सन्दर्भग्रन्थाः

१. भट्टो नागेशः- परिभाषेन्दुशेखरः (तत्वप्रकाशिकासहिता भैरवी टीका), चौखम्वासंस्कृतसंस्थानं, चतुर्थसंस्करणं, वि.सं. २०३५, वाराणसी।

२. पाणिनिः- अष्टाध्यायी, चौखम्बा सुरभारतीप्रकाशनं, सन् १९७५, वाराणासी।

३. दीक्षितः भट्टोजी- वैयाकरणसिद्धान्तकौमुदी मूलमात्रम्, चौखम्वा ओरियन्टालिया प्रकाशनं, द्वितीयं संस्कणं, सन् १९७५, वाराणसी।

---

२२. पाणिनिः १।१।७३ सूत्रम्।

२३. पाणिनिः १।२।४७ सूत्रम्।

२४. पाणिनिः ६।१।७७ सूत्रम्।

२५. पाणिनिः ६।१।१०१ सूत्रम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वानन्दकरणे विपरिणामाधिकारस्योपपत्तिः

जयन्त आचार्यः
उपप्राध्यापकः

धनं स्पर्शजीवा तुलाजत्रये स्या-
दृणं शेषषड्भेष्वथो कर्किषट्के ।
स्थिते वैषुवे जूककर्कित्रिभस्थे-
प्सिता भोगजस्पर्शजीवा धनर्णम् ॥१॥

प्रथमे द्वितीये च पदे ज्याया धनत्वं तृतीये चतुर्थे च ऋणत्वमिति त्रिकोणमिति ज्ञानमतिरोहितमेव । कोटिज्या तु प्रथमे चतुर्थे च पदे धनात्मिकाऽन्यत्राधनात्मिकेति च सुस्पष्टमेव । तेन प्रथमे चतुर्थे च पदे स्पर्शज्या क्रमेण धनात्मिकाऽधनात्मिकेति च । तथैव द्वितीयपदे ऋणात्मिका तृतीये पदे स्पर्शज्या धनात्मिका । अतस्तुलाजत्रये (प्रथमे तृतीये च पदे) स्पर्शजीवा धनात्मिका शेषषड्भे ऋणात्मिकेति सूत्रोक्तमुपपन्नम् ।

अथ विषुवांशवशादपि स्पर्शज्याया धनर्णत्वं प्रदर्श्यते । यदा कर्किषट्के (क.सि.क.तु.वृ.ध.) विषुवांशास्तदा धनर्णत्वविचारः । तुलादित्रये (जूकादित्रये) नाम तृतीये पदे यदि विषुवांशास्तदा भोगजस्पर्शजीवाया धनत्वम् । यतो हि तत्र ज्याकोटिज्ययोर्द्वयोरपि ऋणत्वम् तेन फलं धनम् (समचिह्नत्वात्) । कर्कित्रिभस्थे विषुवांशे (द्वितीयपदे) भोगजस्पर्शजीवाया ऋणत्वम् । (ज्याकोटिज्ययोर्भिन्नचिह्नत्वात्) इति दिक् ।

मृगाद्यङ्गभे वैषुवे सा स्पृशज्याऽ
जनक्रादिराशित्रये चावगम्या ।
द्युसद्भोगतो वैषुवांशास्तु चैवं
ऋणांशस्पृशज्यागुणाव्यस्तचिह्ना ॥२॥

उपपत्तिः

मृगाद्यङ्गभे वैषुवे सा स्पृशज्याऽजनक्रादिराशित्रये चावगम्या इत्यस्य पूर्वेणान्वयः । अतः परं मकरादिराशिषट्के (म.कु.मी.मे.वृ.मि.) प्रथमे चतुर्थे च पदे स्थिते विषुवांशानां धनर्णत्वविचारः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यदाऽचादित्रये विषुवांशास्तत्र ज्याकोटिज्ये धनात्मिके तेन तज्जनितायाः स्पर्शज्याया धनत्वम् । मकरादित्रये (चतुर्थे पदे) ज्याया ऋणत्वं कोटिज्याया धनत्वं तेन तत्र स्पर्शज्या ऋणात्मिकेति ।

पूर्वं तु विषुवांशवशाद्भोगस्पर्शज्याया धनर्णत्वं साधितमिदानीं भोगांशवशादपि विषुवांशानां धनर्णत्वं साध्यते । यदि कर्कादिषट्के भोगांशास्तत्र कर्कादित्रये विषुवांशानामृणत्वम् । तुलादित्रये च धनत्वम् तथैव मकरादिषट्के यदि भोगांशास्तत्र मकरादित्रये विषुवांशानामृणत्वं मेषादित्रये च धनत्वमिति सर्वमुपपन्नम् ।

पदं पाद उक्तोऽजतस्त्रित्रिभैस्ते
चतुः संख्यकाश्चाथ दोरोजपादे ।
पदाद्यंशयुक्तः पदे युग्मकाख्ये
पदांतांशशुद्धस्तदुत्थं धनुः स्यात् [1] **॥३॥**

उपपत्तिः

पदं पादश्च पर्यायवाचिनौ । त्रिभैरेकं पदम् । तदारम्भस्तु मेषादितो भवति । वृत्ते चत्वारि पदानि । ओजपादे (विषमपादे = प्रथमे तृतीये च) भुजानयनार्थं मेषादितो गतचापं (ग्रहभुक्तचापं) योज्यम् । अर्थात् प्रथमे मेषादौ तु गतचापस्य शून्यत्वम् । तत्र भुजांशाः शून्यमिताः । ततो यथा यथा चापो वर्धते तथा तथा भुजांशा वर्धन्ते । तत्र मेषादितो गतचापतुल्यमेव भुजमानम् । तृतीये तु गतपदाद्यंशा १८० स्तैर्युक्तचापो भुजसंज्ञः । युग्मपदे द्वितीये चतुर्थे च पदे तु पदान्तांशशुद्धोऽर्थात् द्वितीये पदे १८० तो गतचापभागाः शोध्याश्चतुर्थे ३६० तः गतचापभागाः शोध्याः शेषं भुजसंज्ञमिति अयुग्मे पदे यातमेष्यं तु युग्मे भुजः इति भास्करोक्तिवत् सर्वमुपपन्नम् ।

भोगशराभ्यां क्रान्तिसाधनमाह

शरात्कोटिजीवान्घभोगोत्थमौर्वी
द्विविश्वेषुपक्षोद्धृता स्यादृणत्वम् ।
प्रभोगे तुलाजाङ्गभेऽत्राद्यमुक्त-
मथो बाणजीवां स्वसूर्यांशहीनाम् ॥४॥

विदध्यात् भवेत्साह्युदक्याम्यबाणे
धनर्णं क्रमात् संस्कृतैषाद्यकेन ।
ज्यकेष्टा धनुः क्रान्तिरत्रस्वयोर-
स्वयोर्योग उक्तोऽन्तरं स्वाऽराश्योः ॥५॥

---

१. दोस्त्रिभोनं त्रिभोर्ध्वं विशेष्यं रसैश्चक्रतोऽङ्गाधिकं स्याद् भुजोनं त्रिभम् ।
कोटिरेकैककं त्रित्रिभैः स्यात् पदम् .... रविचन्द्रस्पष्टाधिकारे १ पद्यम् ।
ग्रहलाघवकरणम् गणेशदैवज्ञनिर्मितम्, मल्लारिविश्वनाथसुधाकरविरचिटीकासमेतम् ।
प्रकाशकः खेमराज श्रीकृष्णदासः श्रेष्ठी संवत् १९८१ शके १८४६ मुम्बई ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गो = गोलसन्धिः(नाडिक्रान्तिवृत्तयोः प्रथमसम्पातविन्दुः)

क = कदम्वस्थानम् ।

ध्रु = ध्रुवस्थानम् ।

ग्र = ग्रहविम्बकेन्द्रम् ।

गोश = भोगांशाः (क्रान्तिवृत्ते)

शअ = भोगकोट्यंशाः ।

∠ग्र क ध्रु = भोगकोट्यंशमितः ।

ग्र श = ग्रहशरचापांशाः ।

क ध्रु = परमक्रान्त्यांशाः ।

क ग्र = शरकोट्यंशाः ।



अस्माभिर्भोगांशा ज्ञातास्तथा शरश्च ज्ञात एव तेन क ग्र ध्रु त्रिभुजे ग्रन्थकारोक्त गोलवन्धाधिकारोक्त- "न्यूनिता द्रष्दृकोटिज्याऽन्यदोः कोज्यावधेन वै । अन्यदोर्मौविकाहत्या भक्ता स्यात् कोणकोज्याका" सूत्रेण वा वापूदेवोक्तसूत्रेण[२] ग्र ध्रु (द्युज्या) सम्मुखकोणकोटेर्ज्ञानं यथा

$$\text{भोगकोटयंशकोटिज्या} = \frac{\text{कोज्याद्यु} \times \text{त्रि}^2 - \text{कोज्यापरमक्रान्ति} \times \text{कोज्याकोश} \times \text{त्रि}}{\text{कोज्यापद्यु} \times \text{कोज्याश}}$$

$$\text{वा, कोज्याकोभो} \times \text{कोज्यापद्यु} \times \text{कोज्याश} = \text{कोज्याद्यु} \times \text{त्रि}^2 - \text{कोज्याप} \times \text{कोज्याकोश} \times \text{त्रि}$$

$$\therefore \text{कोज्याद्यु} = \frac{\text{कोज्याकोभो} \times \text{कोज्यापद्यु} \times \text{कोज्याश}}{\text{त्रि}^2} + \frac{\text{कोज्यकोश} \times ९१७४}{१००००}$$

$$= \frac{\text{काज्याकोभो} \times \text{कोज्यश}}{\frac{१०००००००००}{३९७९}} + \frac{\text{कोज्याकोश} \times ९.१७४}{१००००}$$

$$\text{क्राज्या} = \frac{\text{कोज्याकोभो} \times \text{कोज्यश}}{२५१३२} + \frac{\text{कोज्याकोश} \times ११}{१२}$$

अत्रेदमवधेयं प्रथमखण्डे त्रि²परमक्रान्तिज्यया भक्तः सन् २५१३२ समागच्छति । द्वितीयखण्डे तु विततभिन्नद्वारा $\frac{११}{१२}$ अस्योपपत्तिर्जायत इति[३] ।

---

२. त्रिज्यागुणाद्धरणिकोटिगुणाद्विहीनात् कोटिज्ययोर्भुजसमुत्थितयोर्वधेन ।
त्रिज्याहताच्च भुजयोर्गुणयोर्वधेन लब्धं गुणो धरणिसंमुखकोणकोटेः ॥
वापुदेवशास्त्रिणः सूत्रम्, चापीयत्रिकोणमितौ समुद्धृतम्, **काशीसंस्कृतसीरिजग्रन्थमालाया** १३९ ज्योतिप विभागे (६) षष्ठं पुष्पम् सन् १९४४ ।

३. द्वितीयखण्डस्वरुपम् . $\frac{\text{कोज्याकोश} \times ९१७४}{१००००} = \frac{\text{कोज्याकोश}}{\frac{१००००}{९१७४}}$

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रथमखण्डस्य धनर्णवासना उत्तरदक्षिणगोले शरवशेन धनर्णत्वं प्रदर्श्यते । अर्थात् सौम्ये शरकोट्यंशानां नवत्यंशाल्पत्वाद्धनत्वम् । याम्ये तेषां(शरकोट्यशानां) नवत्यधिकत्वात्तस्य ज्या ऋणात्मिकेति । तेन ह्युदग्याम्यवाणे धनर्णं क्रमादित्युक्तम् ।

प्रथमद्वितीयखण्डयोर्धनर्णवासना तु सजातीययोर्योगो विजातीययोरन्तरमिति "योगे युतिः स्यात् क्षययोः स्वयोर्वाधनर्णयोरन्तरमेव योगः" इति भास्करोक्तिवज्ज्ञेयेति ।

विषुवांशसाधनम्

शरस्पर्शजीवा नवाद्यङ्कराभै
र्हता भोगकोज्योद्धृता सौम्यबाणे ।
मृगादौ तु भोगे ऋणं कर्कटादौ
धनं याम्यबाणेऽन्यथैषाद्यमुक्ता ॥६॥

$$= \frac{\text{कोज्याकोश}}{१+\frac{८२६}{९१७४}} = \frac{\text{कोज्याकोश}}{१+\frac{१}{\frac{९१७४}{८२६}}} = \frac{\text{कोज्याकोश}}{१+\frac{१}{११}} \quad \text{स्वल्पान्तरात्}$$

$$= \frac{\text{कोज्याकोश}}{\frac{१२}{११}} = \frac{\text{कोज्याकोश}\times ११}{१२}$$

विशेषः ग्रन्थारम्भे परमक्रान्त्यंशाः = २३।२७।६

सारिण्यनुसारम् ज्या(२३।२०) = ३९६१

प्रतिकलमन्तरम् = २।४०

$\therefore$ गतज्या = ३९६१

शेषसम्वन्धिज्या = १८ (शेष × प्रतिकलमन्तरम्)

अभीष्टज्या ३९७९ (७।६) (२।४०)

$\therefore$(२३।२७।६) ज्या = ३९७९

अन्यो विशेषः =

९०।०।०
-(२३।२६।६)
६६।३३।५४ परमाल्पद्युज्याचापांशाः

सारिण्यनुसारेण (६६।३०) ज्या = ९१७१ गतज्या

प्रतिकलमन्तरम् = १।१०

(१।१०) ३ = ३।३०

गतज्या ˙ शेषसम्बन्धिज्या = ९१७१ +३ = ९१७४ = पद्यु

$\therefore$ (६६।३३।५४) ज्या = ९१७४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वसूर्यांशहीना तु भोगस्पृशज्या,
तुलाजत्रये स्वं मताऽन्यत्र चास्वम् ।
इयं त्वाद्यकेनोक्तवसंस्कृतेष्टा
स्पृशन् मौर्विकेतो धनुर्वैषुवांशाः ॥७॥

उपपत्तिः



क = कदम्वस्थानम्
ध्रु = ध्रुवस्थानम्
ग्र = ग्रहः
ग्रश = ग्रहशरः
कध्रु = परमक्रान्त्यंशाः
ध्रुग्र = द्युज्याचापांशाः
गोश = भोगांशाः(क्रान्तिवृत्ते)
गो = गोलसन्धिः

कध्रुग्र चापीयत्रिभुजे ∠कध्रुग्र = शीर्षकोणः
शीर्षकोणः = १८० -(९० -वि) = १८०-९०+वि = ९० + वि
ज्या(९०+वि) = कोज्यावि (त्रिकोणमितितः)
कोज्या(९०+वि) = -ज्यावि

कोस्प (९०+वि) = $\frac{\text{कोज्य (९० + वि)}}{\text{ज्या (९० + वि)}} = \frac{-\text{ज्यावि}}{\text{कोज्यावि}} = -$ स्पवि

पूर्वभुजः = द्युज्याचापः = द्यु
अन्यभुजः = परमक्रान्तिचापः = प
पूर्वभुजस्य संमुखकोणः = ∠ ध्रु अथवा ग्र
∴∠ ध्रु क ग्र = भोगकोटिः = ९० -भो
ज्या(९०-भो) = कोज्याभो
पूर्वभुजसंमुखस्य कोणस्य ज्या = कोज्याभो ।
पूर्वभुजसंमुखस्थकोणकोटिज्या = ज्याभो ।

∴ स्पश = $\frac{\text{स्पवि} \times \text{कोज्याभो} + \text{ज्याभो} \times \text{कोज्याप}}{\text{ज्याप}}$ [४]

---

४. चापत्र्यस्रेपूर्वदोः संमुखीन
कोणज्यान्घी शीर्षकोणप्रजानाम् ।
कोटिच्छायां पूर्वदोसंमुखास्र-
कोटिज्यान्घी कोटिमौर्व्यान्यवाहोः ॥
युक्ता योग्यं संभजेदन्यवाहुं
मौर्व्या सिद्धेत् कोटिभामूमिजाना ॥ नयराजपन्तस्य सूत्रम् अप्रकाशितम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वा, स्पश × ज्याप = -स्पवि×कोज्याभो + ज्याभो × कोज्याप

$$\therefore \text{स्पवि} = \frac{\text{ज्या प} \times \text{स्पश}}{\text{कोज्यभो}} + \frac{\text{ज्याभो} \times \text{कोज्याप}}{\text{कोज्याभो}}$$

$$= -\frac{\text{ज्या प} \times \text{स्पश}}{\text{कोज्यभो}} + \text{स्पभो} \times \text{काज्याप}$$

त्रिज्यायां परिणामनेन

$$\frac{\text{स्पवि}}{\text{त्रि}} = -\frac{\frac{\text{ज्याप}}{\text{त्रि}} \times \frac{\text{स्पश}}{\text{त्रि}}}{\frac{\text{कोज्याभो}}{\text{त्रि}}} + \frac{\text{स्पभो} \times \text{कोज्याप}}{\text{त्रि} \times \text{त्रि}}$$

$$\therefore \text{स्पवि} = -\frac{\text{ज्याप} \times \text{स्पश}}{\text{कोज्याभो}} + \frac{\text{स्पभो} \times \text{कोज्याप}}{\text{त्रि}}$$

$$\text{विस्प} = -\frac{\text{शर स्पर्शरेखा} \times \text{३९७९}}{\text{भोकोज्या}} + \frac{\text{भोस्प} \times \text{९७७४}}{\text{१००००}} \text{(पूर्ववत्)}$$

$$= -\frac{\text{शर स्पर्शरेखा} \times \text{३९७९}}{\text{भोकोज्या}} + \frac{\text{भोस्प} \times \text{११}}{\text{१२}} \text{(पूर्ववत्)}$$

इत्थं विषुवांशस्पर्शरेखा समागता सारणीतो विषुवांशानयनं सुशकमिति । धनर्णोपपत्तिस्तु पूर्ववत् शरवशेन भवतीत्यपि सर्वमुपपन्नम् ।

विषुवांशक्रान्तिभ्यां शरसाधनम्

द्युसद्वैषुवज्याऽपमक्रान्तिकोज्या
वधो दन्तभूतत्व २५१३२ भक्तोधनर्णम् ।
क्रमाद्वैषुवांशेषु तौल्यादिमेषा
दिषट्के स्थितेष्वाद्यसंज्ञः पृथक्स्थः ॥ ८ ॥

गणः क्रान्तिजः स्वार्क १२ भागेन हीनो
धनर्ण मतः क्रान्तिवत् त्वाद्यकेन ।
मतः संस्कृतोऽभीष्टजीवाऽथ चापं
शरः स्याद्धनर्णं ह्युदक्याम्यदिक्कः ॥ ९ ॥

---

५. यतो हि कोज्या[१८०-(९०-वि)] = कोज्या(९०+ वि) = -ज्यावि

६. $$\frac{\text{९१७४}}{\text{१००००}} = \frac{\text{१}}{\frac{\text{१००००}}{\text{९१७४}}} = \frac{\text{१}}{\text{१}+\frac{\text{८२६}}{\text{९१७४}}} = \frac{\text{१}}{\text{१}+\frac{\text{१}}{\frac{\text{९१७४}}{\text{८२६}}}} = \frac{\text{१}}{\text{१}+\frac{\text{१}}{\text{११}+\frac{\text{१}}{\text{९}}}} = \frac{\text{१}}{\text{१}+\frac{\text{१}}{\frac{\text{१००}}{\text{९}}}} = \frac{\text{१}}{\text{१}+\frac{\text{९}}{\text{१००}}} = \frac{\text{१}}{\frac{\text{१०९}}{\text{१००}}} = \frac{\text{१००}}{\text{१०९}}$$

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपपत्तिः



क = कदम्वस्थानम् ।

ध्रु = ध्रुवस्थानम् ।

ग्र = ग्रहः ।

ग्र श = शरः ।

क ध्रु = परमक्रान्त्यंशाः

गो = गोलसन्धिः ।

ग्रध्रु = द्युज्याचापांशाः (ध्रुवप्रोते)

ग्रक्रा = क्रान्त्यंशाः ।

क ग्र ध्रु त्रिभुजे कग्र धरणीं मत्वा त्रिज्यागुणाद्धरणिकोटिगुणा दित्यादिना

$$-\text{ज्यावि} = \frac{(\text{शव्या} \times \text{त्रि} - \text{क्रज्यापद्यु})\ \text{त्रि}}{\text{पक्राज्या} \times \text{द्युज्या}}$$

$$-\text{पक्राज्या द्यु} \times \text{ज्यावि} .\ \text{शज्या त्रि}^{2}\ -\text{क्राज्या पद्यु त्रि}$$

$$\therefore\ \text{शज्या} = \frac{-\text{पक्राज्या} \times \text{द्यु} \times \text{ज्यावि} + \text{क्राज्या} \times \text{पद्यु} \times \text{त्रि}}{\text{त्रि}^{2}}$$

$$\frac{\text{क्राज्या} \times \text{पद्यु} \times \text{त्रि}}{\text{त्रि}^{2}} - \frac{\text{पक्राज्या} \times \text{द्यु} \times \text{ज्यावि}}{\text{त्रि}^{2}}$$

$$= \frac{\text{क्राज्या} \times \text{पद्यु}}{\text{१००००}} - \frac{\text{पक्राज्या} \times \text{द्यु} \times \text{ज्यावि}}{\text{१०००००००००}}$$

$$= \frac{\text{क्राज्या} \times \text{९१७४}}{\text{१००००}} - \frac{\text{३९७९} \times \text{द्यु} \times \text{ज्यावि}}{\text{१०००००००००}}$$

$$= \frac{\text{क्राज्या} \times \text{१००}^{\text{७}}}{\text{१०९}} - \frac{\text{द्यु} \times \text{ज्यावि}}{\frac{\text{१०००००००००}}{\text{३९७९}}}$$

$$= \frac{\text{क्राज्या} \times \text{१००}}{\text{१०९}} - \frac{\text{द्यु} \times \text{ज्यावि}}{\text{२५१३२}}$$

$$\text{शज्या} = \frac{\text{क्राज्या} \times \text{११}}{\text{१२}} - \frac{\text{द्यु} \times \text{ज्यावि}}{\text{२५१३२}}$$

अस्याश्चापांशा विधेयास्ते शरचापांशा भवन्ति । धनर्णवासना तु पूर्ववदत्रापि शरदिग्वशेन भवति । यदि विततभिन्नस्य स्थूलं मानं गृह्यते तदा अस्य स्थाने समागच्छतीति पञ्चमश्लोकस्योपपत्तौ टिप्पण्यां प्रदर्शितत्वान्नात्र पुनः प्रदर्शितमिति सर्वमुपपन्नम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भोगसाधनम्

गोद्यंकराम ३९७९ न्हितापमतः स्पृशज्या
कोज्याहृता विषुवतोऽपम उत्तरांशे ।
कुम्भीरकर्करसभे विषुवे धनर्णं
याम्यापमे ऋणधनं त्वियमाद्यमुक्ता ॥ १० ॥

स्पर्शज्यका विषुवतः स्वयमेन्दु १२ भागै
र्हीना तुलाजगुणभे विषुवे धनं स्यात् ।
अन्यत्र चास्वमथ सोक्तवदाद्ययुक्ताऽ
भीष्टः स्पृशद्गुण इतो धनुरत्र भोगः ॥ ११ ॥

उपपत्तिः

ध्रु = ध्रुवस्थानम् ।

ग्र = ग्रहः ।

शग्र = शरः ।

गो = गोलसन्धिः ।

कध्रु = परमक्रान्त्यंशाः ।

ग्रध्रु = द्युज्याचापांशाः ।

क ग्र ध्रु त्रिभुजे

ज्या(१८० -विषुवांशकोट्यंशाः) = ज्या {१८० (९० -वि)}

= ज्या (९० + वि) = विकोज्या ।

$$\text{कोस्प (९० -क्रान्ति)} = \frac{\text{ज्या (९०+वि) को स्प (९० (भोगाशः) + कोज्या (९०+वि) द्यु}}{\text{ज्याप}}$$

$$\text{कोस्प (९० -क्रान्ति)}\ .\ \frac{\text{कोज्यावि} \times \text{स्पभोगाश} + \text{पद्यु} (-\text{ज्यावि})}{\text{ज्याप}}$$

∴ स्पक्रा. ज्याप = कोज्यावि. स्पभोगांशा -पद्यु.ज्यावि

$$\text{स्पभोगांशाः} = \frac{\text{स्पक्रा} \times \text{ज्याप} + \text{पद्यु} \times \text{ज्यावि}}{\text{कोज्यावि}}$$

$$\text{स्पभोगांशाः} = \frac{\text{स्पक्रा} \times \text{ज्याप}}{\text{कोज्यावि}} + \frac{\text{पद्यु} \times \text{ज्यावि}}{\text{कोज्यावि}}$$

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

$$= \frac{\text{स्पक्रा} \times \text{ज्याप}}{\text{कोज्यावि}} + \text{पद्यु} \times \text{स्पवि}$$

एतत्तु रूपत्रिज्यायां तेनायुतत्रिज्यायां परिणाम्यते

$\therefore$ स्पभोगांशः =

$$= \frac{\text{स्पक्रा} \times \text{ज्याप}}{\text{कोज्यावि}} + \frac{\text{पद्यु} \times \text{स्पवि}}{\text{त्रि}}$$

$$= \frac{\text{स्पक्रा} \times ३९७९}{\text{कोज्यावि}} + \frac{\text{विस्प} \times ९१७४}{१००००}$$

$$= \frac{\text{स्पक्रा} \times ३९७९}{\text{कोज्यावि}} + \frac{\text{विस्प} \times ११}{१२}$$

अस्याश्चापांशाः स्पष्टभोगांशा भवन्तीति दिक् ।

धनर्णवासना

प्रथमपदे स्परेखा धनात्मिका मे. वृ. मि.

द्वितीयपदे स्परेखा ऋणात्मिका क. सि. क.

तृतीयपदे स्परेखा धनात्मिका तु . वृ. ध.

चतुर्थपदे स्परेखा ऋणात्मिका म. कु. मी.

एतावता मूलोक्तं सर्वं निष्पन्नम् ।

विपरिणामाध्यायस्य महत्त्वादत्र स्पर्शज्याधनुष्करणं किंचिद्विस्तरेण व्याचक्षि ।

दोर्ज्या स्पृशज्यकास्वार्क १२ भागोनाऽथ विवर्धिता ।
शेषस्य खाभ्ररामेन्दु १३०० भागेन प्रस्फुटा भवेत् ॥ १२ ॥

$$\frac{\text{पद्य}}{\text{त्रि}} = \frac{९१७४}{१००००} = \frac{१}{\frac{१००००}{९१७४}} = \frac{१}{१+\frac{८२६}{९१७४}} = \frac{१}{१+\frac{१}{\frac{९१७४}{८२६}}} = \frac{१}{१+\frac{१}{११}}$$

एतावता $\frac{\text{पद्यु}}{\text{त्रि}} = \frac{९१७४}{१००००} = \frac{११}{१२}$ स्थूलमिदम् ।

विततभिन्नस्याग्रेऽपि आनयनं यदि क्रियते तदा विततभिन्नस्वरूपम्

$$\frac{१}{१+\frac{१}{११+\frac{१}{९}}} = \frac{१००}{१०९}$$

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अतो विततभिन्नस्याधारे बहुधा मानानि भवन्तीति स्पष्टमेव ।

$$\therefore \text{ वास्तवभिन्नम्} = \frac{९१७४}{१००००}$$

$$\text{अवास्तविकभिन्नम्} = \frac{११}{१२}$$

$$\text{अनयोरन्तरम्} = \frac{९१७४}{१००००} - \frac{११}{१२} \cdot \frac{११००८८ - ११००००}{१२००००}$$

$$\frac{८८}{१२००००} = \frac{११}{१५०००} = \frac{१}{\frac{१५०००}{११}} = \frac{१}{१३६३} = \frac{१}{१३००} \text{ स्वल्पान्तरात् ।}$$

एतावता वास्तवावास्तवभिन्नयोरन्तरं यदि अस्मिन् योज्यते अर्थात् अस्मिन् अयं योज्यते तदा वास्तवफलम् । एतावता दोर्ज्या स्पृशज्यका इत्यादिपद्यस्योपपत्तिर्जायत इति सर्वं निष्पन्नम् ॥

इति सर्वानन्दकरणे पूर्वखण्डे सोपपत्तिकः विपरिणामाधिकारः समाप्तः ।

सन्दर्भग्रन्थाः

१. सूर्यसिद्धान्त आर्षप्रणीतः, विद्यावारिधिः श्रीकृष्णचन्द्रद्विवेदी, आचार्योऽध्यक्षश्च ज्योतिषविभागस्य, सम्पूर्णानन्दसंस्कृत विश्वविद्यालये वाराणस्याम्, २०४४ तमे वैक्रमाब्दे । डॉ. हरिश्चन्द्रमणित्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य वाराणसी २११ ००२ ।

२. सिद्धान्तशिरोमणिः भास्कराचार्यविरचितः, प्रो. प्रेमकुमारशर्मा आचार्यः (ज्योतिषविभागः), श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम् (मानितविश्वविद्यालयः) नवदेहली ११००१६, नाग पब्लिशर्स, ११ ए यू. ए जवाहर नगर, दिल्ली ११०००७, भारत ।

३. सरल गणित ज्योतिष, गोरखप्रसाद पोथीशाला (प्राइवेट) लिमिटेड, लाजपतरोड, इलाहवाद १९५६ ।

४. W.M. Smart, M.A. DSc. LL.D, Text Book on Spherical Astronomy, Regius Professor of Astronomy in the University of Glasgow 1937-59, formely John Couch Adams Astronomer in the University of Cambridge, The Syndics of the Cambridge University Press, Bentley House, 200 Euston road, London, N.W.1, American Branch: 32 East 57th Street, New York, N.Y. 10022, West African Office: P.O. Box 33, Ibadan, Nigeria.

५. चापीयत्रिकोणमिति गणितम्, **श्रीनीलाम्बरझा विरचितम्,** मिथिलादेशस्य दरभङ्गा मण्डलान्तर्गतजरिसो ग्रामनिवासि-काशीस्थ श्रीराम-साधु-संस्कृत-महाविद्यालये, त्रिस्कन्ध ज्योतिष-साहित्य-शास्त्रद्वयप्रधानाध्यापक-ज्योतिषाचार्य-पोष्टाचार्य साहित्याचार्यादिपदवीक-प्राप्तरीपन्स्वर्णपदक-पण्डित-श्रीअच्युतानन्दझा शर्मणा विरचितया विविधवासनया समलङ्कृतम्, जयकृष्णदासहरिदासगुप्त, चौखम्वा-संस्कृत-सीरिज आफिस, विद्याविलास प्रेस, बनारस सिटि, ज्योतिषविभागे (६) षष्ठं पुष्पम् । सन् १९४४ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वैयाकरणमते शक्त्यादिवृत्तिविवेचनम्

नारायणप्रसादः पौडेल
उपप्राध्यापकः

१. पृष्ठभूमिः

विश्वस्मिन् विश्वे ये केचन ज्ञातव्याः, द्रष्टव्याः श्रोतव्या मन्तव्या वा विषयाः सन्ति, ते सर्वे शब्दद्वाराभिव्यक्तीभवन्ति। शब्दमाध्यमेनैव जनाः स्वाभिप्रायं प्रकटयितुं क्षमा भवन्ति। सर्वमपि ज्ञानं शब्देन अनुविद्धमिव भासते। तदुक्तं भर्तृहरिणा—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥[1] इति

सर्वेऽर्थाः सर्वथा सर्वदा सर्वत्र नामधेयान्विता भवन्ति नास्ति सोऽर्थो यः कदाचित् क्वचित् कथञ्चिन् नामधेयेन विरक्तो भवेत्। प्रतीयमाना अप्यर्था नामधेयसामानाधिकरण्येन ज्ञायन्ते गौरित्यर्थोऽश्व इत्यर्थ इति शब्दतादात्म्यमर्थानां सिध्यतीति।

अतः शब्दार्थयोः परस्परं कश्चन सम्बन्धो वाच्यः, येन शब्दः सम्बद्धमेवार्थं प्रकाशयति नासम्बद्धं प्रदीपवदिति कल्प्यते। परन्त्वेवं सति शब्दानां समवायेन आकाशे सम्बद्धत्वात् शब्दाश्रयत्वमाकाशमिति सिद्धान्तात्, एकसम्बन्धिज्ञानमपरसम्बन्धि स्मारयतीति घटपदेनाकाशस्यापि बोधः स्यात् तादृशस्य बोधस्याननुभवात् स च नेष्टः। तस्मात् पदपदार्थयोः समवायादिविलक्षणः कश्चन सम्बन्धः कल्पनीयः। ततश्च शब्दे विचित्रमवर्णनीयसम्बन्धरूपसामर्थ्यमस्माभिः सर्वैरप्यनुभूयत एव। तत् सामर्थ्यञ्च शास्त्रकारैः शास्त्रेषु शब्दशक्ति-शब्दवृत्ति-शब्दव्यापारादिनाम भिर्वर्णितमस्ति।

शाब्दबोधजनकज्ञानविषयपदपदार्थसम्बन्धत्वरूपा शब्दवृत्तिः शक्तिलक्षणाव्यञ्जनाभिस्त्रिधा भिद्यते।

२. शक्तिवृत्तिः

सामान्यतःशक्त्याद्यन्यतमत्वं वृत्तित्वं भवति। **शक्तिश्च पदेन सह पदार्थस्य सम्बन्ध**[2] इति न्यायसिद्धान्तमुक्तावल्यां कथितम्। शक्तिविषये नैयायिकानां, मीमांसकानां, वैयाकरणानाञ्च स्वस्वसिद्धान्ताः सन्ति।

---

१. भर्तृहरिः, वाक्यपदीयब्रह्मकाण्डे श्लो. १२३।
२. विश्वनाथः, सिद्धान्तमुक्तावल्याः शब्दखण्डे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. नैयायिकमतम्

प्राचीननैयायिका हि- **"अस्माच्छब्दादयमर्थो बोद्धव्य"** इत्याकारिका शब्दप्रकारकार्थविशेष्यिका, **'इदं पदमिममर्थं बोधयतु'**[३] इत्याकारिका, अर्थप्रकारकपदविशेष्यिका वेश्वरेच्छा शक्तिरिति मन्वते। ते चाधुनिके नाम्न्यपि **'एकादशेऽहनि पिता नाम कुर्यात्'**[४] इति श्रुतिवाक्यात् ईश्वरेच्छास्त्येवेति, अपभ्रंशादौ तु न शक्तिः तत्र बोधस्तु शक्तिभ्रमाद् भवतीति च वदन्ति।

नव्यनैयायिकास्तु— **'ईश्वरेच्छा न शक्तिः किन्त्विच्छैव, तेनाधुनिकसङ्केतितेऽपि शक्तिरस्त्येवेत्याहु'**[५] रिति।

४. मीमांसकमतम्

मीमांसकाश्च शब्दार्थयोः सम्बन्धं नित्यं स्वीकृत्य प्रत्याय्यप्रत्यायकभावरूपा शक्तिरिति मन्यन्ते। अस्मिन् विषये **'वैयाकरणमते शब्दशक्तिविचारः'** इत्यस्मिन् स्वीये लेखे भीमप्रसादमहाभागाः कथयन्ति यत्- **'वेदस्यानादित्वमपौरुषेयत्वं मन्यमानानां मीमांसकानां मते शब्दार्थयोः सम्बन्धो नित्यः। ते च तत्र प्रत्याय्यप्रत्यायकभावनियामिका शक्तिर्वैशिष्ट्याख्यसम्बन्धेनार्थनिष्ठा प्रतियोगित्वसम्बन्धेन पदनिष्ठेति अभ्युपगच्छन्ति।** तत्र भवन्तः प्रमाणत्वेन मीमांसाशाबरभाष्यस्य उद्धरणानि प्रस्तुवन्ति, तानि च- **'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्', 'औत्पत्तिक इति नित्यं ब्रूमः' 'यो ह्यत्र व्यपदेश्यः सम्बन्धस्तमेकं न व्यपदिशति भवान् प्रत्याय्यस्य प्रत्यायकस्य च यः संज्ञासंज्ञिलक्षणः'**[६] **इति।**

५. वैयाकरणमतम्

प्राचीनवैयाकरणाः— बोध्यबोधजनिका पदपदार्थसम्बन्धरूपा शक्तिरिति। ते च प्रमाणत्वेन भर्तृहरेः कारिकामुपस्थापयन्ति—

> **इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
> **अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥**[७] इति

यथा चक्षुरादीनामिन्द्रियाणां रूपादिविषयकज्ञानजनने अनादिः पुरुषप्रयत्नानपेक्षा योग्यता ज्ञानजनकताऽवच्छेदकधर्मरूपा तथा शब्दानामर्थैरनादिः सम्बन्ध एव योग्यता ज्ञानजनकताऽवच्छेदको धर्मः शक्तिरूप इत्याशय इति।

नव्यवैयाकरणास्तु— इच्छैव शक्तिः। सङ्केतः सम्बन्धश्चेतिं यन् नैयायिकैरुक्तं तन्नोचितम्, इच्छायाः शक्तित्वसम्भवेऽपि सम्बन्धत्वासम्भवात्।

---

३. भट्टः, नागेशः, वैयाकरणसिद्धान्तलघुमञ्जूषायाः शक्तिनिरुपणे।
४. विश्वनाथः, सिद्धान्तमुक्तावल्याः शब्दखण्ड उद्धृतम्।
५. विश्वनाथः, न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डे।
६. प्रज्ञाप्रवाह पत्रिकायाः ३३ पृष्ठे।
७. भर्तृहरिः, वाक्यपदीयपदकाण्डस्य सम्बन्धसमुद्देशे श्लो. २९।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सत्याश्रयतया विशिष्टबुद्धिनियामको भवति। घटवद् भूतलमित्यादौ संयोगरूपः सम्बन्धो घटभूतलाभ्यां भिन्नः किन्तूभयसम्बद्धश्च घटनिरूपितसंयोगाश्रयो भूतलमिति विशेष्यविशेषणोभयसम्बन्धपरिचायकश्च। तथात्र घटशब्द इच्छावान् तदर्थो वा इच्छावानिति व्यवहारो न, इच्छायाश्चेतनधर्मत्वाद् घटादौ तदभावात्। एतेन नैयायिकोक्तेश्वरेच्छेच्छारूपा वा शक्तिः प्राचीनवैयाकरणोक्ता बोधजनिका शक्तिः खण्डितेति वदन्ति।

अतस्ते पदपदार्थयोर्वाच्यवाचकभावरूपां शक्तिमङ्गीकुर्वते। शक्तिग्राहकञ्च इतरेतराध्यासमूलकं तादात्म्यम्। तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति तादात्म्यस्य लक्षणम्।

तादात्म्यमेव वाच्यवाचकभावात्मकसम्बन्धद्योतकम्। तादात्म्यस्य सम्बन्धत्वं भर्तृहरिणापि स्वीकृतं तदुक्तम्—

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः॥ इति

'शब्दार्थयोस्तादात्म्यादेव श्लोकमशृणोदार्थं शृणोति, अर्थं वदतीत्यादिव्यवहारः। ओमित्येकाक्षरं ब्रह्म, रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः' इत्यादिकं [८] परमलघुमञ्जूषायां प्रस्तुतमस्ति नागेशेन। शब्दार्थयोस्तादात्म्यस्वीकारे नैयायिकोक्ता दोषा अपि तत्रैव बौद्धपदार्थस्वीकारेण समाहिताः सन्ति।

वैयाकरणमते साधुशब्दवदपभ्रंशा अपि साक्षादर्थस्य वाचकाः। यतो ह्यपभ्रंशेष्वपि शक्तिस्वीकारादेव महाभाष्ये पतञ्जलि राह—

"समानायामर्थावगतौ शब्देन चापशब्देन च शास्त्रेण धर्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देनेति। एवं क्रियमाणमभ्युदयकारि भवतीति[९]**"**। 'वाचकत्वाविशेषेऽपि नियमःपुण्यपापयो' रिति भर्तृहरिश्च।

६. लक्षणावृत्तिः

लक्षणावृत्तिस्तु यद्यपि वैयाकरणनये नैव प्रसिद्धा तथाप्यन्येषां मतखण्डनाय वैयाकरणसिद्धान्तलघुमञ्जूषादिग्रन्थेषु तस्याश्चर्चा विहिता। अत्राप्यतः परं तस्याश्चर्चा विधीयते।

आलङ्कारिकाः मुख्यार्थस्य वाक्ये पदार्थान्तरेण तात्पर्यानुपपत्तौ रूढिं प्रयोजनं वाश्रित्य मुख्यार्थसम्बद्धार्थान्तरप्रतिपादिका वृत्तिर्लक्षणेति वदन्ति। तदाह साहित्यपर्दणे विश्वनाथः—

मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥[१०] इति

नैयायिकाः स्वशक्यसम्बन्धो लक्षणा[११] यथा 'गङ्गायां घोष' इत्यत्र स्वं पदं गङ्गापदं, तच्छक्यो भगीरथखातावच्छिन्नजलप्रवाहः, तत्सम्बन्धः सामीप्यं तीरे इति स एव सम्बन्धो लक्षणा। शक्यपरम्परासम्बन्धरूपा लक्षणा गौणी-शुद्धाभेदाभ्यां द्विधा।

---

८. नागेशः, परमलघुमञ्जूषायाः शक्तिनिरूपणे।
९. पतञ्जलिः, व्याकरणमहाभाष्यस्य पस्पशानिह्नके ।
१०. विश्वनाथः, साहित्यदर्पणस्य द्वितीयपरिच्छेदे श्लो. ५।
११. लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः। कारिकावली श्लो. ८२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी। गुणसादृश्यसम्बन्धेन यः शक्यार्थसम्बन्धस्तस्य प्रतिपादिका गौणीत्याशयः। अस्या उदाहरणं 'सिंहो माणवकः' इति। अत्र सिंहपदस्य शक्यार्थो मृगेन्द्रः, सिंहे ये शौर्यक्रौर्यादयो गुणा विद्यन्ते तत्सदृशा एव शौर्यादयो गुणा माणवकेऽपि सन्ति इति तादृशप्रयोगो विधीयते। कार्यकारणभावादिसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका शुद्धा। यथा– 'आयुर्घृतम्' इत्यत्र घृतस्यायुर्वृद्धिकारणत्वेन कार्यकारणभावसम्बन्धमाश्रित्य घृतशब्दस्तत्सम्बद्धमायु र्बोधयति लक्षणया।

पुनरपि प्रकारान्तरेण लक्षणा द्विधा– अजहत्स्वार्था जहत्स्वार्था च।

अजहत्स्वार्थाया लक्षणं स्वार्थसंवलितपरार्थाभिधायिकात्वम्। छत्रिणो यान्ति, कुन्तान् प्रवेशय, यष्टीः प्रवेशय, काकेभ्यो दधि रक्ष्यताम्, इत्यादीन्युदाहरणानि। अत्र क्रमशः छत्रिसहितसेनानां, कुन्तास्त्रसहित-पुरुषाणां, यष्टिसहितपुरुषाणां, काकसहितसर्वदध्युपघातकानां च बोधो भवति।

स्वशक्यार्थस्य परित्यागेनेतरार्थाभिधायिका जहत्स्वार्था, अस्या उदाहरणम्– 'गां बाहीकं पाठय' इति। अत्र गोसदृशलक्षणायां सत्यामपि गोस्तदन्वयिपाठनक्रियान्वयित्वासम्भव इत्याहुः।

लक्षणाभूतः सम्बन्धोऽनेकस्तथापि प्रसिद्धाः पञ्च तात्स्थ्यम्, ताद्धर्म्यम्, तत्सामीप्यम्, तत्साहचर्यम्, तादर्थ्यञ्चेति। परमलघुमञ्जूषायां नागेशः प्रस्तौति–

तात्स्थ्यात्तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च।
तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः॥[१२] इति

क्रमशः 'मञ्चाः क्रोशन्ति', 'सिंहो माणवकः', गङ्गायां घोषः, यष्टीः प्रवेशय, इन्द्रार्था स्थूणा इन्द्रः, इत्यादीन्युदाहरणानि च स एव लिखति।

केचिद् नैयायिका हि अन्वयानुपपत्तिप्रतिसन्धानमेव लक्षणाबीजं मन्यन्ते, परे तु तात्पर्यानुपपत्ति-प्रतिसन्धानमेव तद्बीजं मन्यन्ते। तन्मते यद्यन्वयानुपपत्तिप्रतिसन्धानमेव लक्षणाबीजं स्यात्तदा गङ्गायां घोष इत्यत्र घोषपदे मकरादिलक्षणयापि तत्सिद्धिः स्यान्न च तेन तात्पर्योपलब्धिः। एवमेव गङ्गायां पापी गच्छतीत्यत्र पूर्वपक्षमात्रग्रहणे तु गङ्गापदे नरकलक्षणा स्यात्तावताऽप्यन्वयोपपत्तेः। तात्पर्यग्रहणे तु पापिपदस्य पूर्वोपात्तपापे जने लक्षणया न तथापत्तिः। तथैव 'नक्षत्रं दृष्ट्वा वाचं विसृजेदि'त्यत्र यदा कदा दिवापि नक्षत्रदर्शनसम्भवादन्वयलाभेऽपि तेन रात्राविति यत्तात्पर्यं तस्यालाभेन तत्र लक्षणा भवति।

वेदान्तिनस्तु लक्षणाया जहदजहत्स्वार्थाख्यमपरमपि भेदं समर्थयन्ते। अस्यां लक्षणायां वाच्यार्थे किञ्चिदंशत्यागः, किञ्चिदंशपरिग्रहश्च भवति। 'तत्त्वमसि' इति महावाक्ये तत्पदस्य ब्रह्मगतसर्वज्ञत्व-चैतन्यरूपः शक्यार्थः त्वमिति पदस्य जीवगताल्पज्ञत्वचैतन्यरूपः शक्यार्थः, तत्रार्थैकदेशभूतयोः सर्वज्ञत्वाल्पज्ञत्वयोस्त्याग उभयगतशुद्धचैतन्ययोर्जीवब्रह्मणोर्ग्रहणम्। एवमेव पटैकदेशे दग्धे पटो दग्धः, ग्रामैकदेशे दग्धे ग्रामो दग्ध इति व्यवहारो भवतीति च वदन्ति।

स्वशक्यसम्बन्धो लक्षणेति नैयायिकोक्तलक्षणास्वीकारेऽस्य पदमात्रविषयत्वेन वाक्यार्थे कथमपि लक्षणा न स्यात्तत्र शक्तेरभवादिति विचार्य मीमांसकाः– गभीरायां नद्यां घोष इत्यादिवाक्यानुरोधात्

१२. नागेशः, परमलघुमञ्जूषाया लक्षणानिरूपण उद्धृतः श्लोकः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वबोध्यसम्बन्धो लक्षणेति वदन्ति। ते च तत्र वाक्ये यदि नदीपदे तीरलक्षणा क्रियते तदा गभीरे नदीतीरे घोष इति बोधः स्यात् किन्तु न हि तीरं गभीरम्। यदि गभीरपदे तीरलक्षणा क्रियते तदापि तीराभिन्ना नदीत्येव बोधापत्तिर्भवेत्, तीरनद्योरभेदस्य बाधात् साप्यसङ्गतैव। पदद्वयेऽपि लक्षणास्वीकारे च न कार्यसंभवः, गभीरपदस्य गभीरतीरे नदीपदस्य नदीतीरे लक्षणा स्याद् येन 'गभीरतीराभिन्ननदीतीरे घोष इत्यर्थबोधःस्यात् सोऽपि नात्राभीष्टः। तस्माद् वाक्यबोध्यसम्बन्धलक्षणा स्वीकार्येति। अतो गभीरायां नद्यां घोष इत्यत्र 'गभीरत्वविशिष्ट्या या नदी तत्तीरे घोष' इत्यर्थबोधः संभवतीति च वदन्ति।

प्राचीननैयायिका हि द्विरेफपदस्य द्वौ रेफौ यस्मिन्निति बहुव्रीहौ एकार्थीभावानभ्युपगमेन शक्तिवृत्या रेफद्वयमात्रस्यैव बोधः, लक्षणायां रेफद्वयघटितभ्रमरशब्दस्य बोधः, इति स्वलक्ष्यो भ्रमरशब्दस्तस्य वाच्यार्थे या लक्षणा सा लक्षितलक्षणेति वदन्ति। यः शक्यार्थस्य परम्परासम्बन्धः स्वघटितपदवाच्यत्वरूपः सा लक्षितलक्षणेति तदाशयः।

पुनरपि प्रकारान्तरेण लक्षणाया द्वैविध्यं प्रस्तौति नागेशः- **'प्रयोजनवती निरुढा च लक्षणा द्विविधा मता।**[१३] इति

'त्वचा ज्ञातम्' इत्यादौ त्वचस्त्वगिन्द्रिये निरुढा लक्षणा। इयं तु शक्तेरपरपर्यायै वेति ज्ञेयम्। प्रयोजनवत्या उदाहरणं च 'कुन्ताः प्रविशन्ति' इति। अत्र भीतिपलायमानवाक्ये कुन्तानां तात्पर्यविषय-कुन्तप्रवेशेऽन्वयबाधात्कुन्तपदस्य तत्सहितपुरुषे लक्षणा प्रयोजनं चात्र कुन्तविद्यमानतैक्ष्ण्यप्रतीतिः प्रयोजन-मित्याहुर्नैयायिकास्तन्नोचितमिति वदति नागेशः।

[१४]तात्पर्ये सति सर्वे शब्दाः सर्वविधार्थवाचका भवन्तीति भाष्यवचनाल्लक्षणाया अभावः। तथा च एकयैव मुख्यशक्तिवृत्त्या कार्यसिद्धौ लक्षणाख्यगौणवृत्तिस्वीकारे वृत्तिद्वयकल्पनं तदवच्छेदकद्वयस्य च कल्पनमावश्यकं भवति तच्च गौरवमिति विचार्य वैयाकरणा लक्षणावृत्तिं नाङ्गीकुर्वते। गङ्गायां घोष इत्यादौ गङ्गापदात् तीरबोधस्तु तात्पर्ये सति शक्त्यैव भवति। यतो हि वैयाकरणैः[१५] प्रसिद्धाप्रसिद्धभेदेन द्विविधा शक्तिर्मन्यते। या सामान्यजनस्यापि विषया सा प्रसिद्धा शक्तिः, सहृदयहृदयमात्रविषया चाप्रसिद्धा शक्तिः। लघुमञ्जूषायामपि नागेशः कथयति-- **आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे व्यक्तिविशेषबोधे वा लक्षणेति व्यवहारः**[१६] इति।

गङ्गापदस्य भगीरथरथखातावच्छिन्नजलप्रवाहेऽर्थे प्रसिद्धा तीरार्थे चाप्रसिद्धा शक्तिः। सर्वेषां सवार्थवाचकत्वेऽपि घटपदात् पटप्रत्ययस्तु तात्पर्याभावान्न भवतीति बोध्यम्।[१७] तात्पर्यञ्चात्र ऐश्वरमपि देवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादेरप्युपलब्धमिति ग्राह्यम्। सर्वे सवार्थवाचका इति परमलघुमञ्जूषा-यामुद्धृतं कुत्रत्यं भाष्यमिति विषये वंशीटीकायाष्टीकाकारो वंशीधरमिश्रः कथयति यत्- **"कुत्रत्यमिदं**

---

१३. नागेशः परमलघुमञ्जूषाया लक्षणानिरुपण उद्धृतः।

१४. सति तात्पर्ये सर्वे सवार्थवाचका इति भाष्याल्लक्षणायाअभावात्। परमलघुमञ्जूषाया लक्षणानिरूपणे।

१५. शक्तिर्द्विविधा प्रसिद्धाऽप्रसिद्धा च। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्। सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्। परमलघुमञ्जूषाया लक्षणानिरूपणे।

१६. नागेशः, वैयाकरणसिद्धान्तलघुमञ्जूषाया लक्षणानिरूपणे।

१७. नागेशः, परमलघुमञ्जूषाया लक्षणानिरूपणे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भाष्यमित्यन्वेषणीयम्। योगवाचस्पत्ये त्वेवं दृश्यते- सर्वे च शब्दाः सर्वाभिधानसमर्था इति सर्वैरर्थैः सर्वेषां शब्दानां सम्बन्धः, ईश्वरसङ्केतस्तु प्रकाशकः। अत एव नित्यः शब्दार्थसम्बन्ध इति तान्त्रिका इति तत्रोक्तम्[१८]।

एतेन सर्वेण व्याख्यानेन वैयाकरणमते लक्षणा नैव प्रसिद्धा।

७. व्यञ्जनावृत्तिः

नैयायिका मीमांसकाश्च तिसृषु वृत्तिषु व्यञ्जनावृत्तिं नाङ्गीकुर्वते परं वैयाकरणा निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्त[१९]त्वात् तां वृत्तिं स्वीकुर्वन्त्येव। व्यञ्जनां विवर्णयन् नागेशभट्टोऽप्याह-

'मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना[२०] इति।

व्यञ्जना च शब्दतदर्थपदपदैकदेशवर्णवाक्यरचनाचेष्टादिषु अनुभूयते। यद्यपि नैयायिका लक्षणयैव गतार्था व्यञ्जना, न सा स्वीकार्येत्याहुस्तन्नोचितम्, लक्षणाया मुख्यार्थबाधपूर्वकलक्ष्यार्थबोधकत्वात्, मुख्यार्थसम्बद्धार्थस्यैव लक्षणाया बोधकत्वाच्च लक्षणायां व्यञ्जना नान्तर्भवितुमर्हति। मुख्यार्थबाधे सति तत्सम्बद्धार्थबोधिका हि लक्षणा। व्यञ्जना तु न तत्प्रकृतिका परं तद्विलक्षणस्वरूपा। यथा 'गङ्गायां घोषः' इत्यत्र शक्तिर्गङ्गापदस्य प्रवाहरूपं शक्यार्थमुपस्थापयति ततः शक्यार्थस्य घोषेऽनन्वयात्तात्पर्यानुपपत्तेर्लक्षणा प्रवर्तते, सा च सामीप्यसम्बन्धेन मुख्यार्थभूतप्रवाहसम्बद्धार्थं तटरूपं बोधयति। ततश्च व्यञ्जनया शैत्यपावनत्वादिप्रयोजनं व्यज्यते। लक्षणया तन्नोपस्थापयितुं शक्यते, हेत्वभावात्। अतो लक्षणातो भिन्ना व्यञ्जना सिद्धा।

८. निष्कर्षः—

नैयायिकैः **'शक्तिधीः सहकारिणी'**[२१] इति वचनेन शाब्दबोधे शक्तिः सहकारिकारणत्वेन स्वीकृता। सा च प्राचीननैयायिकमत ईश्वरेच्छा, नव्यनैयायिकमत इच्छैव शक्तिरित्यभिमता। शक्तिज्ञानोपायाश्च सिद्धान्तमुक्तावल्यामष्टौ संख्यापिताः। ते च— व्याकरणम्, उपमानम्, कोशः, आप्तवाक्यम्, व्यवहारः, वाक्यशेषः विवृतिः, प्रसिद्धपदसन्निधिश्चेति सन्ति। तत्र चोक्तम्—

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।[२२] इति

नैयायिकैर्यौगिकं, रूढं, योगरूढं, यौगिकरूढञ्चेति शक्तं पदं चतुर्विधं स्वीकृतम्। एवञ्च स्वशक्यसम्बन्धरूपा लक्षणा च तेषां मतेऽभिमता। तथा च लक्षणाया अनेके भेदा अपि प्रदर्शिता एव। मीमांसकमते प्रत्याय्यप्रत्यायकभावरूपा शक्तिरिति 'स्वबोध्यसम्बन्धो लक्षणा' इति च मया प्रदर्शितमेव।

१८. मिश्रः, वंशीधरः, परमलघुमञ्जूषाया लक्षणानिरूपणे वंशीटीकायामुद्धृतम्।
१९. व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः। भर्तृहरिः, वाक्यपदीयद्वितीयकाण्डस्य श्लो. सं. २५३।
२०. नागेशः, परमलघुमञ्जूषाया व्यञ्जनानिरूपणे।
२१. विश्वनाथः, कारिकावल्याः श्लो. सं. ८१।
२२. विश्वनाथः, सिद्धान्तमुक्तावल्याः शब्दनिरूपण उद्धृतम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनवैयाकरणैश्च **इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा**[२३]। इत्यादिप्रमाणत्वेन बोध्यबोधजनिका शक्तिरङ्गीकृता। नव्यवैयाकरणैश्च वाच्यवाचकभावरूपा शक्तिरित्यभिमतम्। शक्तेः प्रसिद्धाप्रसिद्धाभ्यां मुख्यभेदद्वयेऽपि शक्तं पदं-रूढं, योगम्, योगरूढञ्चेति त्रिविधमेव स्वीक्रियते। नानार्थकस्थलेषु च संयोगादिभिः शक्तिर्नियम्यत इति भर्तृहरिणा-

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।[२४] इत्यादिना उक्तमेव।

शक्तिलक्षणाव्यञ्जनाभिर्वृत्तेस्त्रैविध्यत्वेऽपि वैयाकरणमते (नागेशमते) लक्षणाया अस्वीकाराद् वाच्यवाचकभावरूपा शक्तिवृत्तिः, व्यङ्ग्यव्यञ्जकभावसम्बन्धसम्पादिका च व्यञ्जनावृत्तिरिति तस्या भेदद्वयमेव स्वीकृतम् एवञ्च शक्तिव्यञ्जनान्यतरत्वं वृत्तित्वं मिति नागेशाभिमतम्।

सन्दर्भग्रन्थाः

१. पतञ्जलिः, **व्याकरणमहाभाष्यम्**, प्रदीपव्याख्यासहितम्, (व्याख्याता कैयटः), तथा प्रकाशहिन्दीव्याख्योपेतम्, (व्याख्याकारः आचार्यमधुसूदनमिश्रः), वाराणसी, चौखम्बा विद्याभवनम् पुनर्मु. सं. ई.सं. २००३।

२. पाण्डेयः, लालमणिः (प्रधानसम्पादकः) **प्रज्ञाप्रवाहः**, (पत्रिका) काष्ठमण्डपः प्रजातन्त्रवादिप्राध्यापकसङ्घनेपालः, वाल्मीकिविद्यापीठसमितिः २०६६।

३. भट्टः, कौण्डः, **वैयाकरणभूषणसारः**, दर्पणव्याख्यासंवलितः, (व्याख्याता श्रीहरिवल्लभः) तथा सुबोधिनीहिन्दीव्याख्योपेतः, (व्याख्याकारः, डा. चन्द्रिकाप्रसाद द्विवेदी), दिल्ली, चौखम्बा- संस्कृतप्रतिष्ठानम्, ई.सं. १९९९।

४. भट्टः, नागेशः, **वैयाकरणसिद्धान्तलघुमञ्जूषा** (संपादकः आचार्यश्रीरामप्रसादः त्रिपाठी), वाराणसी, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, ई.सं. १९९०।

५. भट्टः, नागेशः, **वैयाकरणसिद्धान्तपरमलघुमञ्जूषा** किरणावलिसंस्कृतव्याख्योपेतहिन्द्यनुवादसहिता, (व्याख्याकारः लोकमणिदाहालः) वाराणसी, चौखम्बासुरभारतीप्रकाशनम्, ई.सं. १९९१।

६. भट्ट, नागेशः, **वैयाकरणसिद्धान्तपरमलघुमञ्जूषा** वंशीसंस्कृतहिन्दीव्याख्याविभूषिता, (व्याख्याकारः वंशीधरमिश्रः) वाराणसी, चौखम्बासंस्कृतप्रतिष्ठानम् ई.सं. २००६।

७. भट्टाचार्यः, श्रीविश्वनाथपञ्चाननः, **कारिकावलीन्यायसिद्धान्तमुक्तावली**, न्यायचन्द्रिकासमवेता, (व्याख्याकारः नारायणतीर्थः) तथा मुक्तावलीविषमस्थलटिप्पण्या समेता (टिप्पणीकारः ढुण्ढिराजशास्त्री) वाराणसी, चौखम्बासंस्कृतसंस्थानम् वि.सं. २०३८।

८. भर्तृहरिः, **वाक्यपदीयम् (ब्रह्मकाण्डम्)** संस्कृतभावप्रदीपव्याख्यासहितम्, (व्याख्याकारः श्रीसूर्यनारायणशुक्लः), तथा हिन्दीव्याख्यासहितम् (व्याख्याकारः श्रीरामगोविन्दशुक्लः) वाराणसी, चौखम्बा- संस्कृतसंस्थानम् ई.सं. १९९८।

९. भर्तृहरिः, **वाक्यपदीयम्** अम्बाकर्त्रीव्याख्यया सहितम्, (व्याख्याकारः संपादकश्च पण्डितः रघुनाथशर्मा, पद्मश्रीः), वाराणसी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वि.सं. २०४५।

१०. विश्वनाथः, **साहित्यदर्पणः**, मञ्जू-संस्कृतव्याख्याहिन्द्यनुवादोपेतः (व्याख्याकारौ लोकमणिदाहालः, त्रिलोकीनाथद्विवेदी च) वाराणसी, चौखम्बासुरभारतीप्रकाशनम्, ई.सं. १९९५।

---

२३. नागेशः, परमलघुमञ्जूषायाः शक्तिनिरूपणत उद्धृतम्।

२४. नागेशः, परमलघुमञ्जूषायाः शक्तिनिरूपणत उद्धृतम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अर्थवत्त्वविमर्शः

जगन्नाथशर्मा
उपप्राध्यापकः

संस्कृतवाङ्मये छन्दसां प्रधानं[1] मुख[2]स्थानीयमङ्गं व्याकरणमुच्यते । भारतवर्षीयज्ञानविज्ञानात्मके जगति महामुनिविरचितस्य पाणिनीयव्याकरणस्य किमप्यलौकिकं महत्त्वं विद्यते । तत्रापि परिष्कारशैली अद्भुतप्रभावोत्पादिका स्वर्णे सुगन्धोद्भाविकेव सम्मन्यते । यथा सम्मार्जनेन पात्रस्य मलमपाक्रियते, तथैव सूत्रेषु परिष्कारद्वारा सम्भावितदोषाणां निरासो भवति । अस्याः प्रभावः सर्वेषु शास्त्रेषु समाक्रान्त इति सर्वप्रसिद्धमेव । तत्र प्रथमं व्याकरणशास्त्र एवास्याः प्रभावो द्रष्टव्यः ।

यथा महर्षिणा पाणिनिना अष्टाध्यायी विरचिता । तस्यां प्रातिपदिकसंज्ञाविधायकम् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्[3]" कृत्तद्धितसमासाश्चे[4]ति सूत्रद्वयं वर्तते । तत्र पूर्वसूत्रघटकस्यार्थवत्-पदस्यार्थो विचार्यते । अत्रार्थप्रकृतेर्मतुप्प्रत्ययः,[5] मस्य वत्वविधानमेव[6] सिद्धान्तितम् । "अर्थाच्चासन्निहिते" इत्यनेन असन्निहितधनवाचिनोऽर्थशब्दादेव इन्प्रत्ययविधानात्, अर्थशब्दयोस्सदा सन्निहितत्वेन इनेरप्राप्तिः । तदुक्तं भाष्ये "असन्निहिते, इति किमर्थम् "अर्थवान्" इति । इत्थमत्र लक्षणे वृत्त्याऽर्थविषयकबोध-जनकत्त्वरूपमर्थवत्त्वं गृहीतमिति प्राचीनाः । तद्बीजमादायैव विवदन्ते तत्तन्मतानुयायिनः । यथा यद्यपि पूर्वसूत्रे "अर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यत्र यदर्थवत्पदं वर्तते, उत्तरसूत्रे "कृत्तद्धितसमासाश्चेत्य-स्मिन्नपि तदनुवर्तते । तथापि प्राचीनवैयाकरणैः श्रीमद्भट्टोजिदीक्षितप्रभृतिभिः पूर्वसूत्रस्थापेक्षयाऽत्र सूत्रस्यार्थवत्पदे किमप्यर्थवैलक्ष्यण्यं दर्श्यते ।

---

१. प्रधानञ्च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति, इति व्याकरणमहाभाष्यम् ।
२. शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते, इति पाणिनीयशिक्षायाम् ४२ कारिका ।
३. पाणिनिसूत्रम् १ । २ । ४५ ।
४. पाणिनिसूत्रम् १ । २ । ४६ ।
५. ५ । २ । ९४ पाणिनिसूत्रेण ।
६. ८ । २ । ९ पाणिनिसूत्रेण ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अर्थाद् दीक्षिताभिप्रायो वर्तते, अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रे धातुप्रत्ययपर्युदासकरणाद् वृत्तिमत्त्वरूपमर्थवत्त्वं[७] गृह्यते। उत्तरसूत्रे च "न केवलाः कृतस्तद्धिता वाऽर्थवन्तः" इति भाष्योक्ते प्रमाणे शब्दाधिकारमाश्रित्य "एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धरूपमर्थवत्त्वम्[८]" अङ्गीक्रियत इति। नव्यास्तु पूर्वसूत्रे वृत्तिमत्त्वरूपार्थवत्त्वस्वीकारे, उत्तरसूत्रे च उपर्युक्त एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धार्थवत्त्वस्वीकारेऽर्थवत्त्वद्वयेऽर्थवत्पदस्य शक्तिद्वयम्, उपस्थितिद्वयम्, शाब्दबोधद्वयम्, शब्दाधिकारकल्पना, विभिन्नयोग्यतादिरूपकारणाधिक्यञ्चेति गौरवं पर्यालोच्यार्थवत्सूत्रे "धातुप्रत्ययपर्युदासेनैव सामान्य वृत्तिमत्वरूपार्थवत्वलाभे पुनः अर्थवद्ग्रहणसामर्थ्यात् पूर्वोत्तरसूत्रद्वयेऽपि एकविधमेवार्थवत्त्वमङ्गीकुर्वन्ति। तच्चार्थवत्त्वं कीदृगिति जिज्ञासायामुक्तं नागेशेन "अत्र सूत्रे उत्तरसूत्रे चार्थवत्त्वम्, एतत्संज्ञाफलभूत-विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वरूपमिति[९]"। प्रत्ययमात्रे तदर्थो न सम्भवतीति भाष्यप्रामाण्याच्च[१०] तत्त्वम्। यद्यपि अस्यार्थवत्त्वस्य व्याख्या बहुभिर्विपश्चिद्भिर्यथामत्या पृथक्पृथक्टीकामाध्यमेन[११] विभिन्नपुस्तकेषूद्घोषिता वर्तते। तथापि तस्यात्यन्तक्लिष्टत्वात् गम्भीरार्थवाहकत्वाच्च मन्दमस्तिष्काणाम् हिताय न भवति। अतस्तत्सर्वं काठिन्यं संलक्ष्य विद्वद्भाषाभाषितमेवार्थं छात्रोपकारिण्या शैल्यातत्प्रमोदायात्र विमृश्यते।

तद्यथा रामशब्दस्यार्थवत्त्वं चिकीर्षितं चेदेतस्य रामशब्दस्य भाविनी या प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिरुत्पत्स्यमाना स्वादिविभक्तिः तदितरो घटपटादिः, तत्समभिव्याहारानपेक्षयैव लोके दशरथापत्याद्यर्थविषयकबोधजनकत्वरूपमर्थवत्त्वं रामशब्देऽस्तीति लक्षणसमन्वयः।

अत्र यद्यपि स्वादिप्रकृतिमात्रस्य रामादे र्न बोधजनकत्वन्तथापि सम्भावितन्तत्तत्रास्त्येवेति न लक्षणाऽनुपपत्तिः। एवञ्च ईदृशार्थवत्त्वस्वीकारे 'रामेषु' इत्यादौ सुपः या प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिरुत्पत्स्यमाना स्वादिविभक्तिः, तदितरप्रकृतिभूतः रामशब्दः, तत्समभिव्याहारापेक्षयैव लोकेऽर्थ-विषयकबोधजनकत्वात् सुपः अर्थवत्त्वाभावेन प्रातिपदिकसंज्ञावारणसम्भवे प्रत्ययपर्युदासकरणरूपमर्थ-वत्त्वद्वयकल्पनरूपमुपस्थितिद्वयकल्पनरूपञ्च गौरवं नागेशमते न भवतीति महल्लाघवम्।

तर्त्तहि जिज्ञास्यतेऽत्र लक्षणे विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमित्ये-तावतैव रामादीनामर्थवत्त्वे सिद्धे विभक्तावेतत्संज्ञाफलभूतत्वमिति विशेषणमनावश्यकमिति तु नाशङ्कनीयम्, तथा सति 'राज्ञः पुरुषः' इत्येतद्घटकीभूतो यो राज्ञः पुरुषेति समुदायस्तस्यार्थवत्त्वेन प्रातिपदिकत्वात् सुपो धातुप्रातिपदिकयोरिति[१२] सूत्रेण राजप्रकृतिकविभक्तेर्लुगापत्तेः। दत्ते च विशेषणे राज्ञः पुरुषेत्यस्य समुदायस्य या प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिः समुदायादुत्पत्स्यमाना स्वादिविभक्तिः,

---

७. प्रौढमनोरमाऽजन्तपुंलिङ्गे - अर्थवत्सूत्रे।
८. प्रौढमनोरमाऽजन्तपुंलिङ्गे - कृत्तद्धितसूत्रे।
९. लघुशब्देन्दुशेखरेऽजन्तपुंलिङ्गे - अर्थवत्सूत्रे।
१०. न हि केवलेन प्रत्ययेनार्थो गम्यते, केन तर्हि? सप्रकृतिकेनेति सङ्ख्याया अतिशदन्ताया सूत्रव्याख्यावसरे पातञ्जलमहाभाष्ये।
११. सटिप्पणे टीकापञ्चकाञ्चिते लघुशब्देन्दुशेखरेऽर्थवत्सूत्रे।
१२. पाणिनिसूत्रम् २।४।७१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदितरा पुरुषप्रकृतिका सुविभक्तिः तत्समभिव्याहारापेक्षयैव लोकेऽर्थविषयकवोधजनकत्वेनार्थवत्त्वाभावादेव प्रातिपदिकत्त्वाऽभावेन न सुपः लुगापत्तिः । अत्र लक्षणे नञर्थद्वयोपादानाऽभावेऽपि लक्ष्यभूतानां रामादीनामर्थवत्त्वसिद्धौ राज्ञः पुरुषेत्याद्यलक्ष्याणां तदभावसिद्धेश्च गुरुभूतलक्षणमप्रयोजकमिति न शङ्क्यम्, तर्हि लिट्-धुक्-दधि-मध्वित्यादौ विभक्तिसमभिव्याहारानपेक्षया लोकेऽर्थविषयकवोधजनकत्वेनार्थवत्त्वाभावात् प्रातिपदिकत्वानुपपत्तिस्यादतस्तेषामर्थवत्त्वसिद्धये नञर्थद्वयोपादनं शेखरकृताऽऽदृतम् । नञर्थद्वयोपादाने तु एतत्पदेन दधि, मधु, इत्यादि ग्राह्यम् । तस्य या प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिरुत्पत्स्यमाना स्वादिविभक्तिः, तदितरो घटपटादिः, तत्समभिव्याहारानपेक्षयैव लोकेऽर्थविषयकवोधजनकत्वेनार्थवत्त्वं सिद्ध्यति । तथैव लक्षणघटकं समभिव्याहारपदमपि नोपेक्षणीयम्, यतो लक्ष्यभूतानां रामादीनामपिअर्थवत्त्वानापत्तिःस्यात् । यथा एतस्य रामशब्दस्य या प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिरुत्पत्स्या माना स्वादिविभक्तिः, तदितराऽस्त्यादिक्रिया, तदपेक्षयैव लोकेऽर्थविषयकबोधजनकत्वेन तेषामर्थवत्त्वं संसिद्धम् ।

अर्थवत्त्वलक्षणे समभिव्याहारो नाम नियतपूर्वापरीभावः । एवञ्च घटोऽस्ति । अस्ति घटः, इत्यादि-अस्त्यादिक्रियाविषये नियतसमभिव्याहारनियमाभावेन नास्त्यादीनां समभिव्याहारः स्वीकृतः । तथैव लोक-इति लक्षणघटकेन प्रत्ययेषु प्रातिपदिकत्त्वप्रयोजकमर्थवत्त्वं निवार्यते, यतो हि शास्त्रेषु तु प्रत्ययानां सर्वत्र प्रकृतिसमभिव्याहारानपेक्षयापि शास्त्रीयमर्थवत्त्वमस्त्येव । कर्तरि कृत्[13], 'तयोरेव कृत्यक्तखलर्थाः'[14], अकर्तरि च कारके संज्ञायामि[15]त्यादीनि पाणिनिसूत्राण्येव तत्र मानमतस्तन्निवारणार्थं लोक-इति पदं सार्थकम् । तदुपादाने तु लौकिकवाक्ये प्रत्ययानां कुत्रचिदपि प्रकृत्यनपेक्षणाल्लौकिकार्थविषयकवोधजनकत्वाभावेन प्रत्ययमात्रे न तादृशार्थापत्तिः ।

"एधाञ्चक्रे" इत्यादौ एधामित्यर्थवत्त्वाभावेन प्रातिपदिकत्वाभावात् पदत्वाभावेन "वा पदान्तस्ये[16]ति पाणिनीयसूत्रस्याप्रवृत्तेः वैकल्पिकपरसवर्णो न स्यादन्यच्च "तिङतिङ्[17]" सूत्रेण विहितं यदतिङन्तपदात् परस्य तिङन्तस्य निघातं तदपि न स्यात् । एतदर्थमेतत्संज्ञाफलभूत-पदेतरो यो विभक्तीतरः, तत्समभिव्याहारानपेक्षया लोकेऽर्थविषयकवोधजनकत्वमर्थवत्त्वशरीरं वक्तव्यं दृश्यते । "एधाञ्चक्रे" इत्यत्र समाविष्टस्य "चक्रे" इत्यस्य तु एतत्पदग्राह्य-एधामिति प्रातिपदिकसंज्ञा फलभूतोत्पत्स्यमान-स्वादिविभक्तीतरत्वेऽपि पदेतरत्वाऽभावेन न कश्चन दोषः, यथा पदेतरःकश्चन घटपटादिः, तत्सम-भिव्याहारानपेक्षयैव लोकेऽर्थविषयकवोधजनकत्त्वेनार्थवत्त्वात् प्रातिपदिकत्वं सिद्ध्यति ।

अत्र लोकेऽर्थविषयकबोधजनकत्वमित्येतावदेवार्थवल्लक्षणमस्ति । अन्योऽशस्तूपलक्षणं न तु अर्थवल्लक्षणे प्रविष्टमिति कृत्वा महल्लाघवमागतम् ।

---

१३. पाणिनिसूत्रम् ३ । ४ । ६७
१४. पाणिनिसूत्रम् ३ । ४ । ७०
१५. पाणिनिसूत्रम् ३ । १ । १९
१६. पाणिनिसूत्रम् ८ । ४ । ५९
१७. पाणिनिसूत्रम् ८ । १ । २८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत्र प्रमाणतया तु अर्थवदधातुरप्रत्ययः प्रातिपदिकमितिघटकाधातुपदस्योपादानमेव व्याहरन्ति। एतत्संज्ञाफलभूतत्वमिति उपलक्षणमस्तीत्यत्र प्रत्यक्षमुद्घोषयति - म. महोपाध्यायः - श्रीनित्यानन्दपन्त-पर्वतीयोऽपि स्वटीकायाम्[१८]।

इयन्तु मदीया समीक्षा-

१- वाक्यार्थज्ञाने वाक्यघटक-पदपदार्थयोर्ज्ञानं कारणमिति नियमेनार्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रस्य शाब्दवोधस्तदा संभवति यदा तत्रत्यानां सर्वेषां वाक्यघटकपदानामर्थाः तन्निष्ठा शक्तिधीश्च भवेत्[१९]।

२- यद्यपि सर्वाण्यपि कारकसूत्राणि नियमपरकाण्येव, स्वादिविधौ प्रातिपदिकाधिकारात् "स्वौजसमौट्[२०], सूत्रेणैव प्रत्ययसिद्धेः। एतावता यथा कर्मगते एकत्वे द्वितीयाया एकवचनं भवतीति "कर्मणि द्वितीया[२१]"-सूत्रस्यार्थः। तथैव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा[२२]सूत्रस्यार्थोऽपि प्रातिपदिकार्थगते एकत्वे प्रथमाया एकवचनमिति क्रमेण फलति। अन्यच्च महासंज्ञानुरोधेन एकं वक्तीति एकवचनमित्यर्थात् प्रमाणसद्भाव एवौत्सर्गिकैकवचनप्रवृत्तेः। प्रत्ययरूपप्रातिपदिकार्थे लिङ्गसंख्यादेरभावेनैव विभक्त्युत्पत्तेरसम्भवः। एवञ्च पूर्वोक्तयोरुभयोःसूत्रयोर्घटकस्यार्थवत्पदस्य वृत्तिमत्त्वरूपसाधारणार्थोऽपि स्वीकर्तुं सम्भवः।

तत्र प्रत्ययपर्युदासोऽपि नावश्यकस्तथापि "कृत्तद्धितान्तञ्चैवार्थवन्नकेवला कृतस्तद्धिता वेति भाष्या[२३]भिप्रायेण कृत्तद्धितान्तमेवार्थवत्प्रातिपदिकं भवति, केवलाः कृतस्तद्धिता वा अर्थवन्तोऽपि न प्रातिपदिकसंज्ञका इत्यर्थात्। तत्र च तादृशस्य वृत्तिमत्त्वस्य केवलप्रत्ययेऽपि सत्त्वेन भाष्यविरोधःपष्ट एव। अत एव नागेशोक्तलक्षणमेव ज्याय इति विवेकः।

यथा तत्र सूत्रघटकेऽर्थवत्पदे (अर्थ + मतुप्) क्रमेण प्रकृतिप्रत्ययौ स्तः। तदन् सम्मिलितस्यैकार्थीभावयुतस्यार्थवत्पदस्यार्थः प्राचीनवैयाकरणानां मतेऽर्थवत्सूत्रे[२४] वृत्तिमत्स्वरूपः, अथ च कृत्तद्धितसमासाश्चेति सूत्रे[२५] एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धार्थकत्त्वरूपः स्वीक्रियते। अतस्तत्र पूर्वोत्तरसूत्रद्वयेऽर्थवत्पदस्य

१८. एततसंज्ञाफलभूतेति/चिकीर्षितप्रातिपदिकसंज्ञा फलभूतेत्यर्थः। विभक्तौ प्रातिपदिकसंज्ञाफलभूतत्वमुपलक्षणं न तु विशेषणमतो नान्योन्याश्रयः। अन्यथा अर्थवत्त्वज्ञानाधीना प्रातिपदिकसंज्ञा, तदधीनञ्चार्थवत्त्वज्ञानमित्यन्योन्याश्रयो दुरुद्धरःस्यात्। एवञ्च वस्तुतः प्रातिपदिकफलभूतेत्यादिलक्षणं फलितम्। म.म.श्रीनित्यानन्दपन्तपर्वतीयविरचिते लघुशब्देन्दुशेखरे दीपकाख्ये टिप्पणे पृ. १६०।

१९. पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः। शाब्दवोधः फलं तत्र शक्तिधीः सहकारिणी" इति न्यायसिद्धान्त-मुक्तावल्याश्शब्दखण्डस्य प्रारम्भे पृ.२९१।

२०. पाणिनिसूत्रम् ४।१।२

२१. पाणिनिसूत्रम् २।३।२

२२. पाणिनिसूत्रम् २।३।४६

२३. पाणिनिसूत्रम् १।२।४६ सूत्रव्याख्याऽवसरे पातञ्जलमहाभाष्ये।

२४ प्रौढ म.अ. पुंलिङ्गेऽर्थवदधातुरप्रत्ययःप्रातिपदमिति सूत्रे।

२५. प्रौ.म.अ. पुंलिङ्गे कृत्तद्धितसमासाश्चेति सूत्रे।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शक्तिद्वयकल्पनाशब्दाधिकारकल्पनाप्रत्ययपर्युदासकल्पनाप्रभृतिगौरवमालोचयता श्रीनागेशभट्टेनोक्तसूत्रद्वये एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकवोधजनकत्वरूपमेव परिष्कृतम्[२६]। कैयटेनापि लौकिकार्थप्रत्यासन्नोऽभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते स आश्रीयत इति व्याख्यानेन स्वाभिप्रायः समुद्गीर्णः[२७]। एतच्च न केवलप्रत्यये, प्रत्ययस्य प्रातिपदिकसंज्ञाफलभूतविभक्तीतरप्रकृति-समभिव्याहारापेक्षयैव लोकेऽर्थविषयकवोधजनकत्वादिति "हरिषु" इत्यादौ सोः प्रातिपदिकत्वाप्राप्त्या तद्वारणाय "अप्रत्ययः" इति पर्युदासो न कर्तव्य इत्यपि लाघवम् वोध्यम्।

३– येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥

सहायकग्रन्थसूची

१. वै. सिद्धान्तकौमुदी, श्रीमद्भट्टोजिदीक्षितः, मोतीलालवनारसीदासः, वाराणसी, १९७७।
२. महाभाष्यम्, भगवत्पतञ्जलिः, मोतीलालवनारसीदासः, वाराणसी, १९६७।
३. वै. भूषणसारः, श्रीकौण्डभट्टः, चौखम्बा ओरियन्टालिया, वाराणसी, १९७७।
४. परमलघुमञ्जूषा, श्रीनागोजिभट्टः, कृष्णदास-अकादमी, वाराणसी, २०४१ वि.सं.।
५. पाणिनीयशिक्षा, पं. युगलकिशोरपाठकः, चौखम्वाविद्याभवनम्, वाराणसी, २०४८ वि.सं.।
६. लघुशब्देन्दुशेखरः (टीकापञ्चकाञ्चितः), श्रीनागोजिभट्टः, वाणीविलासप्रकाशनम्, वाराणसी, १९८८।
७. शास्त्रार्थरत्नावली, जयदेवमिश्रः, वाणीविलासप्रकाशनम्, वाराणसी, २०५१।
८. प्रौढमनोरमा, श्रीमद्भट्टोजिदीक्षितः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, २०४७ वि.सं.।
९. न्यायसिद्धान्तमुक्तावली, श्रीविश्वनाथपञ्चाननः, चौखम्वासंस्कृतसंस्थानम्, वाराणसी, २०४९ वि.सं.।
१०. लघुशव्देन्दुशेखरः, श्रीनित्यानन्दपन्तपर्वतीयः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी।

---

२६. लघुशब्देन्दुशेखरस्थाऽर्थवत् सूत्रे।
२७. तत्रैव सूत्रव्याख्याने।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

घटकर्परकाव्यस्य साहित्यिकं वैशिष्ट्यम्

नन्दनः भट्टराई
उपप्राध्यापकः

१. प्रस्तावना

संस्कृतसाहित्यं हिन्दुसंस्कृतेर्जीवितमस्ति । हिन्दुसनातनसंस्कृतिः संस्कृतसाहित्ये दर्पण इव प्रतिबिम्बिता वर्तते । आर्यसभ्यतायाः सनातनपरम्परायाः सुन्दरसमन्वयरूपस्य संस्कृतसाहित्यस्य बीजं वेदेषु प्राप्यते । वैदिकमहर्षीणां गीतेष्वङ्कुरितं काव्यबीजं वाल्मीकिरामायणे पल्लवितं, महाभारते पूर्णतां प्राप्य विश्वसाहित्यस्योपजीव्यत्वेन समादृतं वर्तते । एतादृशसंस्कृतसाहित्यकल्पतरुर्भासकालिदासामरुक-वाणभवभूतिप्रभृतीनां महाकवीनां काव्यसुधारसवर्षाभिः कुसुमितोऽलौकिकसौरभप्रसारणशीलो वर्तते । एवंविधस्य संस्कृतसाहित्यकल्पवृक्षस्य फलं शाश्वतानन्दस्य प्राप्तिरेव । अलौकिकरसास्वादनहेतुभूतसंस्कृत-साहित्यं श्रव्यदृश्यगद्यपद्यरूपेण नानाविधासु पल्लवितमस्ति । छन्दोभाषाविषयस्वरूपविधानादिस्वरूपेण काव्यं नैकविधमस्ति । स्वरूपविधानदृष्ट्या काव्यं पञ्चविधं वर्तते । उक्तञ्च-

"सर्गबन्धोऽभिनेयार्थं तथैवाख्यायिकाकथे ।
अनिबद्धञ्च काव्यादि तत्पुनः पञ्चधोच्यते[1] ॥"

पद्यकाव्यमपि श्लोकगाथादिरूपं मुक्तकं, खण्डकाव्यं, महाकाव्यमिति त्रिविधमस्ति । तेषु काव्यस्यैकांशानुसारि खण्डकाव्यमुच्यते । उक्तञ्च-

"खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च[2] ।"

खण्डकाव्यस्यावान्तरभेदेषु सन्देशमूलकं काव्यं दृष्टिगोचरतामायाति । सन्देशमूलके काव्ये मूलतो विरहोच्छ्वसितं मनोगतं भावं नायको नायिका वा केनापि माध्यमेन स्वप्रियायै प्रियाय वा प्रेषयति । एतादृशे सन्देशमूलके दूतकाव्ये सुखदुःखात्मिकया रागात्मिकयानुभूत्या प्लावितं कविहृदयं गीतिस्वरूपेणाभिव्यज्यते । अतो दूतकाव्यं प्रायेण गीतिकाव्यात्मकं दृश्यते । गीतिकाव्यस्यानिवार्यतत्त्वं भावात्मकतास्ति । गेयात्मकतयात्र साहित्यसंगीतयोर्द्वयोरपि निरूपमं मेलनं दृश्यते । अद्यतनसंस्कृतगीति-

१. भामहाचार्यः, काव्यालंकारः (१-१८), द्वितीयं सं., भाष्यकारो देवेन्द्रनाथशर्मा, पटनाः विहार राष्ट्रभाषा परिषद्, सं. २०४२ ।
२. विश्वनाथकविराजः, साहित्यदर्पणः (६-३२९), नवमं सं., शालिग्रामशास्त्री, दिल्ली, मोतिलालवनारसीदास, ई.सं. १९७७ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

काव्यानां प्रेरणास्रोतः कालिदासस्य मेघदूतमेव। मेघदूते कुबेरशापान्निर्वासितस्य कस्यापि विरहिणो यक्षस्य मार्मिकं चित्रणमस्ति। प्रियाविरहव्याकुलितहृदयो गुह्यको वर्षारम्भे सन्नद्धं मेघं विलोक्योत्कण्ठितो भवति। प्रेमान्धश्चेतनाचेतनकृपणो राजराजानुचरो मेघमाध्यमेन स्वप्रियायै निजकुशलमयीं वार्तां शीघ्रप्रत्यागमनञ्च सन्दिशति। मन्दाक्रान्ताच्छन्दसि रचितं काव्यमिदं संस्कृतसाहित्यस्य शिरोभूषणं वर्तते। मेघदूतस्य विलक्षणप्रभावादेव संस्कृतसाहित्ये सन्देशकाव्यस्य दूतकाव्यस्य वा परम्परा प्रचलिता। अस्यामेव दूतकाव्यपरम्परायां पार्श्वाभ्युदय-नेमिदूत-शीलदूत-जैनमेघदूत-पवनदूत-चन्द्रदूत-मेघदूतसमस्यालेख-चेतोदूत-सिद्धदूत-हनुमत्दूत-हंसदूतेन्दुदूत-भृंगदूतप्रभृतीनि काव्यानि समुद्भूतानि[३]। अस्यामेव सन्देशकाव्य-गीतिकाव्य-दूतकाव्यपरम्परायां 'घटकर्परकाव्यं ' नयनगोचरतामायाति। कलेवरविन्यासे वामनरूपमपि काव्यमिदं कविताकामिनीश्रृंगारप्रसाधने त्रिविक्रमायते। सर्वकाव्यलक्षणसम्पन्नं काव्यात्मभूतश्रृङ्गाररसपरिपूर्णमपि काव्यमिदं विरला एव जानन्ति। एतादृशरमणीय-काव्यस्य काव्यगतसौन्दर्यं विविच्य सर्वसंवेद्यतोद्घाटनमेव लेखस्यास्य प्रयोजनमस्ति।

२. घटकर्परनामकरणवैशिष्ट्यम्

जीवानन्दविद्यासागरभट्टाचार्येण ईसवीये १८८८ तमे वर्षे सम्पादिते काव्यसंग्रहे संगृहीतं काव्यमिदं घटकर्परकाव्यमिति नाम्ना प्रसिद्धमस्ति। कथमस्य घटकर्परमिति विचित्रमभिधानं जातम्, अस्य रचयितुर्यथार्थपरिचयः कः ? इति विषयेऽनुसन्धानमवशिष्टमेव। 'घटस्य कलशस्य, कर्परो भग्नावयवो घटकर्परः' इत्यस्य शब्दस्य व्युत्पत्तिर्भवति। अन्यत्र घटकर्परशब्दस्थाने 'घटखर्परः' इत्यपि शब्दो दृश्यते।[४] अमरकोषानुसारेण कर्परशब्दस्यार्थः कपालो भवति- 'स्यात् कर्परः कपालोऽस्त्रीति'। परन्तु भाषायां कर्परः (खर्परः) इत्यनेन खपरा (हिन्दी) खपटा (नेपाली) इति ज्ञायते। कालिदासस्य ज्योतिर्विदाभरणे तु राज्ञो विक्रमादित्यस्य नवरत्नेष्वन्यतमत्वेन कविघटखर्परस्योल्लेखः प्राप्यते-

"धन्वन्तरिक्षपणकामरसिंहशंकुवेतालभट्टघटखर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य"[५] ॥

सम्भवतः काव्येऽस्मिन् प्रयुक्तस्य घटकर्परपदस्य साभिप्रायतया काव्यकारस्य 'घटकर्परः' इति प्रसिद्धिर्जाता। घटकर्परेण विरचितं काव्यं घटकर्परकाव्यमिति समुचितमेवास्याभिधानम्।

३. विषयवस्तुवैशिष्ट्यम्

केवलं द्वाविंशतिश्लोकैर्निबद्धं घटकर्परं लघुकाव्यमस्ति। काव्येऽस्मिन् कस्या अपि विरहानलपीडिताया नायिकाया मनोदशा प्राधान्येन चित्रितास्ति। वर्षारम्भे प्रावृषाभिभूतां प्रकृतिं निरीक्ष्य प्रवासिनं कान्तं स्मारं स्मारं कापि सुकुमारहरूमा विरहिणी भावविह्वला भवति। सन्नद्धस्य मेघस्य द्रुतगतिमवलोक्य निजकान्तस्य शीघ्रगृहप्रत्यागमनार्थं तमेव सन्देशहरत्वेन नियोजयति सा। यथा-

---

३. आचार्यवलदेव उपाध्यायः, संस्कृतसाहित्यका इतिहास (वाराणसीः शारदानिकेतन, ई. १९७८) पृ. ३२५।
४. आचार्यरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, (वाराणसीः चौखम्वाविद्याभवन, इ. १९९३) पृ. ७६
५. शिवनाथझारखण्डी, भारतीयज्योतिष, द्वितीय सं., (लखनऊः उत्तरप्रदेश, हिन्दी संस्थान, इ. १९९०) पृ. २९४।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

"ब्रूत तं पथिकपांशुलं घनाः
यूयमेव पथि शीघ्रलंघनाः ।
अन्यदेशरतिरद्य मुच्यतां
साथवा तव बधूः किमुच्यताम्[६] ॥"

प्रियवियोगव्याकुलाया नायिकाया वचनानि निशम्य दयालुर्मेघस्तस्याः सन्देशं नायकसमीपं नयति । दयितायाः सर्वं वृत्तान्तं ज्ञात्वा स्वल्पैरेव दिवसैः स गृहं प्रत्यागच्छति । प्रस्तुतविषयं कविरित्थं वर्णयति -

"एतन्निशम्य विरहानलपीडितायाः
तस्या वचः खलु दयालुरपीडितायाः ।
स्वं स्वारवेण कथितं जलदैरमोघैः
प्रत्याययौ स गृहमूनदिनैरमोघैः[७] ॥"

मुख्यविषयवस्तुनः पूर्वरङ्गप्रसङ्गाय वर्षाकालिकप्रारम्भिकपरिवेशवर्णनपूर्वकं काव्यस्य श्रीगणेशं करोति महाकविर्घटकर्परः-

"निचितं खमुपेत्य नीरदैः
प्रियहीना हृदयावनीरदैः ।
सलिलैर्निहितं रजः क्षितौ
रविचन्द्रावपि नोपलक्षितौ[८] ॥"

महाकविना सार्वभौमं सार्वजनीनं सार्वकालिकं विषयवस्तु काव्यस्य मूलकथानकरूपेण चमत्कारिप्रवहणशीलतया प्रस्तुत्य काव्ये किमपि रामणीयकमुद्भावितमस्ति । यमकालङ्कारप्रयोगे निजपरिभवकारिणः क्रीतदासो भविष्यामीति महाकवेर्गर्वोक्तिप्रकाशनान्तं घटकर्परकाव्यं पूर्णतामेति ।

४. शैलीवैशिष्ट्यम्

काव्यस्य शैलीपक्षः शरीरस्थानीयो भवति । इयमेव शैली सरणिः पद्धतिः, प्रस्तुतिरित्यादिनाम्नापि ज्ञायते । गुणालङ्काररीतयः शैल्यामेवान्तर्भवन्ति । गुणो यद्यपि रसस्य धर्मविशेषस्तथापि शब्दार्थयोराश्रितत्वात् तस्यापि शैल्यामेवान्तर्भावः समुचित एव । वस्तुतः काव्यरचनायां कविस्वभाव एव शैलीरूपेण परिस्फुरति । संस्कृतकाव्यपरम्परायां मूलतो द्विविधा शैली दृश्यते–ललिता विचित्रा च । इयमेव शैली दण्डिप्रभृतिभिर्गौडवैदर्भमार्गरूपेण स्वीकृतास्ति । उक्तञ्च दण्डिना-

६. घटकर्परकाव्यम् (श्लोक -८), काव्यसंग्रहः प्रथमो भागः, सं. जीवानन्दविद्यासागरभट्टाचार्यः, वी.ए., (दिल्लीः रिप्रिन्टोग्राफिक्स, इ. १९९२), इ. १८८८ ।
७. पूर्ववत् (श्लोकः-२१)
८. पूर्ववत् (श्लोकः-१)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

"अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम् ।
तत्र वैदर्भगौडीयौ वर्ण्यते प्रस्फुटान्तरौ[९] ॥"

काव्यालङ्कारकारो भामहाचार्यो गड्डलिकाप्रवाहवत्प्रचलितं देशविशेषसंज्ञकं काव्यभेदं नैव स्वीकरोति । तन्मतानुसारेण सालङ्कारताऽग्राम्यतार्थगम्भीरतौचित्याऽक्लिष्टतादीनि काव्यसौन्दर्याधायक-तत्त्वानि भवन्ति । यदाह भामहः-

"अलङ्कारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम् ।
गौडीयमपि साधीयो वैदर्भमिति नान्यथा[१०] ॥"

लक्षणकारैः शव्दविन्यासशैलीं 'पदसंघटना रीतिः' इति स्वीकृत्य ललितात्मिका वैदर्भी, शब्दाडम्बरा गौडी, मध्यमा पाञ्चालीति मुख्यभेदा निरूपिताः सन्ति । इयमेव काव्यरचनासरणी वक्रोक्तिजीवित-कारेणाचार्यकुन्तकेन सुकुमारमार्गविचित्रमार्गरूपेण प्रतिपादितास्ति -

"सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः ।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः[११] ॥"

शैलीप्रयोगदृष्ट्या महाकविर्घटकर्परः सुकुमारमार्गानुयायी दृश्यते । विचित्रमार्गस्य प्राणभूतानां यमकादीनां प्रयोगेऽपि घटकर्परकाव्यस्य शैली कालिदासादीनामिव सुकुमारसुभगा रसपेशला मनोहारिणी च वर्तते -

"हंसपंक्तिरपि नाथ सम्प्रति
प्रस्थिता वियति मानसं प्रति ।
चातकोऽपि तृषितोऽम्बु याचते
दुःखिता पथिक सा प्रिया च ते[१२] ॥"

४.१ गुणवैशिष्ट्यम्

काव्यात्मभूतं रसादिमाश्रितवन्तो धर्मविशेषा गुणा उच्यन्ते -

"तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः[१३] ।"

आस्वादप्रभेदेन चित्तावस्थाविशेषभेदेन वा गुणा माधुर्यौजःप्रसादाख्यास्त्रिविधाः सन्ति ।

---

९. दण्डी, काव्यादर्शः (१-४), आचार्यरामचन्द्रमिश्रः, (वाराणसीः चौखम्वाविद्याभवन, ई. १९९६) ।
१०. भामहः, काव्यालंकारः (१-३५), भाष्यकारो देवेन्द्रनाथशर्मा, (पटनाः विहार राष्ट्रभाषा परिषद, इ. १९८५) ।
११. आचार्यकुन्तकः, वक्रोक्तिजीवितम् (१-२४), व्याख्याकारो राधेश्यामिमिश्रः, (वाराणसीः चौखम्वासंस्कृतसंस्थान, सं. २०४७) ।
१२. घटकर्परकाव्यम् (श्लोकः-९)
१३. आनन्दवर्धनाचार्यः, ध्वन्यालोकः (२-६), व्याख्याता विश्वेश्वरसिद्धान्तशिरोमणि (सं. डा. नगेन्द्र, एम्. ए., डी. लिट्.), (वाराणसी ज्ञानमण्डललिमिटेड सं. २०१९)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तेषु चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते। चित्तस्य विस्ताररूपं दीप्तत्वमोज उच्यते। झटित्यर्थसमर्पकत्वं प्रसादस्य लक्षणमस्ति।

घटकर्परकाव्ये विशेषतः श्रृङ्गाररसानुकूलो माधुर्यगुणस्य प्रसादगुणस्य च सद्भावो वर्तते । यद्यपि गुणाः रसस्य धर्मास्तथापि शब्दार्थयोराश्रितत्वात् तेषां शब्दार्थवृत्तिरुच्यते -

"गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता[१४]।"

माधुर्यगुणानुकूलानां वर्णानामसमस्तपदानां श्रुतिमात्रेणार्थबोधकानां शब्दानाञ्च प्रयोगेण घटकर्परकाव्ये कापि मधुरता, प्रसन्नता, रसपेशलता अनुभूयते। यथा-

"नीलशस्यमभिभाति कोमलं
वारि विन्दति च चातकोऽमलम्।
अम्बुदैः शिखिगणो विनाद्यते
का रतिर्दयितया विनाद्य ते[१५] ॥"

अत्र शब्दानां झटित्यर्थसमर्पकतया प्रसादगुणस्य, असमस्तमधुरपदानां हृदयाह्लादकतया च माधुर्यगुणस्य सद्भावो विप्रलम्भश्रृंगारानुकूलो वर्तते।

४.२ अलङ्कारवैशिष्ट्यम्

'अलङ्करोतीति, अलङ्क्रियतेऽनेनेति, अलङ्करणमिति वा अलङ्कारः' इति व्युत्पत्या काव्यात्मभूतस्य रसादेः सौन्दर्याधानहेतुभूताः शब्दार्थयोरनियता धर्मविशेषा अलङ्कारा उच्यन्ते। उक्तञ्च-

"शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्[१६] ॥"

अत्र, अलङ्कारा अस्थिरा इति नैषां गुणवदावश्यकी स्थितिर्भवतीति दर्पणकारस्य विचारो वर्तते। परन्तु वामनाचार्यस्य मते 'सौन्दर्यम् अलङ्कारः, काव्यं खलु अलङ्कारादेव ग्राह्यमुपादेयं भवति।' तथैव दण्डिनोऽभिमतं वर्तते-

"अलङ्कारविहीना तु विधवेव सरस्वती।"
अस्मिन् विषये भामहाचार्यः स्पष्टमुद्घोषयति-
"न कान्तमपि निर्भूषं विभाति वनिताननम्।"

शब्दपरिवृत्तेः सहत्वेनासहत्वेनालङ्कारो द्विविधो वर्तते- शब्दालङ्कारोऽर्थालङ्कारश्च। अत एव तत्र शब्दाश्रिताः शब्दालङ्कारा यमकानुप्रासादयोऽर्थाश्रितास्त्वर्थालङ्कारा उपमारूपकादयः सन्ति। तत्र

---

१४. मम्मटाचार्यः, काव्यप्रकाशः (८-७१), आचार्यविश्वेश्वरसिद्धान्तशिरोमणि (सं डा. नरेन्द्र, एम्. ए., डी. लिट्.), (वाराणसी ज्ञानमण्डललिमिटेड सं. २०४२)

१५. घटकर्परकाव्यम् (श्लोकः-१०)

१६. विश्वनाथकविराजः, साहित्यदर्पणम् (१०-१)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शब्दार्थालङ्कारविषये केचन सुपां तिङाञ्च व्युत्पत्तिं वाचामलङ्कृतिं वाञ्छन्ति, अपरेऽर्थव्युत्पत्तिमेव चारुत्वहेतुत्वेन स्वीकुर्वन्ति ।अस्मिन् विषये भामहाचार्यस्य मतं सर्वथैव श्लाघ्यमस्ति-

शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः[१७] ।"

काव्येऽस्मिन् घटकर्पराख्येऽलंकार्यश्रृङ्गाररसानुकूलानां यमकानुप्रासरूपकोपमादीनामलङ्काराणां समुपस्थितिर्विद्यते । विशेषतोऽत्रान्यालङ्कारापेक्षया यमकस्य चमत्कारिप्रयोगः सर्वातिशायी वर्तते । तत्र 'हंसा नदन्मेघभयाद् द्रवन्ति .... मेघागमे कुन्दसमा नदन्ति ।' इति द्वितीयश्लोके 'कुन्दसमा नदन्ति' इत्यत्र, 'मेघावृतं निशि न भाति .... भूधरसन्निभानाम् ।' इति तृतीयश्लोके 'भूधरसन्निभानाम्' इत्यत्र चोपमालङ्कारो वर्तते । तथैव 'निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः ।' इति प्रथमे श्लोके 'प्रियहीनाहृदयावनीरदैः' इत्यत्र प्रियहीनायाः वियोगिन्याः हृदयमेव अवनी तस्या रदैः खण्डनकारिभिः इति रूपकालङ्कारस्य चारुता दृश्यते । तथैव 'तत् साधु यत् त्वां सुतरुं ससर्ज .... नेत्रोत्सवश्चासि सयौवनानाम् ।' इति षोडशे श्लोके 'नेत्रोत्सवश्चासि' इत्यत्र च रूपकालङ्कारोऽस्ति । रसाद्यनुगतो वर्णानां प्रकृष्टो न्यासः 'अनुप्रासः' उच्यते । अस्मिन् काव्ये श्रृङ्गाररसानुकूलवर्णानां रमणीयतास्थापनं पदे पदे वर्तते ।

४.२.१ यमकालङ्कारवैशिष्ट्यम्

अर्थे सति भिन्नार्थकस्य स्वरव्यञ्जनसमूहस्य तेनैव क्रमेणावृत्तिर्यमकमुच्यते । अस्मिन् घटकर्परकाव्ये यमकालङ्कारस्य सहृदयहृदयावर्जकप्रयोगो दृश्यते । प्रतिपादं यमकालङ्कारस्य स्वतस्फूर्ततया सन्निवेशेन काव्यमिदं चमत्कृतमेव । विचित्रमार्गस्य प्राणभूतानां यमकादीनां सुकुमारमार्गे स्थापनं दुष्करमेव । तत्रापि विप्रलम्भश्रृङ्गारे यमकालङ्कारस्य चारुप्रयोगः प्रायोऽसम्भव एव । अतो ध्वन्यालोककारेण स्पष्टतयोद्घुष्टम्-

"ध्वन्यात्मभूते श्रृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः[१८] ।"

परन्तु घटकर्परेण संयोजितानां यमकालङ्काराणां सुषमा कस्य सचेतसश्चेतो नावर्जयति ? घटकर्परकाव्यस्यालङ्कारा रसाक्षिप्ततया सहृदयहृदयाह्लादकारिणः सन्तीत्यत्र न कापि विप्रतिपत्तिः । आनन्दवर्धनाचार्येण विषयेऽस्मिन् यदुक्तं तत् समीचीनमेव-

"रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः[१९] ॥"

घटकर्परकाव्ये चतुश्चत्वारिंशत्पदेषु यमकस्य चारुः सन्निवेशो विलसति । अतः काव्यमिदं 'यमककाव्यम्' इति नाम्नापि प्रसिद्धमस्ति । अत्र सर्वत्र पादान्त्ययमकस्य छटा दरीदृश्यते । यथा-

---

१७. भामहः, काव्यालंकारः (१-१५)

१८. ध्वन्यालोकः (२-१५)

१९. पूर्ववत् (२-१६)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

"कुसुमितकुटजेषु काननेषु,
प्रियरहितेषु समुत्सुकाननेषु।
वहति च कलुषे जले नदीनां,
किमिति च मां समवेक्षसे न दीनाम्[२०] ॥"

एवं प्रकारेण 'खमुपेत्य नीरदैः, हृदयावनीरदैः, नास्तिकान्तया, तालकान्तया, विनाशितेषु, व्यथिता कदाहं, शोकदाहम्, प्रवरो वनानाम्, सयौवनानाम्' इत्यादिषु पदसमूहेषु भिन्नार्थकतया यमकप्रयोगः काव्येऽस्मिन् सर्वत्र सहृदयाह्लादको दृश्यते। यमकालङ्कारस्यैतादृशी रसपेशला मनोहारिणी छटा दुर्लभैवास्ति।

५. छन्दःप्रयोगवैशिष्ट्यम्

महाकविर्घटकर्परो रसानुकूलच्छन्दसां प्रयोगेऽपि विचक्षणो दृश्यते। काव्येऽस्मिन् घटकर्पराख्ये श्रृंगाररसानुकूलानां छन्दसां चारुसन्निवेशात् किमपि लालित्यं किमपि माधुर्यं, कापि सरसता सहृदयैरनुभूयते। अस्मिन् घटकर्परकाव्ये सुन्दरी-वसन्ततिलका-रथोद्धता-पुष्पिताग्रोपजाति-द्रुतविलम्वितवृत्तानां निसर्गतो ललितानां सरसानां मनोहारिविन्यासो श्रुतिमात्रेण रसिकजनानां चित्तं क्षिप्रं व्याप्नोति । तत्र 'श्रृङ्गारालम्वनोदारनायिकारूपवर्णने वसन्तादितदङ्गवर्णने चेन्द्रवज्रोपेन्द्रवज्रोपजातिप्रभृतिवृत्तानां, चन्द्रोदयादिविभावादीनां वर्णने रथोद्धतावृत्तस्य, वीररौद्रयोः संकरे वसन्ततिलकस्य, श्रृङ्गारे करुणे पुष्पिताग्रादीनां वृत्तानांमानुगुण्यं भवतीति रसभावविषयानुकूलच्छन्दःप्रयोगसिद्धान्तोऽस्मिन् काव्ये सम्यक्तया पालितोऽस्ति।

६. रसभाववैशिष्ट्यम्

काव्यस्यात्मा रसभावादिरस्ति। स चास्वादापरपर्यायीभूता परनिर्वृतिरेव। अतो ध्वनिप्रस्थापन-परमाचार्येण मम्मटेन काव्यप्रयोजनव्याख्याप्रसङ्गे 'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इति प्रतिपादितमस्ति। गुणालङ्काररीतिप्रभृतिभिरभिव्यज्यमाना रसभावादय एव काव्यकर्तुः प्रतिपाद्यविषयो भवति। अनुभूतिषु माधुर्यानुभूतिः प्रकृष्टा भवति। अतः श्रृङ्गाररसो रसराजत्वेन स्वीकृतोऽस्ति। उक्तञ्च ध्वनिकारेण-

"श्रृङ्गार एव मधुरः परः प्रह्लादनो रसः।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति[२१] ॥"

श्रृङ्गाररस्य द्वयोर्भेदयोः सम्भोगस्य पोषकत्वाद् विप्रलम्भो विलक्षणप्रभावशाली वर्तते। उक्तञ्च -

'न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते।'

सम्भोगश्रृङ्गारापेक्षया विप्रलम्भश्रृङ्गारे सहृदयहृदयं द्रुततरं विगलति। इमामेव रसिककविपरम्परामनु-सरन्महाकविर्घटकर्परः स्वकीयकाव्ये विप्रलम्भमाश्रयते। विप्रलम्भश्रृङ्गाररसस्याभिव्यक्त्यै यथोचितानाम् ॠतुकालकथानकपरिवेषपात्रच्छन्दोऽलंकारगुणरीतीनां प्रयोगोऽत्र वर्तते। "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति भरतसूत्रानुसारेण विप्रलम्भश्रृङ्गाररसानुकूलानां विभावादीनां यथायोग्यं सन्निवेशोऽत्र

---

२०. घटकर्परकाव्यम्, (श्लोकः-१३)
२१. ध्वन्यालोकः (२-७)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्तते । अत्र प्रवासीनायक आलम्वनविभावः, विरहिणी नायिका चाश्रयभूता । वर्षाकालिका हंसचातकमयूरादिपक्षिणः, कुटजकेतककदम्ववृक्षाणां पुष्पाणि, भ्रमररुतमेघचन्द्रादयश्चोद्दीपनविभावाः सन्ति । अत्रानुभावाः स्पष्टतया नैवोल्लिखितास्तथापि तदनुवृत्तिवशात् नायिकायाश्चेष्टादय आक्षिप्यन्ते इत्यत्र न कापि विप्रतिपत्तिः । उक्तञ्च-

"सद्भावश्चेद् विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते[२२] ॥"

अत्रौत्सुक्यचिन्तानिर्वेदादयो व्यभिचारिभावाः समुल्लसन्ति । एभिर्विभावानुभावसञ्चारिभावैर्नायिकाहृदयगतः स्थायिभावो रतिर्विप्रलम्भश्रृङ्गारत्वेन रसरूपतामेति । यथा-

"हंसपंक्तिरपि नाथ सम्प्रति,
प्रस्थिता वियति मानसं प्रति ।
चातकोऽपि तृषितोऽम्बु याचते,
दुःखिता पथिक सा प्रिया च ते[२३] ॥"

अत्र विरहिणी नायिका रतेराश्रयभूता, पथिक आलम्बनं, हंसचातकादय उद्दीपनविभावा इति नायिकानिष्ठा रतिर्नाभीष्टमुपैतीति प्रवासाख्यविप्रलम्भोऽनुभूयते । इत्थं घटकर्परकाव्येऽस्मिन् रसभावादीनां चारुसन्निवेशेन घटकर्परस्याजस्ररसप्रवाहस्य कवेर्भावधारायाश्च सुमधुरप्रवाहः प्रतिपदं दर्शनीयोऽस्ति ।

७. उपसंहारः

एवं संस्कृतसाहित्यस्य दूतकाव्यपरम्परायां घटकर्परनाम्नो लघुतमकाव्यस्य विविधानि काव्यशास्त्रीयवैशिष्ट्यानि दृष्टिपथमवतरन्ति । अस्य घटकर्परकाव्यस्य सूक्ष्मावलोकनेन ज्ञायते यदसौ कविः शैलीप्रतिपादनरसभावनिरूपणदृष्ट्या उत्तमकविर्वर्तते । प्रकृतिचित्रणनारीहृदयवर्णनेऽपि घटकर्परः काव्यं सफलमेवास्ति । 'औचित्योपनिबन्धस्तु रसस्योपनिषत्परेति सिद्धान्तो घटकर्परीयपदार्थसन्निवेशे सार्थको दृश्यते । संभवतः कालिदासस्य मेघदूतस्य लोकोत्तरं सौन्दर्यं विलोक्य घटकर्परेण तस्यैव छायानुकरणमिव काव्यमिदं रचितमिति प्रतिभाति । विषयवस्तुवर्णने चरित्रचित्रणे शैलीस्थापने प्रकृतिप्रतिपादने रसभावाभिव्यक्तौ सर्वत्र हिन्दुदर्शनानुरूपं साम्यमेवानुभूयते द्वयोरपि मेघदूतघटकर्परकाव्ययोः । मेघदूतस्य मन्थनान्निसृतं नवनीतमिव मधुरमस्ति घटकर्परसास्वादनम् । काव्यस्यान्ते नायकनायिकासंयोगवर्णनेन पौरस्त्यसंभोगान्तकाव्यपरम्परापि परिपालिता घटकर्परेण । विप्रलम्भश्रृङ्गारे यमकालङ्कारप्रयोगो दुष्कर इति संस्कृतसाहित्यधुरन्धराणां मतमस्ति-

"ध्वन्यात्मभूते श्रृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः[२४] ॥"

---

२२. साहित्यदर्पणः (३-१७)
२३. घटकर्परकाव्यम्, (श्लोकः-९)
२४. ध्वन्यालोकः (२-१५)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यद्यपि यमकप्रयोगो विचित्रमार्गप्रवर्तको रसश्च सुकुमारमार्गप्रशस्तस्तथापि घटकर्परस्य विलक्षणप्रतिभैव विलसति यदनेन विचित्रमार्गानुकूलं यमकं रसानुकूलं कृतम् । अतः संस्कृतसाहित्यस्य सर्वेषामेव वैशिष्ट्यानां सन्निवेशोऽत्र दृश्यते । यद्यपि 'नीतिसारम्' इति नाम्ना प्रसिद्ध एकविंशतिश्लोकात्मकः सूक्तिसंग्रहो घटकर्परस्य रचनेति काव्यसंग्रहे संकलितोऽस्ति, तथापि एतादृशप्रतिभावतो महाकवेरन्येषां काव्यानामभावः संस्कृतसाहित्यस्य दौर्भाग्यमेव । प्रायेण संस्कृतवाङ्मयं राज्याश्रय एव समृद्धम् । राज्याश्रयपराङ्मुखाः कवयः प्रायेण गुणराशिविनाशिना दारिद्र्यदोषेण प्रतिहता विशालकायग्रन्थरचनायां विमुखा इव दृश्यन्ते । विक्रमस्य नवरत्नरूपेण प्रसिद्धोऽपि घटकर्परः स्वतन्त्रताप्रियः प्रतीयते । अत एवोक्तं तेन नीतिसारे-

"एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोरिति यो बभाषे ।
नूनं न दृष्टं कविनापि तेन
दारिद्र्यदोषो गुणराशिनाशी[२५] ॥"

एतादृशां विलुप्तप्रायाणां विलक्षणप्रतिभावतां कवीनां काव्यानाञ्चान्वेषणमनुसन्धानञ्चात्यन्तमेवाश्यकमस्ति । दृश्यतां स्वाभिमानिनो महाकवेर्घटकर्परस्य चमत्कृतिमद्रसपेशला गर्वोक्तिः-

"आलम्ब्य चाम्बु तृषितः करकोषपेयं
भावानुरक्तवनितासुरतैः शपेयम् ।
जीवेय येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटकर्परेण[२६] ॥" इत्यलं विस्तरेण ।

सन्दर्भग्रन्थसूची

१. अमरसिंहः, अमरकोषः, प्रथम सं., कुलचन्द्रगौतमः, ने.रा.प्र.प. सं. २०२६ ।
२. आचार्यः रामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, वाराणसी, चौखम्वासुरभारतीप्रकाशन, ई. १९९३ ।
३. आचार्यः वलदेव उपाध्यायः, संस्कृतसाहित्यका इतिहास, दशम सं., वाराणसी, शारदानिकेतन, इ. १९७८ ।
४. आनन्दवर्धनः, ध्वन्यालोकः, प्र.सं., व्याख्याकार आचार्यो विश्वेश्वरः सिद्धान्तशिरोमणिः, सं. डा. नगेन्द्र, एम्. ए. डी. लिट्.। वाराणसी, ज्ञानमण्डल लिमिटेड, सं. २०१९ ।
५. कुन्तकः, वक्रोक्तिजीवितम्, प्र.सं., व्याख्याकारो राधेश्याममिश्रः एम्.ए., वाराणसी, चौखम्वासंस्कृतसंस्थान, सं. २०४७ ।
६. दण्डी, काव्यादर्शः द्वि.सं., व्याख्याकारो रामचन्द्रमिश्रः, वाराणसी, चौखम्वाविद्याभवन, ई. १९९६ ।
७. भट्टाचार्य, जीवानन्दविद्यासागर, बी:ए., काव्यसंग्रहः .(प्रथमो भागः) इ. १८८८ (दिल्ली, रिप्रिन्टोग्राफिक्स) ई. १९९२ ।
८. भामहः, काव्यालङ्कारः, द्वि.सं., भाष्यकारो देवेन्द्रनाथशर्मा, पटना, विहारराष्ट्रभाषा परिषद्, सं. २०४२ ।
९. मम्मटः, काव्यप्रकाशः, व्याख्याकार आचार्यो विश्वेश्वरः सिद्धान्तशिरोमणिः, सं. डा. नरेन्द्र एम्.ए. डी.लिट्., वाराणसी, ज्ञानमण्डल लिमिटेड, सं. २०४२ ।
१०. वामनाचार्यः, काव्यालङ्कारसूत्राणि, द्वि.सं., हरगोविन्दशास्त्री, वाराणसी, चौखम्बासुरभारतीप्रकाशनम्, ई. १९९५ ।
११. विश्वनाथकविराजः, साहित्यदर्पणः, नवम सं., शालिग्रामशास्त्री, दिल्ली, मोतीलालवनारसीदासः, ई. १९७७ ।

---

२५. महाकविर्घटकर्परः, नीतिसारम् (श्लोकः -१७), काव्यसंग्रहः प्रथमो भागः, सं जीवानन्दविद्यासागरभट्टाचार्यः बी.ए. (दिल्लीः इ. १८८८) पृ. ३७४-३८०

२६. घटकर्परकाव्यम् (श्लोकः - २२)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्भागवतीयदशमस्कन्धस्य विंशतितमेऽध्यायेऽलङ्कारसौन्दर्यम्

जगन्नाथरेग्मी
उपप्राध्यापकः

१. प्रसङ्गविधानम्

अनेकदुःखप्रपञ्चभववारिधौ रिङ्गमाणानां प्राणिनां कैवल्य (मुक्ति) प्राप्तेरेकमेवोपायभूतं श्रीमद्-भागवतमहापुराणं पुराणेषु तिलकायते । भक्तितत्त्वप्रतिपादनपरं श्रीकृष्णचरितसर्वस्वं समस्तसंस्कृतवाङ्मय-चमत्कृतिभूतं ज्ञानप्रधानमिदं पुराणं रसपूरितैर्मधुरैर्दृष्टान्तैरद्वैततत्त्वं प्रतिपादयति । अनेकजन्मार्जितानां पुण्यानां प्रभावात् सौभाग्योदये जाते भगवत्कथाश्रवणस्य अवसरः प्राप्यते–

एतस्मादपरं किञ्चित् मनःशुद्ध्यै न विद्यते
जन्मान्तरे भवेत् पुण्यं तदा भागवतं लभेत् ॥[1]

भगवान् वेदव्यास ऋग्यजुःसामाथर्वाभिधानां वेदानां व्यासाय स्वयमेव मनुष्यरूपेण आत्मानं अवतार्य पुराणोपपुराणानि रचितवान्[2] । अस्मिन् क्रमे सप्तदशपुराणानां रचनानन्तरमप्यसन्तुष्टो महर्षिवेदव्यासो नारदोपदेशेन भगवद्दिव्यलीलाललितं लोकोत्तरैश्श्रुतिसुखावहैर्गुणानुवादैर्भरितमिदं पुराणरत्नं रचितवान् इति भागवतविषये निगद्यते–

श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम् ।
पठस्व स्वमुखेनैव यदीच्छसि परां गतिम् ॥[3]
सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिःक्वचित् ॥[4]

इत्यादिभिर्वाक्यैः श्रीमद्भागवतमहापुराणस्य महन्मूल्यं गभीरं महत्त्वञ्च प्रदर्शितमस्ति । आध्यात्मिक-चिन्तन-दृष्ट्या, भक्तितत्त्वप्रतिपादनरूपेण मोक्षरूपपुरुषार्थप्रतिपादकतया निजातिशय-गुणगरिम्णा चेदं शास्त्रसर्वस्वं भागवतं पुराणमूर्धन्यतायां पृथक्प्रतिष्ठां ख्यापयति । "विद्यावतां भागवते परीक्षा" सुप्रसिद्धेयं सूक्तिरपि विषयगाम्भीर्यमस्य स्पष्टं प्रमाणयति । विद्वद्भिः, पुराणसाहित्यानां चतुर्लक्षश्लोकसंख्या गणिताः सन्ति । तेषु श्रीमद्भागवतमहापुराणे अष्टादशसहस्रश्लोकाः सन्ति ।

१. श्रीमद्भागवतमहापुराणमाहात्म्यम् १।११ पृ. १ ।
२. श्रीमद्भागवतमहापुराणभूमिका
३. श्रीमद्भागवतमाहात्म्यं विष्णुखण्डान्तर्गतम् २ पृ. १८ ।
४. श्रीमद्भागवतमाहापुराणम् १२।१३।१५ पृ. ६३६ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एवं पुराणसन्दोहश्चतुर्लक्ष उदाहृतः ।
तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥[५]
ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः ।
परीक्षिच्छुकसंवादः शृणु भागवते च तत् ॥[६]

भागवते द्वादशस्कन्धाः, ३३५ अध्यायाः, १८००० श्लोकाः सन्ति । प्रवन्धविधानदृष्ट्या चायं ग्रन्थः संस्कृतवाङ्मयस्य बृहत्तरग्रन्थे समाहितो जायते, विषयवाहुल्यादुत्तरवर्तिनः कवयः ग्रन्थकाराश्च अमुं ग्रन्थरत्नमुपजीव्यत्वेन सम्मानयन्ति । अस्य ग्रन्थस्य केवलं पौराणिकमूल्यं नास्ति अपि तु साहित्यशास्त्रीयदृष्ट्यापि उच्चतमं स्थानं बिभर्ति नूनम् । "इदं भागवतं महनीयं काव्यरत्नमपि विद्यते वस्तुवर्णनशैली तदीया काव्यमयी विभाति । तत्रत्यर्तुप्रभृतिप्रकृतिच्छटां विलोक्य कवयोऽपि स्वस्वकाव्ये तद्विधं वर्णनमकुर्वन् ।"[७]

२. विषयप्रवेशः

श्रीमद्भागवतीयदशमस्कन्धान्तर्गते विंशतमेऽध्यायेऽलङ्कारसौन्दर्यप्रतिपादनं निरीक्षणं वाऽस्य लेखस्य विषयः । प्रस्तुतेऽस्मिन्नध्याये तत्र भगवता वेदव्यासेन ३० श्लोकैः वर्षावर्णनमवशिष्टश्लोकैश्च शरद्वर्णनं कृतमस्ति । यद्यपि भागवतस्य विभिन्नप्रसङ्गेषु अनेकविधस्थलेष्वलङ्काराणां सुरमणीया विभा चकास्ति, तथासत्यपि दशमस्कन्धस्य विंशेऽध्याये विशेषतयोपमायाः केंचनान्येषामप्यलङ्काराणां सौन्दर्यश्रीः सहृदयमनांसि स्वतःस्फूर्ततया रञ्जयति, मोदयति, आकर्षयति च सम्यक् ।

अलङ्काराः काव्यशोभायै प्रवर्तन्ते, "काव्यं ग्राह्यमलङ्कारात्"[८], "काव्यसौन्दर्यमलङ्कार"[९] इति वामनवचनानुसारेणापि काव्येष्वलङ्काराणामौचित्यमवगम्यत एव । अलङ्काराणां सुव्यवस्थित-विकासपरम्परायाः पूर्वमेव वेदेषु पुराणेषूपनिषत्सु चालङ्कारणां प्रयोगदर्शनाद् वैदिककालादेवालङ्कार-सौन्दयमप्रतिहतमासीदिति कथने नास्ति कोऽपि सन्देहः । भासकालिदासाश्वघोषभारविमाघ-श्रीहर्षप्रभृतिभिर्महनीयैः काव्यमहर्षिभिः प्रणीतेषु नाटकखण्डकाव्यमहाकाव्याख्यानग्रन्थेषु निर्वाधतया अलङ्काराणां प्रयोगप्राचुर्यातच्च । रसोपकारतया अलङ्कारा अपेक्ष्यन्ते कविभिः, एतदेव प्रतिपादयति आनन्दवर्धनाचार्यो ध्वन्यालोकग्रन्थे-

"रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वत्य सोऽलङ्कारो ध्वनौ मतः ॥[१०]

नवनवोन्मेषशालिन्या कविप्रतिभया स्वतः स्फूर्ततया पर्वतनिर्झरवत् समापतिता अहमहमिकया स्वयमेवोद्बुद्धा अलङ्कारा रमणीलावण्यमिव काव्यसौन्दर्यं समेधयन्ति । भगवतो वेदव्यासस्याविर्भावाद वहुकालानन्तरमेवालङ्कार-सिद्धान्तस्योदयो जातः परं वेदव्यासप्रणीतेषु पुराणेषु अनेकविधालङ्काराः प्रयुक्ता अभवन् । अनेन सूच्यते यत् सिद्धहस्तकवीनां काव्येष्वलङ्कारा घुणाक्षरन्यायेन नैसर्गिकतया स्थिता भवन्ति । प्रसङ्गोऽस्मिन् श्रीमद्भागवतीयदशमस्कन्धस्य विंशेऽध्याये स्थितमलङ्कारसौन्दर्यं विचार्यते-

---

५. श्रीमद्भागवतमहापुराणम् १२।१३।९ पृ. ६३६
६. पूर्ववद् भूमिका
७. प्रवन्धरत्नाकरः पृ. १८०
८. काव्यालङ्कारसूत्राणि, पृ. ३
९. पूर्ववत् पृ. ३
१०. ध्वन्यालोकः पृ. २३१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. **अलङ्कारसौन्दर्यम्**

सान्द्रनीलाम्बुदैर्व्योम सविद्युत्स्तनयित्नुभिः।
अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ॥

वर्षर्तौ नीलमेघैराच्छन्नं, विद्युद्घोषैः शब्दायमानञ्च व्योम नानाविधैः सुखदुःखैर्व्याकुलो जीवात्मा इव शुशुभे। अत्र–

व्योम : उपमेयम् ब्रह्म : उपमानम्
आच्छन्नत्वम् : साधारणो धर्मः इव : वाचकपदम्।

अत्रोपमेयोपमानसाधारणधर्मवाचकानां चतुर्णामेवोपादानात् पूर्णोपमायाश्शोभा सुशोभते सम्यक्।

तडित्वन्तो महामेघाश्चण्डश्वसनवेपिताः।
प्रीणनं जीवनं ह्यस्य मुमुचुः करुणा इव॥

कृपालवो जना यथा अनेकैर्दुःखैस्तप्तं मानुषं विलोक्य द्रवीभूतास्तस्मै अनुकम्पमानाः स्वजीवनमपि त्यजन्ति तथैव विद्युत्शोभिताः (विद्युदुज्ज्वला, महामेघाः,=महान्तश्च ते मेघाः, अत्र महच्छब्दः पूजायाम्, महान्त उदारचरिता = प्रशंसनीयाः। महान्तो ह्यन्येषामुपकारे परायणा भवन्तीति ध्वन्यमानोऽर्थः। 'चण्डश्वसनवेपिता' इत्यस्यापि गूढोऽर्थः प्रतीयते) प्रचण्डमारुतप्रेरिताश्च दयालवो मेघा घर्मतप्तं विश्वं निरीक्ष्य स्वजीवनस्वरूपं जलं मुमुचुः। अत्र–

मेघाः : उपमेयम् कृपालवः : उपमानम्
जीवनमोचनं : साधारणो धर्मः इव : वाचकपदम्।

तपः कृशा देवमीढा आसीद् वर्षीयसी मही।
यथैव काम्यतपसस्तनुः सम्प्राप्य तत्फलम्॥

मदीया इयं कामना सिद्धा स्यात्, इमे मनोरथाः पूर्णाः स्युः इत्येवं प्रकारेण सकामभावेन तपतां जनानां कृशं शरीरं मनोरथप्राप्तेरनन्तरं हृष्टपुष्टं जायते, तथैव ग्रीष्मकालिकप्रचण्डघर्मसन्तप्ता पृथिवी वर्षाजलं प्राप्य शश्यश्यामला जाता। अत्र–

मही : उपमेयम् तनुः : उपमानम्
कृशत्वपुष्टत्वादि : साधारणो धर्मः यथा : वाचकपदम्।

अत्र श्रौती उपमा **"श्रौती यथेव वा शब्दा इवार्थो वा वतिर्यदि"**[11] इति वचनात्।

निशामुखेषु खद्योतास्तमसा भान्ति न ग्रहाः।
यथा पापेन पाखण्डा न हि वेदाः कलौ युगे॥

यथा कलौ युगे पापप्रभावाद् दुराचाराधिक्याद् वा यत्र तत्र अधर्माणां पाखण्डधर्माणाञ्च बाहुल्यं दृश्यते, तेन च सदाचारसच्छिक्षासद्धर्मप्रतिपादिका वैदिक्यः क्रियाः लुप्तप्राया भवन्ति तथैव वर्षतोः प्रभावात् सन्ध्याकालेऽन्धकारेण ग्रहा नक्षत्राणि च आच्छाद्यन्ते, खद्योताः प्रकाशमाना विलोक्यन्ते। श्लोकेऽस्मिन् नक्षत्रैःसह वैदिकधर्माणां, खद्योतैःसह पाखण्डधर्माणां तुलना विहिताऽस्ति–

ग्रहनक्षत्राणि : उपमेयम् वेदाः : उपमानम्
स्तेजस्वित्वप्रभावहीनत्वादि : साधारणो धर्मः यथा : वाचकपदम्।

११. साहित्यदर्पणम् १०।१५ पृ. ८१२।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा पर्जन्यनिनदं मण्डूका व्यसृजन् गिरः ।
तुष्णीं शयानाः प्राक् यद्वद् ब्राह्मणा नियमात्यये ॥

यथा प्रतिदिनं नित्यनियमान्निवृत्य वेदपाठिनो वटवो गुरोराज्ञया वेदपाठे प्रवृत्ता उन्मुखाश्च जायन्ते तथैव वर्षर्तौ पर्जन्यस्य गडगडायमानं शब्दं श्रुत्वा मण्डूका गिरो विसृजन्ति । अत्र–

मण्डूकाः	: उपमेयम्	ब्राह्मणाः	: उपमानम्
शब्दोच्चारणम्	: साधारणो धर्मः	वत्	: वाचकपदम्

अत्र इवार्थे विहितो वतिप्रत्ययः, अतश्चेयमुपमा तद्धितगा श्रौती पूर्णोपमा ।

आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः ।
पुंसो यथा स्वतन्त्रस्य देहद्रविणसम्पदः ॥

नैतिकमर्यादामुल्लङ्घयतां कुमार्गगामिनामिन्द्रियवशवर्तिनां तुच्छस्वार्थलुब्धानां पुरुषाणां शरीरं तैरुपार्जिता धनसम्पदश्च अनुचितस्थलेषु प्रयुज्यन्ते तथैव निश्चितगमनरहिताः कुनद्यः स्वकीय-सीमामुल्लङ्घ्य क्षणिकावेगेन तीव्रप्रवाहेण ढुण्ढुणायमानवेगेन तटं विहाय क्वचित् क्षेत्रं विदार्य, क्वचित् जनमार्गमुच्छिद्य; क्वचिच्च वनोपवनान्यपि भ्रंशयित्वा प्रवहन्ति । अत्र–

कुनद्यः	: उपमेयम्	देहद्रविणसम्पदः	: उपमानम्
स्वच्छन्दतया गमनादि	: साधारणो धर्मः		
यथा	: वाचकपदम् ।		

हरिता हरिभिः शष्पैरिन्द्रगोपैश्च लोहिताः ।
उच्छिलीन्ध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ॥

यथा कस्यचन राज्ञः सेनाः काश्चिद् रक्तिमाः, काश्चिद् नीलवर्णाः, काश्चिद् हरिताः, काश्चिद् शुक्लाश्च दृश्यन्ते, तथैव वर्षर्तौ पृथिवी अपि शष्पैः हरिता, क्वचिद् इन्द्रगोपैर्लोहिता, क्वचिद् शुक्लवर्णा च प्रतीयते । अत्र–

भूः	: उपमेयम्	सेना	: उपमानम्
हरितशुक्लत्वादिगुणसाम्यं	: साधारणो धर्मः	यथा	: वाचकपदम् ।

जलस्थलौकसः सर्वे नववारिनिषेवया ।
अबिभ्रद् रुचिरं रूपं यथा हरिनिषेवया ॥

यथा भगवत्सेवया प्राणिनां बाह्यमान्तरिकञ्च रूपं सुशोभते, तथैव वर्षाजलनिषेवणेन जलचराणां स्थलचराणां च रूपं रुचिरमभूत् । अत्र–

जलस्थलौकसः	: उपमेयम्	मनुष्याणां रूपम्	: उपमानम्
सेवनम्	: साधारणो धर्मः	यथा	: वाचकपदम् ।

सरिद्भिः सङ्गतः सिन्धुश्चुक्षुभे श्वसनोर्मिमान् ।
अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग् यथा ॥

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः"[१२] इति सूक्तिरत्नाकरनिर्दिष्टवचनानुरूपं यथा सवासनानां योगिनां चित्तम् आपातमधुरान् विषयान् विलोक्य चञ्चलं जायते । **"सङ्गात् सञ्जायते कामः ...."**[१३]

१२. संस्कृतसूक्तिरत्नाकरः पृ. १७
१३. श्रीमद्भगवद्गीता २।६२ पृ. २५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इत्यादि गीतावचनानुसारेण विषयेष्वासक्ता योगिनः परमात्मसाक्षात्काररूपमुद्देश्यं विस्मृत्य स्वचित्तमेकाग्रं कर्तुं न शक्नुवन्ति तथैव महासागरोऽपि नानाप्रदेशेभ्यः समागतानां सरितां सङ्गाद् विचलितोऽभूत्। अत्र–

सिन्धुः	: उपमेयम्	चित्तम्	: उपमानम्
चञ्चलत्वम्	: साधारणो धर्मः	यथा	: वाचकपदम्।

गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः।
अभिभूयमाना व्यसनैर्यथाधोक्षजचेतसः॥

यथा भगवन्तं सर्वस्वं मन्यमाना भगवच्छरणागता जना सर्वान् कामान् विहाय दुःखशोकात्मकैरनेकैर्व्यसनैः प्रपीडिता अपि अविचलितास्तथैव गिरयोऽपि निरन्तरं पतद्भिर्वर्षधाराभिर्मुहुर्मुहु र्हन्यमानाऽपि स्वस्थानात् किञ्चिन्मात्रमपि नैवाचलन्। अत्र–

गिरयः	: उपमेयम्	शरणागतजनाः	: उपमानम्
अविचलत्वम्	: साधारणो धर्मः	यथा	: वाचकपदम्।

मार्गा बभूवुः सन्दिग्धास्तृणैश्छन्ना ह्यसंस्कृताः।
नाभ्यस्यमानाः श्रुतयो द्विजैः कालाहता इव॥

यथा सदाचारसद्धर्ममर्यादादिप्रतिपादकानां वेदानामनभ्यासात् संस्कारहीना द्विजातयो वेदान् विस्मरन्ति, तेन च वेदाः कालकवलिता लुप्तप्राया जायन्ते, तथैव वर्षर्तौ नानाविधैस्तृणैराच्छन्ना असंस्कृता अपरिष्कृताश्च मार्गाः सन्दिग्धा भवन्ति। अत्र–

मार्गाः	: उपमेयम्	श्रुतयः	: उपमानम्
असंस्कृतत्वलुप्तत्वादिः	: साधारणो धर्मः	इव	: वाचकपदम्।

लोकबन्धुषु मेघेषु विद्युतश्चलसौहृदाः।
स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव॥

द्रव्योपार्जनमेवोद्देश्यम्मन्यमानाः काश्चन गणिकाः गुणवतः पुरुषान् लब्ध्वाऽपि तेषु पुरुषेषु नानुरक्तास्तथैव चञ्चला विद्युत् लोकोपकारकान् मेघानासाद्य तेषु स्थैर्यं न विदधति। अत्र–

विद्युतः	: उपमेयम्	कामिन्यः	: उपमानम्
अस्थैर्यम्	: साधारणो धर्मः	इव	: वाचकपदम्।

धनुर्वियति माहेन्द्रं निर्गुणञ्च गुणिन्यभात्।
व्यक्ते गुणव्यतिकरेऽगुणवान् पुरुषो यथा॥

जगत्सृष्टौ व्यापृतं गुणातीतं निर्गुणमपि ब्रह्म क्वचित् सत्वरजस्तमोभिर्गुणैः सुशोभते तथैव निर्गुणं (रज्जुरहितं मौर्वीरहितं) माहेन्द्रं धनुः शुशुभे। अत्र–

माहेन्द्रं धनुः	: उपमेयम्	निर्गुणं ब्रह्म	: उपमानम्
गुणरहितत्वं	: साधारणो धर्मः	यथा	: वाचकपदम्

सरस्वशान्तरोधस्सु न्युषुरङ्गापि सारसाः।
गृहेष्वशान्तकृत्येषु ग्राम्या इव दुराशयाः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यथा पुत्रकलत्रादीन्येव सर्वस्वं मन्यमाना विषयासक्ताः पुरुषा रात्रिन्दिवं गृहकृत्येषु रमन्ते तथैव सारसपक्षिणः नानाविधैः कण्टकाकीर्णैस्तृणवीरुधैराच्छन्नेषु पङ्कैर्मलीमसेषु अशान्तप्रायेषु सरस्तीरेषु निवसन्ति । अत्र–

सारसाः	:	उपमेयम्	ग्रामीणो जनाः	:	उपमानम्
अपरित्यागः	:	साधारणो धर्मः	इव	:	वाचकपदम् ।

जलौघैर्निरभिद्यन्तः सेतवो वर्षतीश्वरे ।
पाखण्डिनामसद्वादैर्वेदमार्गाः कलौ यथा ॥

कलौ पाखण्डिनां सारविहीनैर्भ्रान्त्युत्पादकैर्विविधैर्वादैर्वेदमार्गा यथा शिथिलीक्रियन्ते तथैव तीव्रप्रवाहशीलैर्जलौघैः सेतूनां क्षेत्राणाञ्च तटप्रदेशाः छिन्नभिन्नाः कृताः । अत्र–

सेतवः	:	उपमेयम्	वेदमार्गाः	:	उपमानम्
छिन्नकरणम्	:	साधारणो धर्मः	यथा	:	वाचकपदम् ।

व्यमुञ्चन् वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः ।
यथाऽऽशिषो विश्पतयः काले काले द्विजेरिताः ॥

धनिनो जना यथा गुरूपदेशाद् ब्राह्मणवचनाद् वा समये समये व्रतपर्वादिषु प्रजाभ्यो दानं ददति तथैव वायुप्रेरिता मेघाः स्थावरजङ्गमेभ्यो भूतेभ्योऽमृतोपमानि जलानि वर्षन्ति । अत्र–

घनाः	:	उपमेयम्	विश्पतयः (धनिकाः)	:	उपमानम्
स्वसम्पत्तिवितरणत्वादि	:	साधारणो धर्मः	यथा	:	वाचकपदम् ।

धेनवो मन्दगामिन्य ऊधोभारेण भूयसा ।
ययुर्भगवताऽऽहूता द्रुतं प्रीत्या स्नुतस्तनीः ॥

दुग्धाधिक्यात् स्तनभारेण मन्दगामिन्यो धेनवः श्रीकृष्णस्याह्वानं श्रुत्वा तद्गतप्रेम्णः कारणाद् द्रुतं धावन्ति, तदवसरे तासां स्तनेभ्यः दुग्धधाराः पतन्ति ।

वनौकसः प्रमुदिता वनराजीर्मधुच्युतः ।
जलधारा गिरेर्नादानासन्ना ददृशे गुहा ॥

वनौकसो भिल्लजातय आनन्दमग्ना दृश्यन्ते, द्रुमराजीभ्यो मधु स्रवति, पर्वतनिर्झरेभ्यो जलधारा निपतति । अत्र वनौकसः इति पदे श्लेषालङ्कारोऽस्ति, यथा–

क) वनानां जलानाम् ओकस आश्रयभूताः तडागाः,
ख) वनम् अरण्यम् ओक आश्रयो येषान्ते वृक्षाः,
ग) वनम् ओकः आश्रय येषान्ते वनौकसः वनोद्भवाः प्राणिनः ।

क्वचित् वनस्पतिक्रोडे गुहायां चाभिवर्षति ।
निर्विश्य भगवान् रेमे कन्दमूलफलाशनः ॥

अभिवर्षति जले भगवान् श्रीकृष्णो मित्रवृन्दैः सह क्वचिद् वनस्पतिकोटरे, क्वचिद् गुहासु, क्वचिच्चान्यविधस्थलेषु यथेच्छं रेमे ।

उपर्युक्ते श्लोकत्रये प्रकृतेर्यथार्थरूपस्य, भगवतः श्रीकृष्णस्य च लीलाविहारवर्णनात् स्वभावोक्त्यलङ्कारस्य रमणीया छटा सहृदयमनांसि प्रमोदयति, यथा च स्वभावोक्तेर्लक्षणमाह काव्यप्रकाशकारो मम्मटः–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्[14]

वनौकस इत्यस्मिन् श्लोके श्लेषालङ्कारश्च सुशोभते अनेकार्थपरत्वात् ।

शरदा नीरजोत्पत्या नीराणि प्रकृतिं ययुः ।
भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ॥

आचारविहीनानां योगभ्रष्टानां जनानां चेतांसि यथा योगाभ्यासेन पुनर्निर्मलानि सम्पद्यन्ते तथैव वर्षर्तौ नानाविधैः कर्दमैः कालुष्यमुपगतानि जलानि शरदृतौ कमलानामनुषङ्गात् निर्मलानि प्रतीयन्ते । अत्र–

जलानि	: उपमेयम्	चेतांसि	: उपमानम्
सेवनत्वादि	: साधारणो धर्मः	इव	: वाचकपदम् ।

व्योम्नोऽब्दं भूतशाबल्यं भुवः पङ्कमपां मलम् ।
शरज्जहाराश्रमिणां कृष्णे भक्तिर्यथा शुभम् ॥

यथा भगवच्चरणकमलेषु समर्पिता भक्तिः समेषां ब्रह्मचारिगृहस्थवानप्रस्थसन्यासाश्रमिणामशुभं दुःखानि च विनाशयति तथैव शरद् आकाशस्य मेघान्, वर्षाया भूतशावल्यम्, पृथिव्याः पङ्कम्, अपां मलञ्च दूरीकरोति । अत्र च–

शरद्	: उपमेयम्	भगवद्भक्तिः	: उपमानम्
कल्मषहरणत्वादि	: साधारणो धर्मः	यथा	: वाचकपदम् ।

सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ।
यथा त्यक्तैषणाः शान्ता मुनयो मुक्तकिल्विषाः ॥

यथा पुत्रमित्रकलत्रलाभालाभजयपराजयादिविषयेष्वनासक्ताः संयमशीलाः धर्मधनाः पुरुषाः समस्तान् लौकिकमनोरथान् त्यक्त्वाऽऽनन्दिता जायन्ते, तथैव जलरूपं सर्वस्वं सम्पदत्लोकाय वितीर्य उज्ज्वलकान्त्या जलदाः शुशुभिरे । अत्र–

जलदाः	: उपमेयम्	मुनयः	: उपमानम्
सर्वस्वत्यागः	: साधारणो धर्मः	यथा	: वाचकपदम् ।

गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवम् ।
यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ॥

यथा विद्वांसोः ज्ञानिनो जनाश्च पात्रत्वं विचार्य सुयोग्यशिष्येभ्यो ज्ञानामृतं वितरन्ति, तथैव गिरयोऽपि निर्मलं तोयं क्वचिन्मुमुचुः क्वचिच्च न मुमुचुः । अत्र–

गिरयः	: उपमेयम्	ज्ञानिनः	: उपमानम्
वितरणम्	: साधारणो धर्मः	यथा	: वाचकपदम् ।

नैवाविदन् क्षीयमाणं जलं गाधजलेचराः ।
यथाऽऽयुरन्वहं क्षय्यं नरा मूढाः कुटुम्बिनः ॥

आजन्म स्वशरीरपोषणे कुटुम्बभरण एवासक्ता जना अन्वहमायुःक्षीयमाणमस्तीति जानन्तोऽपि अज्ञा इव विलोक्यन्ते, तथैव निखिलमपि जगत् अयमेव जलाशयोऽस्तीति मन्यमाना जलचराः प्रतिदिनं शुष्यज्जलं नाविन्दन् । अत्र–

---

१४. काव्यप्रकाशः १०, सूत्रम् १११, पृ. २६५ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जलचराः : उपमेयम् कुटुम्विनः : उपमानम्
अज्ञत्वम् : साधारणो धर्मः यथा : वाचकपदम् ।

अत्र नरमूढकुटुम्विनाम् अनेककर्तृपदानां नाविन्दन् इति एकक्रियया सह सम्वन्धस्य प्रतिपादनाद् दीपकनामाऽलङ्कारः सम्पद्यते । यथा च विश्वनाथः-

"अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ।"[१५]

गाधवारिचरास्तापमविन्दञ्छरदर्कजम् ।
यथा दरिद्रः कृपणः कुटुम्ब्यविजितेन्द्रियः ॥

यथा कश्चन दरिद्रो गृहस्वामी मह्यमिदं वस्तु देहि, इयद् द्रव्यं देहि इत्यादिवचनैर्याचनां कुर्वतां स्वपरिवारसदस्यानां याञ्चां श्रुत्वा स्वल्पैर्दुःखैरुद्विग्नो जायते, तथैव क्षुद्रजलाशये सञ्चरन्तः प्राणिनःशरदि अर्कतापमविन्दन् ।

गाधवारिचराः : उपमेयम् कृपणः : उपमानम्
दुःखतप्तत्वम् : साधारणो धर्मः यथा : वाचकपदम् ।

शनैः शनैर्जहुः पङ्कं स्थलान्यामञ्च वीरुधः ।
यथाहं ममतां धीराः शरीरादिष्वनात्मसु ॥

यथा नश्वरप्रायेषु वस्तुषु अनासक्ता आत्मज्ञानिन इदं मदीयं, ममैते परिवाराः इति ममतां त्यजन्ति, तथैव वीरुधः शनैः शनैः पङ्कं स्थलानि च त्यजन्ति । अत्र–

वीरुधः : उपमेयम् धीरपुरुषाः : उपमानम्
त्यागः : साधारणो धर्मः यथा : वाचकपदम् ।

निश्चलाम्बुरभूत्तुष्णीं समुद्रः शरदागमे ।
आत्मन्युपरते सम्यङ् मुनिर्व्युपरतागमः ।

यथा आत्मारामः पुरुषः कर्मकाण्डगतान् प्रपञ्चान् विहाय शान्तो गम्भीरश्च जायते तद्वत् समुद्रोऽपि निश्चलोऽभूत् । एवमत्र–

समुद्रः : उपमेयम् मुनिः : उपमानम्
निश्चलत्वशान्तत्वादिः साधारणो धर्मः

अत्र वाचकलुप्तोपमाऽऽस्ति । यथा–

लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयोः
त्रयाणां वानुपादाने श्रौत्यर्थी सापि पूर्ववत् ॥[१६]

केदारेभ्यस्त्वपोऽगृह्णन् कर्षका दृढसेतुभिः ।
यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ॥

यथा योगिनः इन्द्रियप्रत्याहारेण (इन्द्रियनिग्रहेण) ज्ञानं लभन्ते तथैव कर्षकाः दृढसेतुभिः केदारेषु जलानि नयन्ति ।

कर्षकाः : उपमेयम् योगिनः : उपमानम्
जलग्रहणत्वादिः : साधारणो धर्मः यथा : वाचकपदम् ।

१५. साहित्यदर्पणम् १०।४८ पृ. ९०४
१६. साहित्यदर्पणम् १०।१७ पृ. ८१६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शरदर्कांशुजांस्तापान् भूतानामुडुपोऽहरत्
देहाभिमानजं बोधो मुकुन्दो व्रजयोषिताम् ॥

व्रजभूमौ मुकुन्दो भगवान् यथा गोपवनितानां देहाभिमानादुत्पन्नमज्ञानं हरति तद्वद् दिवसे सूर्यतापेन सन्तप्तानां प्राणिनां तापान् चन्द्रमा स्वशीतलकिरणैरपसारयति । अत्र–

उडुपः : उपमेयम् मुकुन्दः : उपमानम्
तापहरणम् : साधारणो धर्मः ।
इयं वाचकपदलुप्तोपमा ।

खमशोभत निर्मेघं शरद्विमलतारकम् ।
सत्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनम् ॥

वेदतत्त्वविदः पुरुषस्य सत्वगुणि चित्तं यथा सुशोभते तथैव शारद्यां रात्रौ नक्षत्रगणानां मध्ये मेघरहितं खं स्पष्टरूपेण भासते ।

खम् : उपमेयम् चित्तम् : उपमानम्
निर्मलत्वनिष्कलङ्कत्वम् : साधारणो धर्मः यथा : वाचकपदम् ।

अखण्डमण्डलो व्योम्नि रराजोडुगणैः शशी ।
यथा यदुपतिः कृष्णो वृष्णिचक्रवृतो भुवि ॥

यथा पृथिवीतले यादवानां मध्ये यदुपतिर्भगवान् श्रीकृष्णः स्वकीयैरनन्तगुणै र्विराजते तद्वद् गगनतले अखण्डमण्डलः शशी उडुगणैःसह सुशोभते–

शशी : उपमेयम् श्रीकृष्णः : उपमानम्
आवृतत्वादि : साधारणो धर्मः यथा : वाचकपदम् ।
अत्र सहोक्तिरलङ्कारोऽपि संघटते ।

"सहोक्तिः सहभावश्चेत् भासते जनरञ्जन" इति वचनात् ।[१७]

आश्लिष्य समशीतोष्णं प्रसूनवनमारुतम् ।
जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ॥

समशीतोष्णं प्रसूनवनमारुतं निषेव्य जनास्तापं जहति परं कृष्णहृतचेतसो गोप्यस्तापं नैव जहुः । अत्र गोपवनितानां तापाऽपरित्यागे कृष्णहृतचेतस उल्लेखात् काव्यलिङ्गनामालङ्कारः सम्पद्यते ।

गावो मृगाः खगा नार्यः पुष्पिण्यः शरदाभवन् ।
अन्वीयमानाः स्ववृषैः फलैरीशक्रिया इव ॥

शक्तिशालिभिर्जनैर्विहितानि कार्याणि यथा तत्तत्फलैरन्वितानि जायन्ते तथैव सन्तानोत्पादनकामनया पुष्पिण्यो गावो वृषैः, मृगा हरिणैः, खगाः पक्षिभिः नार्यश्च पुरुषैरन्विता अभूवन् । अत्र क्रमेणोक्तानां गोमृगखगनारीणां यथाक्रमं वृषहरिणपक्षिपुरुषैःसह अन्वयविधानाद् यथासंख्यालङ्कारो निष्पद्यते । तदुक्तम-

यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः[१८]
उदहृष्यन् वारिजानि सूर्योत्थाने कुमुद्विना ।
राज्ञा तु निर्भया लोका यथा दस्यून् विना नृपः ॥

---

१७. कुवलयानन्दः, कारिका ५८, पृ. ८२
१८. कुवलयानन्दः, कारिका १०९, पृ. १७९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यथा सूर्योदये जाते कुमुदं विहाय सर्वाणि- वारिजानि (कमलानि) विकसन्ति, तथैव राज्ञः शुभागमनेन दस्यून् विहाय सर्वेऽपि लोका निर्भया जाताः । **'विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते'**[१९] इति सिद्धान्तानुरूपं विनोक्त्यलङ्कारः प्रतीयते तथा कमलनृपयोश्चोपमेयोपमानभाववर्णनादुपमालङ्कारश्च राजते । अनयोः द्वयोश्च तिलतण्डुलन्यायेन संसृष्टिरलङ्कारः सम्पद्यते–

मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते[२०]

पुरग्रामेष्वाग्रयणैरिन्द्रियैश्च महोत्सवैः ।
बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ॥

यथा शरदि ग्रामाः पुराणि च नानाविधैर्महोत्सवैः सुशोभन्ते तथैव भूरपि विविधैरत्नजातैः सुशोभनैर्विकसितैर्वृक्षैश्च रमणीया ऐश्वर्यसम्पन्ना च सञ्जाता अत्र पृथिव्याः प्राकृतसम्पत्तेर्वर्णनादुदात्तालङ्कारः । "उदात्तं वस्तुनः सम्पत् ।"[२१] इति च उदात्तालङ्कारस्य लक्षणम् ।

वणिङ्मुनिनृपस्नाता निर्गम्यार्थान् प्रपेदिरे ।
वर्षरुद्धा यथा सिद्धाः स्वपिण्डान् काल आगते ॥

यथा साधनायां संलग्नो जनः समुचितावसरे स्वसाधनानुरूपं फलमवाप्नोति देवादिशरीरञ्च प्राप्नोति, तथैव वर्षर्तौ मार्गे अवरुद्धा वणिङ्मुनिनृपस्नातका स्वस्वस्थानेषु प्राप्नुवन्ति ।

वणिङ्मुनिनृपस्नातका	:	उपमेयम्	सिद्धाः	:	उपमानम्
अवरुद्धत्वम्	:	साधारणो धर्मः	यथा	:	वाचकपदम् ।

४. उपसंहृतिः

श्रीमद्भागवतमहापुराणस्य दशमस्कन्धो लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्य चरित्रप्रकाशने केन्द्रितोऽस्ति । अत्रत्या रोमाञ्चकारिण्य अनेकाः कथा विस्मयोत्पादकानि चरित्राणि च भक्तिज्ञानवैराग्योत्पादकानि सन्ति । विषयबाहुल्यस्यास्य स्कन्धस्य विंशतितमेऽध्याये प्राग् वर्षायाः पश्चात् शरदृतोश्चारु चित्रणं विद्यते । महर्षिवेदव्यासः प्राकृतिकसुषमावर्णनव्याजेन सुमनोरमै र्दृष्टान्तैर्जीवनजगतो र्बहुविधान् पक्षान् उद्घाट्यन् अलङ्कारसौन्दर्यं प्रदर्शयामास । इत्थमस्मिन् अध्याये काव्यकलायाः सम्यग् विवेचनं दृग्गोचरतामेति । अस्य न केवलं पौराणिकमूल्यम्, अपि तु उत्कृष्टसाहित्यिकमपिमूल्यमस्तीति कथने नास्ति सन्देहावसरः ।

सन्दर्भस्रोतांसि–

१. अप्पयदीक्षितः, कुवलयानन्दः चौखम्बा-विद्याभवनम्, वाराणसी, १९५६ ।
२. आचार्यो, मम्मटः, काव्यप्रकाशः, नागेश्वरीटीकया समलङ्कृतः, चौखम्वा-प्रकाशनम्, वाराणसी, एकादश-संस्करणम्, २०६४ ।
३. आचार्यो, विश्वनाथः, साहित्यदर्पणम्, कृष्णदास अकादमी, वाराणसी, चतुर्थसंस्करणम्, वि.सं. २०५१ ।
४. आनन्दवर्धनः, ध्वन्यालोकः, चौखम्वा-विद्याभवनम्, वाराणसी, ई. १९९२ ।
५. उपाध्यायः, डा. रामजी, संस्कृतसूक्तिरत्नाकरः, चौखम्वा-विद्याभवनम्, वाराणसी, षष्ठं संस्करणम्, ई. १९९५ ।
६. महर्षिवेदव्यासः, श्रीमद्भागवतमहापुराणं द्वितीयखण्डम् गीताप्रेसः, गोरखपुरम् ६४ संस्करणम् ।
७. वामनः, काव्यालङ्कारसूत्राणि, चौखम्वा विश्वभारती वाराणसी, द्वितीयं संस्करणम्, वि.सं. २०३३ ।
८. शुक्लः, डा. रमेशचन्द्रः, प्रवन्धरत्नाकरः, चौखम्वा-विद्याभवनम्, वाराणसी, चतुर्थ संस्करणम्, ई. १९८९ ।
९. श्रीमद्भगद्गीता, गीताप्रेसः, गोरखपुरं, वि.सं. २०५३ ।

---

१९. कुवलयानन्दः, कारिका ५९, पृ. ८३
२०. साहित्यदर्पणम्, १०।९८ पृ. १०४७
२१. काव्यप्रकाशः १० सूत्रम् १७६ पृ. २७०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पदार्थविवेचनदृष्ट्या न्यायविद्याया उपयोगिता

रमा भट्टराई
उपप्राध्यापकः

१. अष्टादशविद्यास्थानान्तर्गतत्वम्

दर्शनवाङ्मयार्णवे सर्वशास्त्रोपकारकत्वेन न्यायदर्शनं सर्वातिशयेन राजते। अत एव इयमुक्ति-र्विद्वत्समवाये प्रसिद्धा [१]"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति। अष्टादशविद्यास्थानेषु न्यायविद्या सर्वाभ्यो विद्याभ्योऽभ्यर्हिततमा इति मन्यते। अष्टादशविद्यास्थानानि च विष्णुपुराणे इत्थं निर्दिष्टानि सन्ति-

[२]अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः॥

"शिक्षाकल्पनिरुक्तव्याकरणच्छन्दोज्योतिषमिति षड्विधानि वेदाङ्गशास्त्राणि"। "ऋक्सामयजुर-थर्वेति चत्वारो वेदाः"। पुराणम्, धर्मशास्त्रम्, मीमांसा, न्यायः, आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रञ्चेति अष्टादशविद्यास्थानानि परिगणय्य तत्र तत्र शास्त्रेषु शास्त्रकृद्भिर्व्याख्याकृद्भिश्च विमृष्टानि सन्ति। अत्र न्यायविस्तरपदेन आन्वीक्षिकी विद्या गृह्यते।

भाष्यकारादिमतेन आन्वीक्षिकी विद्या

तत्र न्यायभाष्यकाराश्चतस्र एव विद्याः प्राणिनिकरस्य अनुग्रहाय उपदिष्टवन्तः। उक्तञ्च-

[३]"इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते, यासां चतुर्थीयमान्वीक्षिकी विद्या"। महाभारतादिग्रन्थेष्वपि विद्याचतुष्टयस्य उल्लेखो दृश्यते-

---

१. प्राचीनवचनम् (तत्त्वचिन्तामणौ प्रामाण्यवादस्य उपोद्घाते पृ.सं.-२)।
२. श्रीविष्णुपुराणे तृतीयभागे षष्ठेऽध्याये, श्लो.सं. २८-२९।
३. न्यायसूत्रस्य न्यायभाष्ये पृ.सं.-५।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

[४]त्रयी चान्वीक्षिकी चैव वार्ता च भरतर्षभ ।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः ॥

तथैव श्रीमद्भागवतमहापुराणेऽपि चतसृणां विद्यानां विभागो दर्शितो वर्तते-

[५]आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च ।
एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः ॥

अत्र त्रयीपदेन ऋक्, यजुः, सामेति वेदा गृह्यन्ते । वार्तेत्यनेन वाणिज्यादिविद्या, यतो हि तत्र वाणिज्यविषयाः प्रतिपादिताः सन्ति । नयानयौ दण्डनीत्यां विचारितौ स्तः, विचारप्रधाना आन्वीक्षिकी चतुर्थी न्यायविद्या मन्यते । अत एव कौटिल्याचार्या अपि चतस्र एव विद्या इत्युक्त्वा विद्याचतुष्टयस्य विभागं चक्रुः । एतावता अष्टादशविद्यास्थानेषु चतुर्विधविद्यास्थानानि एव मुख्यतया निर्दिष्टानि सन्ति । तासु आन्वीक्षिकी विद्या अभ्यर्हिततमा । अत एव अस्या विद्यायाः प्रयोजनमभ्यर्हिततमत्वञ्च प्रकाशयन्तो न्यायप्रवर्तकाचार्यस्य गौतममुनेः परमकारुणिकत्वञ्च प्रदर्शयन्तस्तत्त्वचिन्तामणिकाराः श्रीगङ्गेशोपाध्यायाःप्राहुः [६]अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमा-मान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय ।

२. न्यायविद्याया अनादित्वम्

यद्यपि इमाः सर्वाऽपि विद्या अनादिकालत एव प्रवृत्ताः, उक्तञ्च न्यायमञ्जर्याम्- [७]"आदिसर्गात् प्रभृति वेदवदिमा विद्याः प्रवृत्ताः संक्षेपविस्तरविवक्षया ताँस्तास्तत्र तत्र कर्तॄनाचक्षते" इति । तथापि तत्तद्विद्याप्रवर्तकत्वेन तासां तासां विद्यानां तत्तन्नाम्ना तत्तदर्शनेन च प्रसिद्धिर्जाता । यस्या विद्यायाः प्रवर्तनं यैर्यैराचार्यैर्विहितम्, त एव आचार्यास्तत्तद्विद्यानां प्रवर्तका अभूवन् । तथैव न्यायविद्यायाः प्रवर्तकाचार्यमहर्षिगौतमाः वैशेषिकदर्शनप्रवर्तकाचार्या महर्षिकणादमुनयश्च । उक्तञ्च पद्मपुराणे-[८]"कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् इति ।

३. प्रयोजनम्

इदञ्च न्यायशास्त्रं तर्कविद्या, हेतुविद्या, युक्तिशास्त्रम्, वादविद्या, आन्वीक्षिकी प्रमाणशास्त्रमित्यादिभिर्नामभिर्ज्ञायते । सर्वासां विद्यानां प्रदीपत्वेन सर्वेषां कर्मणामुपायत्वेन सर्वेषां धर्माणाञ्च आश्रयत्वेन न्यायशास्त्रस्य महिमा गीयते । अस्मिन् विषये कौटिल्यस्य इयमुक्तिः प्रसिद्धा एव-

[९]प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता ॥

---

४. महाभारते शान्तिपर्वणि (५९/३३) ।
५. श्रीमद्भागवतमहापुराणम् (३/१२/४) ।
६. तत्त्वचिन्तामणिः प्रामाण्यवादः, पृ.सं. ११४ ।
७. न्यायमञ्जरी, प्रमाणप्रकरणम्, पृ.सं. ५ ।
८. तत्त्वचिन्तामणौ प्रामाण्यवादः, उपोद्घातः, पृ.सं. २ ।
९. न्यायभाष्यम्, अध्यायः १, आह्निकम्-१, पृ.सं. १२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एतावता सर्वविद्यानां रहस्योद्घाटनम्, सर्वेषां कर्मणामुपायप्रतिपादनम्, सर्वेषां धर्माणाञ्चाश्रयणम्, साधकयुक्तिप्रकटनम्, बाधकयुक्तिनिरसनञ्चास्य दर्शनस्य मुख्यानि प्रयोजनानीति एतद्ग्रन्थावलोकनेन अवगम्यते ।

४. व्युत्पत्तिः

तत्र नि उपसर्गपूर्वकगत्यर्थकात् इण्धातोर्घञ्प्रत्यये कृते निष्पन्नो यो [१०]न्यायशब्दस्तस्योचितमर्थः । ततश्च नितराम् = अतिशयेन ईयते = गम्यते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्त्या करणे [११]घञ्प्रत्यये कृते न्यायशब्दो निष्पद्यते । तथा च पदार्थतत्त्वविवेचिका विद्या एव न्यायविद्येति कथ्यते । अत्र पदार्थतत्त्वं सम्यग् विमृश्यत इति सर्वेषु शास्त्रेषु न्यायप्रतिपादिता युक्तयः प्रायः सादरं समुपयुज्यन्ते । तथा चोक्तव्युत्पत्त्या परार्थानुमानमेव न्याय इति सिद्ध्यति । तस्मात् यत्र [१२]प्रतिज्ञाहेतूदाहरणोपनयनिगमनानीति पञ्च अवयवान् प्रयुज्य पदार्थो निर्णीयते, परं प्रति बोधयितुं ज्ञापयितुं वा पञ्चावयववाक्यमुपयुज्यते स एव न्यायः ।

५. उभयोर्दर्शनयोः पार्थक्यम्, न्यायस्वरूपविचारश्च

पूर्वोक्ता न्यायविद्या प्राच्यनव्यभेदेन द्विविधा । यद्यपि गौतमीयन्यायसूत्रमेव नव्यन्यायस्य मूलम् । कथमिति चेत् ? प्राचीनन्यायमाधारीकृत्यैव नव्यन्यायस्य प्रवृत्तिर्जातेति शास्त्रविवेचका मनीषिणः प्रतिपादयन्ति । तत्र प्रमेयविवेचनदृष्ट्या प्रमाणनिर्वचनदृष्ट्या च उभयदर्शनस्य यत्र तत्र पार्थक्यं स्फुटं दृश्यते । यद्यपि उभयोर्दर्शनयोर्वैशिष्ट्यं माहात्म्यञ्च यथाप्रकरणं यथास्थानञ्च यत्र तत्र विविधप्रकारेण परिलक्ष्यते । गौतमसूत्रादारभ्य तदुपरि भाष्यम्, वार्तिकम्, तात्पर्यम्, परिशुद्धिरित्यादीनि यानि व्याख्यानानि उपव्याख्यानानि यैर्मनीषिभिर्विहितानि तानि सर्वाणि प्राचीनन्यायेति नाम्ना व्यवह्रियन्ते । तत्र विशेषतः प्रमेयतत्त्वं विमृष्टमस्ति । प्रमेयभागे गौतमसूत्राणां भूयान् प्रभावो दृश्यते । तेनैव सर्वत्र दर्शनक्षेत्रे गौतमसूत्राणां विशिष्टा चर्चा प्रमाणतया प्राप्यते । अत एव गौतमसूत्राणामुपरि वात्स्यायनाचार्यस्य भाष्यमाधारीकृत्य सूत्रभाष्ययोर्नैकविधानि वैदुष्यपूर्णानि व्याख्यानानि सूत्रभाष्यमर्मोद्घाटकैस्तत्त्वचिन्तकैर्मनीषिभिर्विहितानि सन्ति । ततः परं नवीनशैल्या पदार्थविवेचनपद्धतिराविष्कृता तत्त्वचिन्तामणौ महामहोपाध्यायैः गङ्गेशोपाध्यायैः ।

अत्र पञ्चावयवसिद्धान्तोपगमविषये प्राच्यनव्ययोर्मते ऐक्यं दृश्यते । यथा पञ्चावयववादो गौतमीयन्याये प्रतिपादितो निर्णीतश्च, तथैव [१३]"तच्च अनुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयननिगमनानि अवयवा निरूप्यन्ते" इति तत्त्वचिन्तामणिग्रन्थेन न्यायस्तदवयवाश्च निर्दिष्टाः सन्ति । अत्र प्रतिज्ञादिपञ्चकसमुदाय एव न्यायस्तदर्थञ्च पञ्च अवयवा अपेक्ष्यन्ते । अतश्च प्रतिज्ञादिपञ्चावयवप्रयोगद्वारा यत्र निर्णयो भवति स एव न्यायः परमन्यायो वा कथ्यते । पदार्थतत्त्वविमर्श-

---

१०. अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम्–अमरकोशः ।

११. परिन्योर्नीणोर्द्यूताभ्रेषयोः, ३/३/३७ अष्टाध्यायीः ।

१२. न्यायसूत्रम् अ. १, आ. १ सू.सं. ३२ प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ।

१३. अवयवः पृ.सं. १ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्या अनुमानप्रयोगद्वारा निरुक्तपद्धतिः सर्वथा साधीयसी महीयसी च मन्यते । तत्र न्यायस्वरूपप्रतिपादकं स्वतन्त्रं न्यायसूत्रं गौतममहर्षिभिर्नैवोपदिष्टम् । वात्स्यायनाचार्याः [१४]"प्रमाणैरर्थपरीक्षणं न्यायः" इति रीत्या तत्स्वरूपं निर्दिष्टवन्तः । एतादृशपदार्थविचारप्रक्रियां दृष्ट्वा अनुमानप्रयोगद्वारा पदार्थविवेचनमेव उभयदर्शनस्य वैशिष्ट्यमिति तत्तत्पदार्थविवेचनावलोकनादवगम्यते । अत एव सदृष्टान्तमनुमानमुपस्थाप्य अनुमानगता दृष्टान्ताः समीचीना असमीचीना वेति सम्यग् विमृश्यते । तत्र दृष्टान्तविरोधश्चेत् तत्स्फुटीकृत्य अनुमानस्य असाधकत्वमसमीचीनत्वञ्च निश्चीयते । एतादृशा नैकविधा प्रयोगाः सूत्रेषु भाष्येषु च लभ्यन्ते । यथा- [१५]"तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः, [१६]व्यभिचारदहेतुः, [१७]सर्वाग्रहणमवयव्यसिद्धेः, [१८]प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः" इत्यादीनि सूत्राणि अनुमानपरकाण्येव । तथैव भाष्येऽपि सूत्रगतं विवेचनं प्रदर्शितमस्ति । तत्र सर्वत्रैव प्रतिज्ञादिबोधकानां वाक्यानां प्रयोगस्तावदावश्यकः, अत एव प्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वमिति तत्स्वरूपं प्रदर्शितवन्तः शास्त्रकाराः । तथा हि-प्राचीनन्यायग्रन्थेष्वपि एतादृशानुमानप्रयोगाः प्राचुर्येण प्रदर्शिताः सन्ति । तदनुसारेणैव पदार्थविवेचनं विधीयत इति अनुमानप्रधानत्वमुभयोः समानतया दृश्यते । न्यायस्वरूपनिर्धारणावसरे च तत्त्वचिन्तामणिकृन्मतेन [१९]"अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाव्दज्ञानजनकवाक्यं न्यायः, दीधितिकृन्मतेन च [२०]"उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायो न्यायः, इति नैकविधानि न्यायलक्षणानि प्रस्तुत्य व्याख्यातानि विवेचितानि परिष्कृतानि च सन्ति ।

उभयन्याये प्रमेयसाधकानि [२१]"प्रत्यक्षानुमानोपमानशब्दभेदेन चत्वारि एव प्रमाणानीति" स्वीकृतानि । तत्र पदार्थविवेचनदृष्ट्या प्राचीनन्यायापेक्षया नव्यन्यायस्य चमत्कारपूर्णा शैली परिपाटी च स्फुटमनुभूयते । अत एव न्यायदर्शनस्य सर्वशास्त्रोपकारित्वं स्वीक्रियते सर्वैः । नवीनपद्धत्या पदार्थानां विमर्शः स्फुटतया विधीयते । एकैकपदार्थस्य आशयं प्रकाश्य परिष्काराश्च विधीयन्ते । पदानां प्रयोजनानि प्रदर्श्य तत्तत्पदप्रतिपाद्याः पदार्थाः सम्यग् विमृश्यन्ते स्फुटीक्रियन्ते च । एकस्य पदार्थस्य अपरस्मिन् पदार्थे कः सम्बन्धः कथञ्चेति सयुक्ति प्रतिपाद्यते । तद्यथा- [२२]"सांसर्गिकप्रतियोगितानिरूपणावसरे सोदाहरणं विशिष्टावगाहिज्ञानबोधकं वाक्यं प्रस्तुत्य तत्र कः पदार्थः विशेषणं कश्च विशेष्यपदार्थः ? तयोश्च सम्बन्धः कः ? संसर्गता निरूपिता प्रतियोगिता अनुयोगिता च कुत्र ? इति एकैकं पदार्थं

---

१४. वात्स्यायनः, अ. १, आह्निकम् १ ।

१५. न्यायसूत्रम् अ. २, आह्निकम् १, सू.सं. ५७ ।

१६. न्यायसूत्रम् अ. ४, आह्निकम् १, सू.सं. ५ ।

१७. न्यायसूत्रम् अ. २, आह्निकम् १, सू.सं. १४ ।

१८. न्यायसूत्रम् अ. २, आह्निकम् १, सू.सं. ८ ।

१९. तत्त्वचिन्तामणौ, अवयवप्रकरणे (राष्ट्रिय सं.वि., तिरुपतिः) पृ.सं. ५ ।

२०. तत्त्वचिन्तामणौ, अवयवप्रकरणे (राष्ट्रिय सं.वि., तिरुपतिः) पृ.सं. १९ ।

२१. क) प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि, गौतमसूत्रम् अ.१, आ. १, सू.सं. ३
ख) प्रमाणमपि चतुर्विधम्, प्रत्यक्षानुमानोपमानशब्दभेदात्, तत्त्वचिन्तामणि सन्निकर्षवादः, पृ.सं. ५३८ ।

२२. आन्वीक्षिकी (न्यायविषयकगोष्ठी विशेषाङ्क), नव्यन्यायका पारिभाषिक शव्दहरुका प्रयोग, प्रा. विद्यानाथ उपाध्याय, पृ.सं. ३ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्संसर्गञ्च पृथक्कृत्य नव्यन्यायपद्धत्या पदार्थविश्लेषणं दर्शितमस्ति। एतादृशान् पारिभाषिकान् नव्यन्यायशास्त्रे परिष्कारप्रसङ्गे प्रचुरतया प्रयुक्तान् अत्युपयोगिनो विषयान् जिज्ञासवो विद्यार्थिन अध्येतारोऽनुसन्धातारश्च सरलतया अवगन्तुमवधारयितुञ्च शक्नुयुरिति धिया प्राध्यापकश्रीविद्यानाथ उपाध्यायमहाभागाः नेपालीभाषायां प्रयोगनिर्देशपूर्वकं पारिभाषिकशब्दान् सुष्ठु प्रदर्श्य नव्यन्यायपरिष्कार-वोधप्रक्रियामुपस्थापयन्तः शास्त्रजिज्ञासुभ्यो भृशमुपचक्रुरिति तेषां प्राज्ञिकं योगदानं सर्वथा स्तुत्यमिति मत्वा अत्र प्रस्तुतम्। एवंविधा अन्येऽपि विषया यथायथं तत्र तत्र सोदाहरणं निर्दिष्टाः सन्ति।

तथैव शाब्दवोधप्रतिपादकग्रन्थेषु शाब्दवोधनिरूपणावसरे भेदाभेदान्वयविचारप्रसङ्गे व्युत्पत्ति-वादनामकग्रन्थे श्रीगदाधरभट्टाचार्यप्रभृतिभिः प्रत्ययार्थसम्वन्धविवेचनकुशलैर्मनीषिभिरेवंभूताः परिष्कारोपयोगिनो व्युत्पादका अनेके विषया विशेषेण यथायथं विवेचिताः विचारिताश्च सन्ति। यथा-एकमुदाहरणमत्र प्रस्तूयते- [२३]"नीलो घटः" इत्यत्र 'गुणवाचकान्मतुपो लुगिष्ट' इति पाणिनीयानुशासना-नुसारेण नीलरूपवान् घट इत्यर्थो भवति। तथा च नीलपदार्थस्य घटपदार्थेऽभेदसम्बन्धेन अन्वयो जायते। एवं रीत्या विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वनियमेन नामार्थयोरभेदेनान्वयो भवतीति व्युत्पत्तिमाश्रित्य शाब्दवोधप्रक्रिया अत्र निर्दिष्टा अस्ति। तत्र विशेषणपदार्थस्य विशेष्यपदार्थे कश्चन सम्वन्धो ह्यपेक्ष्यते, स चात्र अभेद एव। ततश्चोक्तवाक्ये प्रकारतावच्छेदकं नीलत्वं विशेष्यतावच्छेदकञ्च घटत्वम्, प्रकारतावच्छेदकसम्वन्धश्चाभेद इति रीत्या अभेदसम्बन्धावच्छिन्ननील-त्वावच्छिन्ननीलनिष्ठप्रकारतानिरूपितघटत्वावच्छिन्नघटनिष्ठविशेष्यताकबोधो 'नीलो घट' इत्यस्माद् वाक्याज्जायते। अनया रीत्या सर्वे परिष्कारा विधीयन्ते, पदार्थविश्लेषणं पदार्थविवेचनञ्च विधीयते नव्यन्यायपद्धत्या। एतादृशविश्लेषणपद्धतिरन्यत्र प्रायो दुर्लभा एव। तस्मादेव तदुत्तरवर्तिभिर्व्याख्याकारैर्ग्रन्थ-विवेचनावसरे व्याख्यानावसरे वा नव्यन्यायस्य पदार्थविवेचनशैलीं परिष्कारोपपादनपद्धतिञ्च अवलम्य ग्रन्थविवेचनं व्याख्यानञ्च अकारि।

६. लोकव्यवहारादौ न्यायशास्त्रस्योपयोगिता

लोकेऽपि व्यवहारसम्पादनाय नव्यन्यायपद्धतिः सर्वथा साधीयसी दृष्टिप्रदा च अनुभूयते। अनुमानद्वारा व्यवहारोपयोगिनां पदार्थानां समीक्षणम्, पर्यालोचनञ्च सम्यक्तया कर्तुं शक्यते। उपस्थापितपक्षे दोषाश्च तत्र तत्र वक्तुं शक्यन्ते, निर्दोषपक्षोपस्थापनसामर्थ्यञ्चाधिगम्यते। किं बहुना, तत्र हेत्वाभासानामुपस्थापनं विधाय वादिना प्रतिवादिना वा उपस्थापिते पक्षे दोषोद्भावनसामर्थ्यं सम्पादयति नवीनन्यायपद्धतिः। अत एव उपस्थापितः पक्षः समीचीनो न वा इति सयुक्ति उपपादयितुञ्च शक्यते नव्यन्यायपद्धतिविद्भिः। सदोषं पक्षं मतं वा प्रदर्श्य अधीतन्यायशास्त्रं ज्ञातन्यायपद्धतिञ्च पराजेतुं नैव प्रभवति कोऽपि स्थापनावादी।

अत एव लोके क्रियमाणाः सर्वे व्यवहाराः प्रामाणिका भवेयुरिति प्रयोजनसिद्धयेऽपि न्यायदर्शनस्य ज्ञानमतीवोपयोगि आवश्यकञ्च। किं वाहुना, किं प्रति किं कारणं कथञ्चेति सम्यक् ज्ञात्वा कार्यकारणभावसम्पादनाय, कीदृशं ज्ञानं प्रति कीदृशं ज्ञानं प्रतिबन्धकं कीदृशञ्च ज्ञानं प्रतिबध्यमित्यस्य

२३. व्युत्पत्तिवादः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्यगवबोधाय, व्याप्यव्यापकभाववोधाय, सयुक्ति आत्मनो मतोपस्थापनाय, उभयोर्वादिप्रतिवादिनो-र्विचारान् श्रुत्वा सम्यङ् निर्णयप्रदानाय, विचारप्रतिविचाराणाञ्च समीक्षणाय, दोषगुणयोः परिशीलनं विधाय दोषगुणौ च पृथक्कृत्य सम्यक्तया तदुपपादनाय च न्यायप्रतिपादिता युक्तयः समुपयोगिन्यो दृष्टिसाधिका महत्त्वाधायिकाश्च भवन्ति । यथा- वह्निदाहयोः कार्यकारणभावविचारे [२४]दाहं प्रति वह्निः कारणं भवति । तत्कथमिति चेत् ? वह्निसत्वे दाहसत्वं वह्न्यभावे दाहाभाव इत्यन्वयव्यतिरेकाभ्यां दाहं प्रति वह्ने कारणत्वमिति कार्यकारणभावस्य स्वरूपं निश्चीयते ।

तथैव शाब्दबोधनिरूपणावसरे शाब्दवोधं प्रति आकाङ्क्षायोग्यतादीनां ज्ञानं कारणं कथं भवति, तत्र विविधप्रयोगावसरे शाब्दवोधोपपादनाय कीदृशं शाब्दवोधं प्रति कीदृशं योग्यताज्ञानं कारणमिति सम्यक्तया परिशीलनं पर्यालोचनञ्च आवश्यकं भवति । एवंभूता अनेके विषयाः न्यायशास्त्रे यत्र तत्र प्रयुक्ता विचारिताश्च सन्ति । तथैव शास्त्रान्तरेष्वपि कार्यकारणभावविषयकं परिशीलनं यथार्थतो विधातुं शक्यते । यतो हि न्यायशास्त्रे वहुधा सूक्ष्मतया च एतादृशाः कार्यकारणभावसम्बद्धा विषया यथायथं विमृष्टाः सन्ति ।

७. निष्कर्षः–

अनेन प्रकारेण लोकव्यवहारदृष्ट्या शास्त्रगतरहस्योद्घाटनदृष्ट्या, पदार्थविवेचनदृष्ट्या, भाषाविवेचनदृष्ट्या च न्यायशास्त्रं सर्वाणि शास्त्राणि अतिशेते । तस्मात् सर्वेभ्यः शास्त्रेभ्यो मूर्धन्यतममभ्यर्हिततमञ्चेति न्यायशास्त्रस्य महिमा सर्वैः शास्त्रकृद्भिः सादरं गीयते । किं बहुना, वेदविरोधिबौद्धचार्वाकादिदर्शनान्यपि न्यायदर्शनप्रतिपादितप्रमाणादिविषयैः सर्वथा उपकृतानि सन्ति । अतो बौद्धचार्वाकदर्शनेष्वपि न्यायदर्शनप्रतिपादिता विषया यथाप्रकरणं विमृष्टास्तथैव न्यायदर्शितयुक्त्या विरोधिमतनिराकरणपूर्वकं स्वमतोपस्थापनञ्च विहितमस्ति । एतावता सर्वथा न्यायशास्त्रं सर्वशास्त्रोपकारकं सिद्ध्यतीति मया यथामति न्यायशास्त्रस्योपयोगिता सङ्क्षेपेण निर्दिष्टेति शम् ।

सन्दर्भग्रन्थविवरणम्

१. मुनिः पराशरः, श्रीविष्णुपुराणम्, गीताप्रेस, गोरखपुर ।
२. वेदव्यासः, श्रीपद्मपुराणम्, वेङ्कटेशट्रष्ट, मुम्बै ।
३. मुनिः वात्स्यायनः, न्यायभाष्यम् (महर्षिगौतमकृतन्यायसूत्राणां पण्डितश्रीसुदर्शनाचार्यकृतप्रसन्नपदव्याख्यया संवलितम्) सम्पादकः- स्वामी द्वारिकादासशास्त्री, ई. १९९८ ।
४. भट्टाचार्यो गदाधरः, प्रामाण्यवादः (श्रीराजनारायणशुक्लः, प्रभाख्यटीका) प्रका. शारदा लाइब्रेरी १५१ ए. शिवानगरं वनारस । वि.सं. २००८ ।
५. उपाध्यायो गङ्गेशः तत्त्वचिन्तामणिः (तर्कवागीशश्रीमथुरानाथरहस्याख्यया टीकया सहितः, प्रत्यक्षखण्डं प्रथमो भागः श्रीकामाख्यानाथतर्कवागीशेन परिशोधितम्) प्रका. मोतीलालबनारसीदासः दिल्ली, पटना, वाराणसी ।
६. मिश्रो वाचस्पतिः न्यायसूत्रम् (महर्षिगौर्तमः) वसन्तपञ्चमी ई. १९९८ (सङ्कलितम्) ।
७. भट्टो जयन्तः, न्यायमञ्जरी (गौतमसूत्रतात्पर्यविवृतिः विषस्यथलविवरणेनविभूषिता) प्रका. काशीसंस्कृत ग्रन्थमाला चौखम्भा संस्कृत संस्थानं, पो.ब.नं. ११३९, वाराणसी ।

२४. मुक्तावली प्रत्यक्षखण्डः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८. उपाध्यायः गङ्गेशः तत्त्वचिन्तामणौ प्रामाण्यवादः (श्रीगौरीनाथशास्त्री प्रभाख्यया व्याख्यया विभूषितः) प्रका. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वैक्रमाब्दे- २०४० ।
९. भट्टाचार्यो गदाधरः, व्युत्पत्तिवादः, (जयाख्यव्याख्यया सहितः) पुनर्मुद्रितं संस्करणम्- १९८८ ई. ।
१०. भट्टाचार्यविश्वनाथः न्यायसिद्धान्तमुक्तावली, (किरणावलीव्याख्योपेता) पञ्चमं संस्करणं, व्याख्याता श्रीकृष्णवल्लभाचार्यः, चौखम्बा संस्कृत संस्थानं, वाराणसी ।
११. दीक्षितो भट्टोजिः सिद्धान्तकौमुदी ।
१२. आन्वीक्षिकी (न्यायविषयकगोष्ठी विशेषाङ्कः) वर्ष-१, अङ्क-१, २०६७ गुरुपूर्णिमा प्रका. नेपालसंस्कृतविश्वविद्यालयः वाल्मीकिविद्यापीठं न्यायविभागः ।
१३. Prof. N.S.R. Tatacharya, अवयवः प्रका. राष्ट्रियसंस्कृतिविद्यापीठम्, तिरुपतिः, ई. १९९६ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महाकालसंहिताप्रतिपादितं योगतत्त्वविवेचनम्

माधवप्रसादः लामिछाने
उपप्राध्यापकः

१. विषयप्रवेशः

तत्र शाक्तागमेषु महाकालसंहिताया महत्त्वपूर्णं स्थानं विद्यते। संहिताग्रन्थेषु प्रायेण अन्येभ्यो ग्रन्थेभ्यो विषयवस्तूनि संगृह्य तत्र स्थाप्यते। इदमेव हि संहिताग्रन्थस्य वैशिष्ट्यम्। अस्यां महाकालसंहितायामपि भीमा-कपालडामर-वज्रडामर-वामकेश्वरप्रभृतिभ्यस्तन्त्र-ग्रन्थेभ्यः सामग्रीसङ्कलनं विधाय यथा हंसो मिश्रिताभ्यां पयोऽम्वुभ्यां जलं त्यक्त्वा पय एव पिबति तथैवागमनिगमाभ्यां शुभं विषयं गृहीत्वा अशुभञ्च विषयं त्यक्त्वा तन्त्रसाधनाया एकः स्वतन्त्रस्तान्त्रिकस्मार्तसम्प्रदायः प्रतिपादितः। न केवलमायतनस्य विशालतया अपितु विषयवस्तुनोगम्भीरतयाऽपि एषा संहिता तान्त्रिकवाङ्मये महत्त्वपूर्णं स्थानमाधत्ते।

तान्त्रिकोपासनायां योगस्योपयोगित्वं तस्य महत्त्वञ्च सर्वैरेव स्वीकृतम्। ये कैवलप्राप्तावेव दृढनिश्चयाः सन्ति, ऐहिकफलञ्च तृणवद् गणयन्ति ते विषयविरक्ताः शुद्धबुद्धयो योगोपासनामवलम्ब्य स्वाभीष्टसिद्धिं कुर्वन्ति। अतो योगस्य महत्त्वं तदुपयोगित्वञ्चाकलय्यास्मिन् निवन्धे महाकालसंहितायाः परिचयपूर्वकमस्यां संहितायां प्रतिपादितं योगतत्त्वं विविच्यते।

२. महाकालसंहितायाः परिचयः

महाकालसंहिता देवीमहाकाल्योः संवादरूपेण निबद्धाऽस्ति। अत एवेयं संहिता महाकालसंहितेति नाम्ना प्रसिद्धिमलभत। अस्यां संहितायां विषयाणां प्रतिपादनं पद्यबद्धरूपेण पुराणशैल्यां विहितमस्ति। अस्याः संहितायाः पुष्पिकावाक्ये "पञ्चशतसाहस्र्यां महाकालसंहितायाम्" इत्युल्लिखितं वर्तते[1]। अनेनास्याः संहिताया विशालता स्फुटीभवति। परन्त्विदानीमस्याः संहिताया गुह्यकाली, कामकला चेति द्वावेव खण्डौ प्राप्येते। तत्र गुह्यकालीखण्डश्चतुर्दशपटलेषु कामकलाखण्डश्च पञ्चदशपटलेषु विभक्तोऽस्ति। द्वावेव खण्डावेकीकृत्य विंशतिसहस्रश्लोका इदानीं प्राप्यन्ते। अतोऽस्याः संहिताया अन्येऽपि खण्डा आसन्निति अनुमीयते। वेदपुराणसम्मताऽऽगमिक्युपासनापद्धतिरत्र प्रदर्शिता। आगमिक्युपासनापद्धतिप्रदर्शन-

---

१. द्रष्टव्यः, महाकालसंहिता, कामकलाखण्डः, पृ. ६।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्रमे आगमप्रतिपादितं वेदाविरुद्धमाचरणं गृहीतं, तत्प्रतिपादितं वेदविरुद्धञ्च आचरणं त्यक्तं तथा विविधेषु विषयेषु स्वमतञ्च स्थापितम् । अत एव डामरभैरवसंहितायामलशाबरतन्त्रप्रतिपादितेषु वेदविरुद्धविषयेषु महाकालसंहिताया विरोधो दृश्यते तथा उपर्युल्लिखितेषु शाक्तागमेषु प्रतिपादितेषु वेदाविरुद्धविषयेषु च समर्थनं दृश्यते । अत एव ग्रन्थकारेण शाक्तसम्प्रदायविशेषाणां परिचयक्रमे महाकालसंहितोक्तिज्ञा मध्यस्था इति प्रतिपादितम्[२] ।

श्रुतिस्मृत्युदितं कर्म देव्युपासनञ्चोभयं महाकालसंहितोक्तिज्ञाः कुर्वन्ति । अतोऽन्येभ्यस्तान्त्रिक-सम्प्रदायेभ्यो महाकालसंहितायाः पार्थक्यं श्रेष्ठत्वञ्च तत्र वर्णितम्[३] । संहितेयं न केवलं साधकानां कृते साधनापथं प्रदर्शयत्यपितु गम्भीरदार्शनिकचिन्तनाय प्रचुराः सामग्रीश्च प्रददाति ।

३.१ योगतत्त्वविमर्शः

योगार्थकाद् युजिर् धातोः समाध्यर्थकाद् युज्धातोर्वा 'घञ्' प्रत्ययस्य योगात् योगशब्दो निष्पद्यते । वाचस्पतिमिश्रमते क्लेशकर्माशयविपाकपरिपन्थित्वे सति चित्तवृत्तिनिरोधित्वं योगलक्षणम्[४] । महानिर्वाणतन्त्रे तु जीवब्रह्मणोरैक्यमेव योग इत्युल्लिखितं वर्तते[५] । कुलार्णवतन्त्रेऽपि जीवात्मनोरैक्यमेव योगपदेन निदर्शितम् । उक्तञ्च-

न पद्मासनतो योगी न नासाग्रनिरीक्षणम् ।
ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः ॥[६]

वस्तुतश्चित्तवृत्तीनां निरोधे सत्येव साधकस्य स्वरूपावस्थितत्वं सम्भवति, तच्च जीवब्रह्मणोरैक्यमेव । तत्र विविधासु उपासनासु योगस्योत्तमत्वे नास्ति विवादः । ये कैवल्यप्राप्तावेव दृढसङ्कल्पाः सन्ति, ऐहिकफलञ्च तृणवद् गणयन्ति ते विषयविरक्ताः शुद्धबुद्धयो मुक्तिकामनया योगोपासनामवलम्ब्य स्वाभीष्टसिद्धिं कुर्वन्ति । ते च योगिनो नित्यानन्दस्वरूपं मोक्षमभिलषन्त्यतस्तेषां कृते स्वर्गोऽपि तुच्छ एव भवति तस्य क्षयशीलत्वात् । महाकालसंहितामते योगेन भवबन्धो विनाशमुपगच्छति । पूर्वजन्मकृतान्यपि कर्माणि योगेनैव क्षयमायान्त्यतो योग एव उपासितव्यः[७] ।

३.२ योगस्य प्रकारः

सामान्यतो मन्त्रयोगो हठयोगो राजयोगो लययोगश्चेति चतुर्भिः प्रकारैर्योगो विभज्यते । परन्तु महाकालसंहितायां योगो द्विविधः प्रोक्तो हठयोग-क्रामिकयोगभेदेन ।

---

२. .... ।
मदुक्तसंहितोक्तिज्ञा मध्यस्थाः परिकीर्तिताः ॥ - महाकालसंहिता, गुह्यकालीखण्डः, १०।१२६२ ॥

३. श्रुतिस्मृत्युदितं कर्म देव्युपासनमेव च ।
उभयं कुर्वते देवि मदुदीरितवेदिनः ॥
अतोऽदः श्रेष्ठमन्येभ्यो मन्येऽहमिति पार्वति । - पूर्ववत्, १०।१२६३-१२६४ ॥

४. पातञ्जलयोगदर्शनम्, तत्त्ववैशारदी टीका पृ. ३ ।

५. महानिर्वाणतन्त्रम्, १४।१२३ ।

६. कुलार्णवतन्त्रम् ९।३० ।

७. महाकालसंहिता गुह्यकालीखण्डः, ११।४७१-४७२ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३.२.१ हठयोगः

तत्र हठयोगे स्थूलशरीरेण वलपूर्वकं योगक्रियाभ्यासं कुर्वन् श्वासप्रश्वासनिरोधेन सूक्ष्मशरीरं नियम्य समाधिलाभः क्रियते । बलेन क्रियमाणत्वादयं योगो हठयोग इत्युच्यते[८] । तत्राभ्यासस्यावस्थाभेदेन हठयोगः सप्तधा विभक्तः । ते च यथा-[९]

१) षट्कर्म, २) आसनम्, ३) मुद्रा, ४) प्रत्याहारः, ५) प्राणायामः, ६) ध्यानम्, ७) समाधिश्च

३.२.२ क्रामिको योगः

क्रमेण क्रियमाणो योगः क्रामिक इत्युच्यते। तत्र गुरूपदेशेनाभ्यासो मितभोजनमौषधसेवनं योगकार्योपयोगिनां व्यवहाराणां शिक्षा चैते क्रमाः परिज्ञेयास्तद्भवः क्रामिक इति परिकीर्त्यते[१०] । तत्र प्रवर्तकनिवर्तकभेदेन द्विविधौ पन्थानौ ज्ञेयौ । वर्णाश्रमोक्तं कर्मैव यदा कामसंकल्पपूर्वकं भवति तदा तत् प्रवर्तकमिति कथ्यते । तेन प्रवर्तकेण कर्मणा संसारे संसरणं भवत्यूर्ध्वोर्ध्वलोकोऽधोऽधोलोकश्च प्राप्यते । संसारे प्रवर्तनादेवैतत्कर्म प्रवर्तकनाम्ना ज्ञायते । पुनः सर्वकामविवर्जितं ज्ञानसंयुक्तं कर्म निवर्तकमिति कथ्यते । अनेन कर्मणा जन्मनो निवर्तनादेतत्कर्म निवर्तकं कथ्यते । तत्र निवर्तकमपि द्विविधं भवति- वाह्यभ्यन्तरभेदेन । बाह्यं नाम बहिक्रिया । सर्वकामविवर्जितो भूत्वा वर्णाश्रमोक्तविधिना कर्मणो नित्यमनुष्ठानं वहिक्रियायां भवति । आभ्यन्तरं तु बुद्ध्याऽत्मनि विध्यनुष्ठानम् । कर्ममुक्तये वर्णाश्रमप्रोक्तं कर्म ज्ञानभक्तिसमायुक्तो भूत्वा सदैवानुष्ठेयं यतो मुमुक्षवो ज्ञानिनोऽपि ज्ञानेन कर्मआचरन्ति[११] । अतो गुरोरुपदेशमनुसृत्य प्रथमं कामसंकल्यपूर्वकं प्रवर्तकं कर्मानुष्ठेयम् । यतो हि प्रारम्भे सर्वकामविवर्जितो भूत्वा कर्मानुष्ठानं नैव सम्भवति । ततः शनैः शनैर्विषयं प्रति वैराग्यमुत्पादयन्निवर्तकं कर्मानुष्ठेयम् । अनेन विधिना क्रामिकयोगाभ्यासे कृते सति स्वरूपलाभो भवति, स एव हि परमपुरुषार्थो मोक्षो वा । यमनियमाद्यष्टाङ्गो योगः क्रामिकयोग एवान्तर्भवत्यत इदानीमष्टाङ्गयोगस्य चर्चा विधीयते ।

३.२.२.१ अष्टाङ्गयोगः

तत्र योगष्टाङ्गानां विषये योगाचार्याणां विविधा धारणाः प्राप्यन्ते । पातञ्जलयोगसूत्रे योगस्याष्टावङ्गानि प्रतिपादितानि सन्ति । तच्च यथा-

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि[१२] । गोरक्षसंहितायान्तु यमनियमौ सन्त्यज्यासनं प्राणसंरोधः प्रत्याहारो धारणा ध्यानं समाधिरेतानि षडङ्गानि वर्णितानि[१३] । विष्णुपुराणेऽपि

---

८. वलेन क्रियमाणस्तु हठ इत्यभिधीयते ।
.... ॥ महाकालसंहिता, गुह्यकालीखण्डः ११।७०१

९. घेरण्डसंहिता, १।९-११ ।

१०. पूर्ववत्, ११।७०४-७०५ ।

११. पूर्ववत्, ११।७१४-७१५ ॥

१२. पातञ्जलयोगदर्शनम्, २।२९ ।

१३. आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि वदन्ति षट् ॥ - गोरक्षसंहिता, १।६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

योगस्यैतान्येव षडङ्गानि वर्णितानि[१४] । विष्णुसंहितायामपि योगस्य षडङ्गान्येव वर्णितानि परन्तु तत्रासनं नैव गणितं, तर्कश्च सम्मिलितः । यथा-

प्राणायामोऽत्र पूर्वं तु प्रत्याहारोऽथ धारणा ।
ततस्तर्कः समाधिश्च ध्यानं चाङ्गानि षट् क्रमात् ॥[१५]

गुह्यसमाजाख्ये बौद्धतन्त्रे प्रत्याहारो ध्यानं प्राणायामो धारणाऽनुस्मृतिः समाधिश्चेत्येवं षडङ्गो योग उक्तः । श्रीतन्त्रालोकेऽपि योगस्य षडङ्गान्येव भाषितानि । तच्च यथा-

प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥[१६]

महाकालसंहितायां योगस्याष्टावङ्गानि वर्णितानि । ते च यथा- यमो नियमआसनं प्राणायामः प्रत्याहारो धारणा ध्यानं समाधिश्चेति[१७] । प्रायेण सर्वेष्वेव तन्त्रेषु- शैवेषु वैष्णवेषु बौद्धेषु च षडङ्गो योगो वर्णितः, परन्तु सत्यपि तान्त्रिकग्रन्थे महाकालसंहितायान्तु अष्टाङ्गो योगो वर्णितः । इदं पार्थक्यं दृष्टिगोचरं भवत्यन्येभ्यस्तान्त्रिकग्रन्थेभ्यो महाकालसंहितायाः । अस्मिन् प्रसङ्गे इयं संहिता पातञ्जलयोगसूत्रेण निकटस्था अन्येभ्यस्तन्त्रग्रन्थेभ्यश्च दूरस्था वर्तते ।

३.२.२.१.१ यमः

तत्र पातञ्जलयोगसूत्रे अहिंसासत्यमस्तेयब्रह्मचर्यपरिग्रहाश्चेति पञ्च यमाः स्वीकृताः[१८] ।

श्रीमद्भागवतमहापुराणे तु अहिंसा सत्यमस्तेयमसङ्गो ह्री असञ्चयः ।
आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽ भयमिति द्वादश यमाः कथिताः[१९] ॥

हठयोगप्रदीपिकायां सत्यमहिंसाऽस्तेयं ब्रह्मचर्यं क्षमा धृतिर्दयाऽर्जवं मिताहारः शौचञ्चेति दश यमस्य भेदा स्वीकृताः[२०] । महाकालसंहितायामपि यमस्य दशधैव वर्गीकरणं प्राप्यते । ते च यथा- अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिर्दयाऽर्जवं मिताहारः शौचञ्चेति[२१] ।

३.२.२.१.२ नियमः

तत्र नियमविषयेऽपि योगाचार्याणां नैकमत्यम् । हठयोगप्रदीपिकायां तपः, सन्तोष ईश्वरवेदयोर्विश्वासो दानमीश्वरपूजनं, सिद्धान्तश्रवणं, लज्जा बुद्धिर्जप अग्निहोत्रश्चेति दश नियमाः स्वीकृताः[२२] । महर्षिपतञ्जलिना

---

१४. विष्णुपुराणम्, ३७।१३ । (रुद्रयामल उत्तरतन्त्रम् (धर्म और दर्शन) इत्याख्ये ग्रन्थे उद्घृतम्, पृ. ११२) ।
१५. विष्णुसंहिता, २०।५८ । रुद्रयामल उत्तरतन्त्रमां (धर्म और दर्शन) इत्याख्ये ग्रन्थे उद्घृतम्, पृ. ११२) ।
१६. श्रीतन्त्रालोकः (जयरथकृतविवेकव्याख्यानेन ज्ञानवती हिन्दीभाष्येण च विभूषितः), चतुर्थमाह्निकम्, १० पृष्ठम् ।
१७. महाकालसंहिता, गुह्यकालीखण्डः, ११।७१८-७१९ ।
१८. अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । - पातञ्जलयोगदर्शनम्, २।३० ।
१९. श्रीमदभागवतमहापुराणम्, ११।१९।३३ ।
२०. हठयोगप्रदीपिका, १।१७ ।
२१. महाकालसंहिता, गुह्यकालीखण्डः, ११।७२३-७२४ ॥
२२. हठयोगप्रदीपिका, १।२४ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्च नियमाः स्वीकृताः । ते च यथा-शौचं, सन्तोषस्तपः, स्वाध्याय, ईश्वरप्रणिधानञ्चेति[२३] । तत्र महाकालसंहितायां नियमा दशधाः प्रोक्ताः । ते च यथा- तपः, सन्तोष, आस्तिक्यं, दानमीश्वरपूजनं, सिद्धान्तश्रवणं ह्रीर्मतिर्जपो व्रतञ्चेति[२४] ।

३.२.२.१.३ आसनम्

साधकस्य योग्यतानुसारेण यया रीत्या स्थिरभावेन सुखपूर्वकं वस्तुं शक्यते तदासनमिति कथ्यते[२५] ।

तत्रासनान्यसङ्ख्यानि सन्ति तेषु चतुरशीति-सङ्ख्यकानि मुख्यानि । सर्वेष्वासनेषु दश उत्तमानि तेष्वपि चत्वार्येवोत्तमानीति महाकालसंहितायां प्रोक्तम्[२६] । तेषां दश आसनानां नामानि यथा- स्वस्तिकं, गोमुखं, पद्मं, वीरं, सिंहासनं, मयूरं, कुक्कुटं, भद्रं, कूर्मासनञ्चेति[२७] ।

३.२.२.१.४ प्राणायामः

पातञ्जलयोगसूत्रानुसारेण श्वासप्रश्वासयोर्गत्यवरोधः प्राणायामः कथ्यते[२८] । महाकालसंहितायां प्राणापानसमायोगः प्राणायामेति कीर्तितः[२९] । अयञ्च प्राणायामो रेचकपूरककुम्भकैस्त्रिविधो भवति । तत्र कौष्ठ्यस्य वायोर्निर्गमनं रेचको यः प्रश्वासरूपः । वाह्यस्य वायोरन्तर्धारणं पूरको यः श्वासरूपः । पूरितस्य वायोस्तम्भवृत्तिः कुम्भकः । एषः प्राणायामः प्रणवस्वरूपो भवति । तदनुसारेण रेचकः सृष्टिरूप अकारवर्णात्मकः पूरकः स्थितिरूप उकारवर्णात्मकः, कुम्भकश्च संहाररूपो मकारवर्णात्मकः ।

तत्र पुनः प्राणायामस्य त्रिविधत्वं वर्णितम्- उत्तममध्यमाधमभेदेन । अभ्यासक्रमे यः प्रस्वेदं जनयेत् सोऽधमः, कम्पनयुक्तः प्राणायामो मध्यम यस्याभ्यासाद् भूमित्यागो जायते स उत्तमः[३०] ।

३.२.२.१.४.१ नाडीशोधनविधिः- तत्र प्राणायामस्य सतताभ्यासार्थं प्रथमं नाडीशोधनं कर्तव्यम् । नाडीशुद्धिं विना प्राणायामाभ्यासे कृते सति वृथा क्लेशो भवतीति महाकालसंहितायां प्रतिपादितमस्ति[३१] । तत्र नाडीशोधनार्थं यमादिगुणसंयुक्तः सर्वसङ्गविवर्जितः सर्वकामवर्जितः सन् फलमूलोदकान्वितं तपोवनं गत्वा नदीतटे देवालये वा सुशोभनं मठं कृत्वा योगश्चरितव्यः । आदौ फलपुष्पो-

---

२३. शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । - पातञ्जलयोगदर्शनम्, २।३२ ।

२४. .... ।
तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् ॥
सिद्धान्तश्रवणं चैव ह्री र्मतिश्च जपो व्रतम् ।
नियमा दशधाःप्रोक्ता .... ॥ - महाकालसंहिता, ११।७३८-७३९ ॥

२५. महाकालसंहिता, गुह्यकालीखण्डः, ११।७४७-७४८ ॥

२६. "स्थिरसुखमासनम्" - पातञ्जलयोगदर्शनम्, २।४६ ।

२७. आसनानां च सर्वेषामुत्तमानि तथा दश ।
तेषूत्तमानि चत्त्वारि मुख्यरूपाणि पार्वति ॥ - महाकालसंहिता, गुह्यकालीखण्डः, ११।७२१ ॥

२८. महाकालसंहिता, गुह्यकालीखण्डः, ११।७५१-७५२ ॥

२९. तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः । - पातञ्जलयोगदर्शनम्, २।४९ ।

३०. महाकालसंहिता, गुह्यकालीखण्डः, ११।८२८ ।

३१. पूर्ववत्, ११।८५०-८५१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दकादिभिर्विनायकं सम्पूज्य इष्टदेवीं नत्वा गुरुञ्च नमेत् । तत आसने सस्थाय प्राङ्मुख उदङ्मुखो वा भूत्वा भ्रूमध्ये चित्तं स्थिरं कर्तव्यम् । तदनन्तरमिडया वायुमापूर्योदरस्थं स्फुरज्ज्वालावलीयुतं रेफविन्दुसंयुक्तं वह्निमण्डलस्थमग्निं ध्यायेत् । पिङ्गलया च पूरितो वायू रेचनीयः । पुनः पिङ्गलयाऽऽपूर्य इडया शनैः शनैः रेचनीयः । चतुर्मासपर्यन्तं त्रिषु कालेषु यत्नत एवं कृते सति नाडीशुद्धिर्भवति[३२] ।

३.२.२.१.५ प्रत्याहारः

प्रत्याहार आभ्यन्तरयोगे निपतति । विषयेषु विचरतामिन्द्रियाणां प्रवाहो यदा बलादाहृत्य चित्तस्वरूपे तदाकारं क्रियते सः प्रत्याहारो भवति इति पातञ्जलयोगसूत्रे कथितमस्ति[३३] । अनेन स्पष्टं भवति

यदिन्द्रियाणां वाह्यवृत्तीनांश्चित्ते लयो नाम प्रत्याहारः । तत्र महाकालसंहितायां विषयेषु स्वभावतो विचरतामिन्द्रियाणां बलादाहरणं प्रत्याहारः कथितः । न केवलमेतदपितु यत्सर्वं दृश्यं जगदस्ति तत्सर्वमात्मन्यात्मवद् दर्शनमपि प्रत्याहार एव । शरीरिणां यानि नित्यानि विहितानि कर्माणि सन्ति तेषां कर्मणा मनसा आत्मन्यनुष्ठानमपि प्रत्याहारो भवति । शरीरस्थितेषु अष्टादशसु मर्मस्थानेषु मनसा वायुमारोप्य तस्य धारणाऽपि प्रत्याहारो भवति[३४] ।

३.२.२.१.६ धारणा

शरीरस्य वाह्यमाभ्यान्तरं वा यत्रकुत्रचित् स्थाने चित्तस्य स्थिरीकरणं धारणा कथिता[३५] । यमनियमासनप्राणायामप्रत्याहाराभ्यासानां पश्चादेव धारणाभ्यासः कर्तव्यः । आत्मनि मनसो यमादिगुणसंयुक्ता स्थितिरेव धारणा इति महाकालसंहितायां कथिता । पुनः शरीरे पृथिव्यादीनां तत्त्वानां स्थानकल्पनं विधाय तत् तत् तत्त्वरूपवर्णानां देवानाञ्च धारणं धारणा कथिता[३६] ।

३.२.२.१.६.७ ध्यानम्- यस्मिन् विषये चित्तं स्थिरीक्रियते तस्मिन् विषये चित्तस्यैकाग्र्यं नाम ध्यानम् । ध्येयव्यतिरिक्तस्य कस्यचिदपि वस्तुन अभावो नाम ध्यानम् । विज्ञानभैरवे निश्चला, निराकारा, निराश्रया बुद्धिर्हि ध्यानमीरितम् । तच्च यथा-

ध्यानं हि निश्चला बुद्धिर्निराकारा निराश्रया ।
न तु ध्यानं शरीराक्षिमुखहस्तादिकल्पना ॥[३७]

---

३२. यमैश्च नियमैश्चैव आसने च सुसयतः ।
कृत्वा तु नाडिकाशुद्धिं प्राणायामं ततश्चरेत् ॥
वृथा क्लेशो भवेत्तस्य नाडीशुद्धिमकुर्वतः ।
.... ॥ - महाकालसंहिता, गुह्यकालिखण्डः ११।७६८-७६९ ॥

३३. पूर्ववत्, ११।८०८-८२१ ॥

३४. पातञ्जलयोगदर्शनम्, २।५४ ।

३५. महाकालसंहिता, गुह्यकालीखण्डः, ११।८८६-८८९ ॥

३६. देशवन्धश्चित्तस्य धारणा - पातञ्जलयोगदर्शनम्, ३।१

३७. महाकालसंहिता, गुह्यकालीखण्डः, ११।९०४-९०६ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रुद्रयामले चैतन्यभिन्नपदार्थेषु विचरन् मनः समाकृष्य आत्मन्यष्टदेवतायाश्चिन्तनं ध्यानमिति कथितम्[३८]। सगुणनिर्गुणभेदेन एतद् ध्यानं द्विविधं प्रोक्तम्। सगुणं नाम हृदयकमले अभीष्टदेवतायाः साकाररुपं ध्यानम्। निराकारं, निरञ्जनं, निराधारं, सच्चिदानन्दविग्रहं, सदसत् सर्वकारणं ब्रह्मैवाहं इति यद् वेदनं भवति तदेव हि निर्गुणं ध्यानम्[३९]।

३.२.२.१.६.८ समाधिः- समाधिर्हि वस्तुतो धारणाध्यानयोः पराकाष्ठा। समाधिदशायां ध्यातृध्यानध्येययोरभिन्नत्वं जायते। महाशून्यप्रतीतिस्तत्र भवति। ईदृशी दशा एव समाधिनाम्ना ज्ञायते[४०]। पञ्चेन्द्रियाणां वृत्तयो यदा निःशेषरूपेणात्मन्येव लीयन्ते तदा समाधिर्जायते। ध्येयवस्तुना सह स्वं तन्मयं समासाद्य स्वरूपशून्यमिव यदा अनुभूयते सैव दशा समाधिस्तेनैव मुक्तिरास्वाद्यते[४१]।

४. चक्रविवरणम्

तत्र योगानां हेतुभूतानि देहस्थानि चक्राणि महाकालसंहिताया गुह्यकालीखण्डे प्रतिपादितानि सन्ति[४२]। तानि यथाक्रमेणात्र वक्ष्यन्ते-

४.१ मूलाधारचक्रम्

तत्र मूलाधाराख्यं चक्रं गुदलिङ्गान्तरेऽवस्थितं वर्तते। तस्य च मूलाधारचक्रस्य चतुर्दलानि सन्ति। तानि च चतुर्दलानि प्रकृतिमहदहङ्कारतन्मात्रात्मकानि सन्ति। मूलाधारचक्रस्य ध्यानेन परमानन्दः, सहजानन्दः, धीरानन्दः, योगानन्दश्चेत्यात्मकानि फलानि जायन्ते। अस्मिन् चक्रेऽमृतप्रदा कुण्डलिनी ब्रह्मशक्ति र्निवसति।

४.२ स्वाधिष्ठानचक्रम्

लिङ्गमूले षट्पत्रयुतं स्वाधिष्ठानाख्यं चक्रमास्ते। तस्य च स्वाधिष्ठानचक्रस्य षट्पत्राणि यथा- विषयः, आभासः, वृत्तिः, कान्तिः स्थितिर्लयश्चेति। तेषां फलानि क्रमेण यथा- क्रूरता, गर्वो, नाशो, मूर्च्छा, अवज्ञा, अविश्वासश्चेति। इदं चक्रं कामशक्ते र्गृहमस्ति।

४.३ मणिपूरकचक्रम्

नाभौ दशदलयुतं मणिपूरकसंज्ञकं चक्रमास्ते। विकृतिः प्रत्ययो विम्वश्चैतन्यं सूक्ष्मदर्शनमुत्कण्ठोपाधिर्निर्बन्धः, शिक्षा, व्याजा, चेति दश तस्य दलानि सन्ति। तेषां फलानि यथा-

सुषुप्तिस्तृष्णेर्ष्या, पिशुनता, लज्जा, भयः, घृणा, मोहः, कषाय, विषादिता चेति। एतच्चक्रं भानोर्भवनं कथितम्।

---

३८. विज्ञानभैरवः, १४३॥

३९. रुद्रयामले उत्तरतन्त्रम्, २७।३८॥

४०. महाकालसंहिता, गुह्यकालीखण्डः, ११।९२४-९३५॥

४१. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। - पातञ्जलयोगसूत्रम्, ३।३

४२. महाकालसंहिता गुह्यकालीखण्डः, ११।९५४॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४.४ अनाहतचक्रम्

हृदये द्वादशभिर्दलैर्युतमनाहतसंज्ञकं चक्रमास्ते । अवहेलनम, विसंवादो, व्याहार, अवलम्बनं, शरीरास्याद उत्सेधः, प्रकर्षः, संविभागिता, कैतवं, दानं, वैक्लव्यं, विचारणा चेति द्वादशसंख्यकान्यनाहत-चक्रस्य दलानि । लौल्यप्रणाशः, कपटं, वितर्कः, अनुतापिता, आशा, प्रकाशश्चिन्ता, समीहासता, दम्भो, वैकल्यं, विवेकोऽहंमदस्तेषां दलानां फलानि ।

४.५ विशुद्धिचक्रम्

कण्ठे षोडशदलैः परिवृतं विशुद्धिसंज्ञकं चक्रमास्ते । इदं चक्रं भारतीस्थानं कथ्यते । अस्य दलस्य षोडशदलानि । यथा-क्षयः प्रभावो विच्छेद जीवनग्लानिर्मुक्तिर्भावना रचना स्वादो विभ्रम औदास्यम् बुद्धिर्विक्रमः स्वैरता चित्तविह्वलत्वं विरोधिता चेति । येषां दलानां फलानि च यथा-बोधः प्रणव उद्गीथो नैर्मल्यं शान्तता स्वधा स्वाहा नम अमृतं षड्ज ऋषभो गान्धारो मध्यमः पञ्चमो धैवतो निषादश्चेति ।

४.६ ललनाचक्रम्

कण्ठस्थितघण्टिकायां ललनाख्यं चक्रमवस्थितमस्ति । एतच्चक्रं द्वादशभिर्दलैर्युतमस्ति । अस्य चक्रस्य द्वादशदलानि यथा- विराग उन्माद निर्वेद अवहेल आमर्ष भीतिः तितिक्षा, स्फीतिता अनर्थ लालसा औदारता इति । तेषां फलानि च यथा- मदो मानः स्नेहः शोकः खेदो लुव्धता अरतिः संभ्रम ऊर्मिः श्रद्धा तोष अपराधिता इति ।

४.७ आज्ञाचक्रम्

भ्रूमध्ये आज्ञासंज्ञकं द्विदलयुतं चक्रं भवति । ते द्वे दले चाविर्भावतिरोभावरूपे स्तः । तयो तमोःफलञ्च तत्परं विकारिता चेति ।

४.८ मनश्चक्रम्

आज्ञाचक्रोर्ध्वे षड्दलयुतं मनश्चक्रमास्ते । तानि च षड्दलानि यथा- कामः, क्रोध, लोभो मोहः, द्वेषः, असूयता चेति । तेषां फलानि यथा- स्वप्नं, रसोपयोगः, घ्राणं, रूपोपलम्भनं, स्पर्शनं, शाव्दवोधश्चेति ।

४.९ सोमचक्रम्

मनश्चक्रोर्ध्वे षोडशभिर्दलैर्युतं सोमचक्रमास्ते । तानि च षोडशदलानि यथा- आशय उपशमः स्मृतिः सदसल्लयो निमित्तः सत्ता प्रमाणमक्षयो वासनाऽद्वैतं योगभूमिः पिण्ड अविद्या निवृत्तिश्चेति । यतेषां फलानि यथा- कृपा क्षमा आर्जवं धैर्यं वैराग्यो धृतिः सम्मदो हास्यं रोमाञ्चो निचयो ध्यानं स्थिरता गाम्भीर्यमुद्यम औदार्यमेकाग्रतेति ।

४.१० सहस्रारचक्रम्

तत्र ब्रह्मरन्ध्रे सहस्रदलयुतं चक्रमास्ते । एतच्चक्रममृतधरमस्ति । सहस्रारचक्रात् सततमेवामृतधारा निःसरति । तत्सुधासारधाराभिस्तनुरभिवर्धते । एतच्चक्रं शिवशक्त्योः सामरस्यरूपमस्ति । अस्मिन्नेव चक्रे सर्वेषां चक्राणां लयो भवति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५. उपसंहृतिः

सत्यपि तान्त्रिकग्रन्थे महाकालसंहितायां निगमं प्रत्याग्रहो दृश्यते । अत एवात्र वेदाविरुद्धविषया गृहीता अन्येषु तन्त्रग्रन्थेषु प्रतिपादिता वेदविरुद्धाश्च विषयास्त्यक्ताः । इत्थं स्मार्ततान्त्रिकपरम्पराया निर्माणे महाकालसंहिताया योगदानं महत्त्वपूर्णं विद्यते । योगतत्त्वविवेचनाप्रसङ्गेऽपि इयं संहिता-ऽन्येभ्यस्तन्त्रग्रन्थेभ्यो दूरस्था एव दृश्यते इति कथने नास्त्यतिशयोक्तिः । प्रायेण सर्वेष्वेव तन्त्रग्रन्थेषु षडङ्गो योगो वर्णितः परन्त्वत्राष्टाङ्गो योगः प्रतिपादितः । तथैवान्येषु तन्त्रग्रन्थेषु कुण्डलिनीयोगविषये वह्वी चर्चा प्राप्यते, अत्र तु लघ्वी एव । अन्येषु तन्त्रग्रन्थेषु यमनियमासनानां नाधिकतया महत्त्वं दीयते अत्र तु यमनियमासनानि योगस्य हेतुभूतानि सन्त्यतस्तानि मुख्यत्वेन गृहीर्तव्यानीति प्रतिपादितमस्ति । शाक्तोपासनापरम्परायां यथा महाकालसंहितया नवीना वेदसम्मता परम्परा स्थापिता तथैव योगविषये-ऽप्यन्येभ्यस्तन्त्रग्रन्थेभ्यः काचिद् भिन्ना एव योगपरम्पराऽत्र प्रतिपादिता दृश्यते । अत एवैषा संहिता तान्त्रिकवाङ्मये अतीव महत्त्वपूर्णं स्थानमाधत्ते ।

सन्दर्भग्रन्थाः

१. कुलार्णवतन्त्रम् : (सं.) तारानाथविद्यारत्नं तथा आर्थर एवेलोन, मोतीलाल वनारसीदास, दिल्ली १९७५ ई. ।

२. गोरक्षसंहिता (भाग-१) : (सं.) जनार्दनः पाण्डेयः, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, १९७६ ई. ।

३. घेरण्डसंहिता : घेरण्डयोगीन्द्रः, लक्ष्मीवेङ्कटेश्वर स्टीम प्रेस, कल्याण, बम्वई, वि.सं. २०१३ ।

४. तन्त्रालोकः (सं.) राधेश्यामः चतुर्वेदी, चौखम्वा विद्याभवन, वाराणसी, २००२ ई. ।

५. पातञ्जलयोगदर्शनम् : (सं.) डा. श्रीनारायणमिश्रः, भारतीय विद्याप्रकाशन, दिल्ली, १९९८ ई. ।

६. भागवतमहापुराणम् : गीताप्रेस, गोरखपुर, वि.सं. २०४५ ।

७. महाकालसंहिता (कामकलाखण्डः): (सं.) डा. गोपीनाथः कविराजः, गंगानाथझा केन्द्रीयसंस्कृतविद्यापीठः, इलाहावादः, १९७१ ई. ।

८. महाकालसंहिता (गुह्यकालीखण्डः) : (सं.) किशोरनाथझा, गंगानाथझा, केन्द्रीयसंस्कृतविद्यापीठः, इलाहावादः, १९७६ ई. ।

९. महानिर्वाणतन्त्रम् : (सं.) आर्थर एवेलोन, मोतीलाल वनारसीदास, दिल्ली, १९७७ ई. ।

१०. रुद्रयामले उत्तरतन्त्रम् : (सं.) जीवानन्दविद्यासागरोभट्टचार्यः, कलकत्ता, १९३७ ई. ।

११. रुद्रयामले उत्तरतन्त्रम्, (धर्म और दर्शन) : रमाशङ्करोमिश्र, परिमल पब्लिकेशन्स, दिल्ली, १९८९ ई ।

१२. विज्ञानभैरव : (सं.) व्रजवल्लभद्विवेदी, मोतीलाल वनारसीदास, वाराणसी, १९७८ ई. ।

१३. हठयोगप्रदीपिका : (सं.) ब्रह्मानन्दः, अड्यार लाइब्रेरी एण्ड रिसर्च सेन्टर, मद्रास, १९७२ ई. ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आचार्यवसुबन्धुस्तदीयाभिधर्मकोशपरिचयश्च

राजनारायणः ठाकुर
सहा. प्राध्यापकः

बौद्धजगति आचार्यवसुवन्धोः प्रकाण्डपाण्डित्यस्य शास्त्रप्रणयनपटुतायाश्चास्ति महती प्रतिष्ठा। स्वीयपुष्कलाभिः कृतिभिराचार्योऽयं भगवतो बुद्धस्याभिप्रायं लोके प्रसार्य महज्जनकल्याणं प्रसाधितवान्। इमामेतस्य परमार्थवृत्तिमाकलय्य वौद्धविद्वांसः सादरमेनं 'द्वितीयवुद्धः' इत्याख्यया समलङ्कुर्वते।[1]

आसीद् महान् शास्त्रार्थकुशलो वसुवन्धुः। महावैयाकरणं वसुरातं शास्त्रार्थेऽयं पराजितवान्। श्रूयते एकदा साङ्ख्याचार्येण विन्ध्यवासिना आचार्यस्य अस्य गुरुर्बुद्धमित्रः शास्त्रार्थे पराजितः। आगतेन वसुबन्धुना उपश्रुत्येदं वृत्तान्तं शास्त्रार्थं कर्तुं विन्ध्यवासी अन्विष्टः, किन्तु विन्ध्यवासी तस्मिन् काले नासीज्जीवितदशायाम्। फलतो विन्ध्यवासिनः साङ्ख्यसप्ततिग्रन्थस्य खण्डने 'परमार्थसप्ततिः' इत्याख्यो ग्रन्थो लिखितः।[2]

आचार्योऽयं वसुवन्धुर्गान्धारदेशे पुरुषपुरे व्राह्मणवंशे समुद्भूतः। अयमासीत् कौशिकगोत्रीयः। तस्य त्रयो भ्रातर आसन्। तेष्वार्यासङ्गो ज्यायान्, विरिञ्चिवत्सः कनीयान्, आचार्यश्चासीद् मध्यमः। वुदोनतारानाथमतानुसारेण सङ्घभद्रादयं विद्यामधीतवान्। परमार्थमतानुसारेण वुद्धमित्रोऽस्य गुरुः, ह्वेनसाङ्गमतेन च परमार्थः। सम्भाव्यते यद् एभिर्विभिन्नान् गुरून् संश्रित्य शास्त्रज्ञानं समर्जितम्।[3]

तस्मिन् काले अयोध्या विद्यायाः केन्द्रमासीदिति विभिन्नैर्विवरणैः परिज्ञायते। निवसद्भिरत्रैव एभिर्विभिन्नदर्शनानां गभीरमध्ययनमभिधर्मकोशादिशास्त्राणाञ्च प्रणयनं कृतम्। तारानाथमतानुसारेण स नालन्दायां प्रव्रज्य सर्वाणि श्रावकपिटकान्यधीत्य विशेषतोऽभिधर्मस्य ज्ञानमर्जयितुं सङ्घभद्रसमीपं काश्मीरं जगाम। अस्य वैदुष्यकीर्तिः सर्वत्र लोके विप्रसृता आसीत्। अस्य प्रभावेण गुप्तसम्राड् अयोध्याधीश्वरश्चन्द्रगुप्तो विक्रमादित्यः साङ्ख्यमतमुत्सृज्य वौद्धः संवृतः। तत्पश्चादयं स्वपुत्रं बालादित्यं ध्रुवां चात्मनो राज्ञीम् अध्ययनार्थं तत्समीपं प्रेषितवान्। तत्त्वसङ्ग्रहपञ्जिकाकारः कमलशीलोऽपि आचार्यमेनं तद्वैदुष्यप्रभावेण सादरं संस्मरति स्म। आचार्योऽयमशीतिवर्षवयसि गान्धारेषु प्राणांस्त्यक्तवान्।[4]

---

१. त्रिपाठी, रामशङ्करः, सौत्रान्तिकदर्शनम्, पृ. ९४–९५, केन्द्रीयतिव्वत्युच्चशिक्षासंस्थानम्, वाराणसी, १९७६।

२. त्रिपाठी, रामशङ्करः, सौत्रान्तिकदर्शनम्, पृ. ९५, केन्द्रीयतिव्वत्युच्चशिक्षासंस्थानम्, वाराणसी, १९७६।

३. उपाध्यायो वलदेवः, वौद्धदर्शनमीमांसा, पृ. १५३, चौ.वि. भवनम्, वाराणसी, १९७८।

४. उपाध्यायो वलदेवः, वौद्धदर्शनमीमांसा, पृ. १५४–१५५, चौ.वि. भवनम्, वाराणसी, १९७८।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आचार्यवसुवन्धुः समेषामष्टादशनिकायानां महायानसिद्धान्तानां चाद्वितीयः सुविख्यातः पण्डित आसीदिति तत्कृतिभिरेव परिज्ञायते। सर्वप्रथमं स सर्वास्तिवादाङ्गभूतं वैभाषिकशास्त्रजातमेव अधीतवान्। तस्मिन् काले काश्मीरेषु वौद्धेषु सौत्रान्तिकानां सविशेषः प्रभाव आसीत्। वैभाषिकापेक्षया सौत्रान्तिकानां दार्शनिक-परिवेशः सुतरां सूक्ष्मो युक्तिसङ्गतश्चाविद्यत। फलतश्चाचार्येण वैभाषिकाणां विसङ्गतयो भृशं स्वग्रन्थेऽभिधर्मकोशे तद्भाष्ये च समालोचिताः। अनेन सुस्पष्टमिदं प्रतिभाति यदाचार्यः स्वतन्त्रविचारक आसीत्।[५]

वसुबन्धुकालविषये विवादो विदुषाम्। तर्ककुशलाचार्यस्य वसुवन्धोः समयः ४७७–५५७ वैक्रमाव्द आसीत्। परमत्र आचार्यविनयतोषभट्टाचार्यस्य मतमेवाधिकं समञ्जसं प्रतिभाति। तन्मतेन ३३७-४१७ विक्रमाव्दो वसुवन्धोः समयः।

चीनत्रिपिटके वसुवन्धुनाम्ना षट्त्रिंशद्ग्रन्था दृश्यन्ते। वज्रच्छेदिकासूत्रशास्त्रम्, तर्कशास्त्रम्, परमार्थसप्ततिः, पञ्चस्कन्धशास्त्रम्, शतशास्त्रव्याख्या, अभिधर्मकोशशास्त्रम्, इत्यादयो ग्रन्थाः सन्तिष्ठन्ते तत्र।[६]

आचार्यवसुवन्धुना 'अभिधर्मकोश' – नामको ग्रन्थो विरचितः। अत्रैवाचार्येण स्वकीयो वैभाषिकसिद्धान्तः प्रतिपादितः। अयमेवास्ति वैभाषिकदर्शनस्य सर्वश्रेष्ठो महत्त्वपूर्णो ग्रन्थः। ग्रन्थेऽस्मिन् अभिधर्मकोशस्य सारतत्त्वं विद्यते। तस्मादभिधर्मशास्त्रमिदं वैभाषिकाणं सर्वस्वं वर्तते। विभाषाया रचनानन्तरं काश्मीरे वैभाषिकाणं प्रधानता सर्वमान्या आसीत्। विभाषामवलब्यैव आचार्यवसुवन्धुरभि-धर्मकोशं प्रणीतवान्। यथोक्तं वसुवन्धुना अभिधर्मकोशे–

'काश्मीरवैभाषिकनीतिसिद्धः प्रायो मयायं कथितोऽभिधर्मः'[७] इति।

सर्वास्तिवादिनामभिधर्म एव अस्याश्रयः। एकस्मिन् समये भारते सर्वत्राभिधर्मकोशस्य आसीद् वहुलप्रचारः। न केवलं बौद्धेषु तैर्थिकेष्वपि अस्य प्रसिद्धिरिति हर्षचरिते यथोक्तं वाणभट्टेन "शाक्यभिक्षुदिवाकरस्याश्रमे शाक्यशासनपटवः शुका अपि अभिधर्मकोशं समुपदिशन्तोऽतिष्ठन्" इति। 'कोशो वुद्धसिद्धान्तो वसुवन्धुकृतः' इति टीकायां शङ्करकविः इदं हि ग्रन्थरत्नं बौद्धदर्शनजिज्ञासूनाङ्कृते महदावश्यकमिति वौद्धदार्शनिकनिकषा यथातथ्यं साधयति।[८]

ग्रन्थेऽस्मिन् आचार्यवसुवन्धुः प्रथमं तावन्मङ्गलाचरणं कृतवानस्ति। तथा-

यः सर्वथा सर्वहतान्धकारः,
संसारपङ्काज्जगदुज्जहार।
तस्मै नमस्कृत्य यथार्थशास्त्रे
शास्त्रं प्रवक्ष्याम्यभिधर्मकोशम्॥[९]

---

५. उपाध्यायो, वलदेवः, बौद्धदर्शनमीमांसा, पृ. ९२, चौ.वि. भवनम्, वाराणसी, १९७८।
६. साङ्कृत्यायनो राहुलः, अभिधर्मकोशटीका (भूमिका), पृ. १४–१५, का.वि., वाराणसी, १९८८।
७. उपाध्यायो, वलदेवः, बौद्धदर्शनमीमांसा, पृ. १५५, चौ.वि. भवनम, वाराणसी, १९७८।
८. साङ्कृत्यायनो राहुलः, अभिधर्मकोशटीका (भूमिका), पृ. १८, का.वि., वाराणसी, १९८८।
९. साङ्कृत्यायनो राहुलः, अभिधर्मकोशटीका (भूमिका), पृ. १, का.वि., वाराणसी, १९८८।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्याभिप्रायो यस्तथागतः सर्वाज्ञानविरहितो लोकं जन्ममरणकर्दमादुद्धृतवान्, तस्मै सत्योपदेष्ट्रे नमो विधाय ग्रन्थकारो वदति यथा अभिधर्मकोशम्–

प्रज्ञामलाः सानुचराभिधर्मः
तत्प्राप्तये यापि च यच्च शास्त्रम् ।
तस्यार्थतोऽस्मिन् समनुप्रवेशात्
स चाश्रयोऽस्येत्यभिधर्मकोशः ॥[10]

मलरहिता स्कन्धादिपरिवारसहिता प्रज्ञा अभिधर्म इत्युच्यते । अभिमुखो धर्मः प्रधानो धर्मो निर्वाणमित्युच्यते । तस्या अनास्रवप्रज्ञायाः प्राप्तये लोके या कापि प्रज्ञा, यत् किमपि शास्त्रं वा तस्य सर्वस्य सारतो न तु शब्दतोऽस्मिन् ग्रन्थे सङ्ग्रहोऽस्त्यत एवायं यथार्थनामाभिधर्मकोशो नाम ग्रन्थः ।

ग्रन्थेऽस्मिन् ग्रन्थकारेण वसुबन्धुना वैभाषिकनये यत्किञ्चिदिदं जगति सत् तत्सर्वं संस्कृतासंस्कृतभेदेन द्विविधं प्रोक्तम्, तद्यथा–

सास्रवाऽनास्रवा धर्माः संस्कृता मार्गवर्जिताः ।
सास्रवा आस्रवास्तेषु यस्मात्समनुशेरते ॥[11]

अर्थात् संस्कृता धर्माः कारणवर्जिताः, अत एव ते अस्थायिनोऽनित्याः, गतिमन्तः, सास्रवाश्च । तेषां त्रयो भेदाः सन्ति – पञ्चस्कन्धाः, द्वादशायतनानि, अष्टादशधातवश्च । असंस्कृता धर्मा न कारणजनिताः । अत एव ते शाश्वताः, नित्याः, निश्चलाः, अनास्रवाश्च । पुनश्च ते त्रिधा वर्तन्ते- आकाशम्, प्रतिसङ्ख्यानिरोधः, अप्रतिसङ्ख्यानिरोधश्चेति । यथोक्तमभिधर्मकोशे–

अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतम् ।
आकाशं द्वौ निरोधौ च तत्राकाशमनावृतिः ॥[12]

पुनश्च ग्रन्थकारेण यथोक्तं तत्रैवाभिधर्मकोशे– "सर्वं वस्तु क्षणचतुष्टयमात्रस्थायि" वर्तते । तेषु प्रथम उत्पत्तिक्षणः, द्वितीयोऽस्तित्वक्षणः, तृतीयो विलयनक्षणः, चतुर्थोऽन्तिमश्च विनाशक्षणः । अयमेव बौद्धानां क्षणिकवादः । पृथिव्यप्तेजोवायुरूपाणि च चत्वार्येव तत्त्वानि, न त्वाकाशः । परमाणूनां परस्परं संयोगेन वस्तु स्वरूपमादधाति, सर्वाण्यपि वस्तून्यन्ते परमाणुषु लीयन्ते । परमाणुष्वपि रूपम्, रसः, गन्धः, स्पर्शो वाऽस्ति, परमतीन्द्रियत्वात् तस्य सत्ता न प्रतीयते । सति च परमाणूनां सङ्घाते एषां सत्तापि ज्ञातुं शक्यते । इत्थमित्येतत् सर्वं यथार्थनिरूपणं कृतं ग्रन्थकारेणात्र, इति दिङ्मात्रनिर्देशः ।[13]

ग्रन्थेऽस्मिन् अष्टौ परिच्छेदाः सन्ति । तद्यथा- धातुनिर्देशः, इन्द्रियनिर्देशः, लोकधातुनिर्देशः, कर्मनिर्देशः, अनुशयनिर्देशः, आर्यपुद्गलनिर्देशः, ज्ञाननिर्देशः, ध्याननिर्देशश्चेति । षट्शतसङ्ख्याककारिका-

१०. पूर्ववत् ।

११. साङ्कृत्यायनो राहुलः, अभिधर्मकोशटीका (भूमिका), पृ. २, का.वि., वाराणसी, १९८८ ।

१२. साङ्कृत्यायनो राहुलः, अभिधर्मकोशटीका (भूमिका), पृ. २, का.वि., वाराणसी, १९८८ ।

१३. आचार्यशान्तरक्षितः, तत्त्वसङ्ग्रहभूमिका, पृ १२, बौ.भा.प्र., वाराणसी, १९८१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भिर्वौद्धसिद्धान्तानाम् अपूर्वं निरूपणं कृतं ग्रन्थकारेणात्र । ग्रन्थस्यास्य आशयप्रकटीकरणाय अनेका टीका विरचिता वौद्धदार्शनिकैः । तासु वसुवन्धुविरचितस्वोपज्ञभाष्यम्, यशोमित्रकृता स्फुटार्था टीका च प्रमुखे स्तः ।[१४]

निष्कर्षः

इत्थं स्वयं वसुवन्धुः, तेन महामनीषिणा वसुवन्धुना विरचितोऽयं ग्रन्थो वौद्धदार्शनिकजगति लव्धप्रतिष्ठोऽस्ति । ग्रन्थस्यास्य अध्ययनं विना कोऽपि जनः सम्यक्तया अभिधर्मपदार्थस्य ज्ञाता भवितुं अर्हति । अत्र ग्रन्थकारः सर्वेभ्यो जनेभ्यः सामूहिकीं सामाजिकीं कल्याणविषयिणीं विचारधारां प्रत्तवान् । अस्मिन् अभिधर्मकोशे बहुजनहिताय वहुजनसुखाय च शिक्षा वर्तते । अत एव पठनीयोऽयं ग्रन्थः । न केवलं वौद्धदर्शनतत्त्वजिज्ञासूनाङ् कृते ग्रन्थस्यास्य अध्ययनम् आवश्यकम् अपितु सर्वेषां शान्तिप्रियजनानाम् अहिंसावादिनाञ्च कृतेऽस्य ग्रन्थरत्नस्य अध्ययनं ज्ञानञ्च अतीव महत्त्वपूर्णमस्ति । अस्तु ।

सन्दर्भग्रन्थसूची

१. उपाध्यायो वलदेवः, वौद्धदर्शनमीमांसा, चौखम्वाविद्याभवनम्, वाराणसी, १९७८ ।
२. त्रिपाठी रामशङ्करः, सौत्रान्तिकदर्शनम्, केन्द्रीयतिव्वत्युच्चशिक्षासंस्थानम्, वाराणसी, १९७६ ।
३. साङ्कृत्यायनो राहुलः, अभिधर्मकोशभूमिका, काशीविद्यापीठ, वाराणसी, १९८८ ।
४. आचार्यशान्तरक्षितः, तत्त्वसङ्ग्रहः, वौद्धभारतीप्रकाशनम्, वाराणसी, १९८१ ।

१४. साङ्कृत्यायनो राहुलः, अभिधर्मकोशटीका (भूमिका), पृ. १८, का.वि., वाराणसी, १९८८ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपाली खण्ड

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपाली कथाको आधुनिक कालः गति, स्वरूप र प्रवृत्ति

प्रा. नारायणकुमार आचार्य
शिक्षाध्यक्ष

पृष्ठभूमि

साहित्यिक आधुनिकतावाद एक सापेक्षित चेतनामा अवलम्वित हुन्छ[१] । नेपाली कथाका सन्दर्भमा त्यो चेतनाको केन्द्रमा यथार्थवादी प्रवृत्तिको संवरण रहेको देखिन्छ भने परिधीय स्थितिमा क्रमशः राजनैतिक-सामाजिक चेतनाको जागरण, लेखनपद्धतिको विकासमा यन्त्रयुगप्रति बढी सचेष्टता, आधुनिक सञ्चार माध्यमप्रति तीव्र सचेतता, स्वअर्जित शिल्पसौन्दर्यप्रति अनुष्ठान आदिलाई पाउन सकिन्छ[२] । आज हामी गद्य साहित्यको जुन विधालाई आधुनिक कथा भन्छौं, त्यो न पुराना कथाको विकसित रूप हो, न त यिनमा आधारित कुनै साहित्यिक विधा नै[३] । विश्व साहित्यकै सन्दर्भमा हेर्दा आधुनिक कथा एउटा स्वतन्त्र साहित्यिक विधाका रूपमा उन्नाइसौँ शताब्दीको प्रथम चरणमा अस्तित्त्वमा आएको देखिन्छ । यो आधुनिक कथा यद्वा लघुकथाको प्रथम जन्मस्थल अमेरिका र रुस हो भने यसका जन्मदाता हुन् अमेरिकी कवि, कथाकार तथा समालोचक एड्गर एलेन पो (सन् १८०९-४९) र रुसी उपन्यासकार, नाटककार तथा कथाकार एन.भी.गोगोल (सन् १८०९-५२)[४] । डार्बिन, फ्रायड र मार्क्सका वैज्ञानिक अवधारणा तथा दर्शनको स्पर्श पाएको पाश्चात्य यथार्थवाद नै नेपाली कथाको इतिहासमा आधुनिक कालको पर्यायवाची भएको हुँदा आधुनिक नेपाली कथाको मूल संस्कारमा बौद्धिक चेतनाको उन्मीलन तथा वैज्ञानिक विचारप्रतिको झुकाउ निहित रहेको छ[५] । नेपाली कथा साहित्यको करिब साढे दुई सय वर्ष पुरानो इतिहासमा आधुनिक कथाको इतिहास केवल पचहत्तर वर्ष मात्र रहेको छ। नेपाली गद्यको थालनीदेखि वर्तमान समयसम्मको विकासक्रमलाई विश्लेषण गर्दा कथाविधा लोकप्रिय, गतिशील एवं निकै सशक्त चरित्रको देखिँदै आएको छ। नेपाली

---

१. डा. दयाराम श्रेष्ठ र मोहनराज शर्मा, **नेपाली साहित्यको संक्षिप्त इतिहास**, २०४९: ८७।

२. पूर्ववत्, पृष्ठ ८६।

३. कुमारबहादुर जोशी, **विकीर्ण चिन्तन**, २०५०: २।

४. पूर्ववत्।

५. डा. दयाराम श्रेष्ठ र मोहनराज शर्मा, **नेपाली साहित्यको संक्षिप्त इतिहास**, २०४९: ८७।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गद्यको विकासमा कथाविधाको निकै ठूलो योगदान छ र यसले गद्यलाई महत्त्वपूर्ण मूल्य प्रदान गरेको छ । कालसापेक्ष विभिन्न मोडहरूलाई पार गर्दै नेपाली कथाले विकासको एक निश्चित क्रम बसालेको पाइन्छ ।

साहित्यका सन्दर्भमा 'आधुनिकता' भन्नु भौतिक अर्थात् बाह्य कुरा भन्दा बढी आन्तरिक र अनुभूतिजन्य कुरा हो । ऐतिहासिक परिप्रेक्ष्यमा आधुनिकताको मूल्यबोध गर्न केही त्यस्ता प्रसङ्गहरूले सूचकको काम गर्छन्, जसलाई यसरी प्रस्तुत गर्न सकिंन्छः

- परम्परागत रूपमा प्रचलित रहँदै आएको आख्यान ढाँचाको सट्टा पाश्चात्य मान्यताअनुसार स्थापित संरचनाभित्र कथा-रचना आवद्ध हुनु,
- विषयवस्तु र चरित्र विन्यासमा अतिमानवीय र अलौकिक तत्त्वको वहिष्करण देखिनु र समाजसापेक्ष यथार्थमुखी बन्ने आकाङ्क्षालाई कथ्यले पूर्ण रूपमा आत्मसात् गर्नु,
- बौद्धिकता र मौलिकताको भावभूमिमा समाजशास्त्र, मानवशास्त्र र मनोविज्ञान जस्ता विषयहरूको आधार लिएर कथाकृतिले आफ्नो स्वतन्त्र विधागत अस्तित्व कायम गर्ने प्रतिबद्धता देखाउनु[६],
- पाठकहरूका रूचि र आकाङ्क्षाप्रति सचेत रही कथा लेख्ने प्रवृत्तिको विकास हुनु ।

उपर्युक्त परिप्रेक्ष्यमा नेपाली कथाको आधुनिक संरचना निर्माण भएको छ र यसले एउटा फराकिलो लोकमार्ग निर्माण गर्दै गएको छ ।

आधुनिक कालः प्रारम्भ बिन्दु र मतमतान्तरहरू

नेपाली कथामा 'आधुनिक काल' को प्रारम्भबिन्दुबारे अधिकांश समीक्षकहरू गुरूप्रसाद मैनालीकै नाममा सहमत देखिन्छन् । तर यस तथ्यमा पनि केही मतभेदहरू छन् । नेपाली कथासाहित्यका यथार्थ विश्लेषक मानिने डा. ईश्वर बरालले ***गोर्खासंसार*** (वि.सं. १९८३: देहरादून) मा प्रकाशित रामसिंह गोर्खाको 'एउटा गरिब सार्कीकी छोरी' र प्रेमसिंह आलेको 'करनीको फल', यी दुई कथाबाट नेपाली कथाको आधुनिक काल सुरु भएको जिकिर गरेका छन् ।[७] भानुभक्त पोखरेलले पनि यही तर्कमा सहमति जनाउँदै यिनै कथाद्वयबाट नेपाली कथाको इतिहासमा आधुनिककालको प्रारम्भ भएको कुरा थपक्क स्वीकार्नुपर्छ[८] भनेका छन् । उनको भनाइ छ, यसैले त्रिपाठीको 'शारदापूर्वको अतिरञ्जनात्मक धरातललाई मैनालीका कथाले सामाजिकता दिएका छन्' भन्ने भनाइमा सोझै सहीछाप गर्न सकिँदैन[९] । तर पोखरेलले यस कुरालाई पुष्टि गर्नका लागि ***शारदा***लाई आवश्यकताभन्दा बढी महत्त्व दिने अन्धपरम्परा बसेको[१०] भनेर उल्लेख गर्नुबाहेक खासै ठोस तर्क प्रस्तुत गर्न सकेको देखिँदैन ।

---

६ डा. दयाराम श्रेष्ठ, "नेपाली कथासाहित्यको विकासक्रम र वर्तमान सन्दर्भ', **समकालीन साहित्य**, २०५९: १७ ।
७ डा. ईश्वर बराल, **झ्यालबाट**को भूमिकावाट ।
८ भानुभक्त पोखरेल, **सिद्धान्त र साहित्य**, २०५९: २३७ ।
९ पूर्ववत् ।
१० पूर्ववत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रेष्ठ र शर्माले चाहिँ ***गोर्खासंसार***को प्रकाशनपछि नेपाली कथामा माध्यमिक कालको दोस्रो चरण सुरु भएको[११] बताएका छन् । नेपाली कथाले ***गोर्खासंसार*** प्रकाशित हुनुभन्दा झन्डै पच्चीस वर्ष अघि नै ***गोरखापत्र***मा प्रकाशित कथाहरूमार्फत् सामाजिक विषयवस्तु र मौलिकतालाई आत्मसात् गर्न थालेको देखिन्छ । तर रोचक कुरा त के छ भने ***गोरखापत्र***मा छापिएका कथामध्ये जसमा सामाजिक विषयवस्तु छ, तिनमा मौलिकताको मात्रा निकै कम थियो भने जसमा मौलिकता छ, तिनमा सामाजिक विषयवस्तुको अंश नगण्य मात्र थियो । ***गोर्खासंसार***को प्रकाशनपछि यी दुवैको मिलन विन्दु देखापर्न थाल्यो र आधुनिकताको प्रवर्तनका लागि पृष्ठभूमि तयार भयो[१२] । ***गोर्खासंसार***मा वि.सं. १९८३ मा सूर्यविक्रम ज्ञवालीका 'देवीको वलि' र 'इष्टको वियोग' शीर्षक दुई कथा, रूपनारायण सिंहका 'परिवर्तन' र 'अन्नपूर्णा' शीर्षक दुई कथा, वि.सं. १९८४ मा अज्ञात लेखकको 'नरवहादुर गुरुङ' शीर्षक कथा, १९८५ मा अज्ञात लेखककै 'विलाप' शीर्षक कथा, १९८६ मा माथि उल्लिखित 'एउटा गरिब सार्कीकी छोरी' र 'करनीको फल' का साथै अज्ञात लेखकको 'हिन्दूदेवी' शीर्षक कथा प्रकाशित भएका देखिन्छन् । कतिपय समालोचकले त पूर्वोल्लिखित 'अन्नपूर्णा' कथाको प्रकाशन काल अर्थात् वि.सं. १९८३ बाटै आधुनिक काल सुरु भएको मान्नुपर्ने तर्कसमेत दिएको पाइन्छ ।

वास्तवमा उल्लिखित पृष्ठभूमिमा काठमाडौँबाट प्रकाशित भएको ***शारदा*** (वि.सं. १९९१) पत्रिकाबाट नेपाली कथामा आधुनिकता सुरु हुन्छ । जापानको जागरण र एसिया महादेशमा त्यसको प्रभाव, दुई विश्वयुद्धका परिणाम, नेपालकै राष्ट्रिय स्थितिमा आएको जटिलता र त्यससँग मध्यमवर्गको द्वन्द्व आदिले गर्दा नेपाली लेखकहरूलाई यथार्थमा ओर्लिन प्रेरित गरेको थियो । ***शारदा*** पत्रिकाले यही प्रेरणाको वातावरण सृजित गरिदियो[१३] । यसै पत्रिकामा वि.सं. १९९२ मा प्रकाशित गुरुप्रसाद मैनालीको 'नासो' कथाबाट नेपाली कथामा यथार्थवादी युगको आरम्भ भयो, जो नेपाली कथामा आधुनिक कालको प्रारम्भबिन्दु हो ।

आधुनिक कालको चरण विभाजन

गुरूप्रसाद मैनालीले आदर्शोन्मुख सामाजिक यथार्थवादलाई आधुनिक नेपाली कथाको मूल प्रवृत्ति वनाइदिए । गुरूप्रसाद मैनाली शैलीका दृष्टिले हिन्दीका कथाकार प्रेमचन्द्र र शरद्चन्द्र चट्टोपाध्यायबाट अधिक प्रभावित मानिन्छन् भने विचारका दृष्टिले गान्धीबाट प्रभावित देखिन्छन् । त्यसैले उनका कथामा हिन्दू आदर्श, नैतिकता, चारित्रिक उच्चता, मर्यादा र पारिवारिक मेलमिलापका सुन्दर प्रसङ्गहरूको चित्रण भएको पाइन्छ । मैनालीले अनुवाद-रूपान्तरणमा सीमित, कलाहीन, रसहीन र मधुरतारहित नेपाली कथालाई यथार्थपरक, संवेदनायुक्त, सरस, मनोरम र मार्मिक तुल्याइदिए । यद्यपि मैनालीका कथाको मूल प्रवृत्ति आदर्शोन्मुख सामाजिक यथार्थवाद होइन, बरू यथार्थवादोन्मुख आदर्शवाद हो भनेर पनि केही समालोचकहरूले बताउने गरेका छन् । तर मैनालीका

---

११. डा.दयाराम श्रेष्ठ र मोहनराज शर्मा, **नेपाली साहित्यको संक्षिप्त इतिहास**, २०४९: ८६ ।

१२. पूर्ववत् ।

१३. पूर्ववत्, पृष्ठ ८८ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कथामा आदर्शवाद उद्देश्यका तहमा रहनु र यथार्थवाद प्रस्तुतिका तहमा रहनुले उनको मूल प्रवृत्ति आदर्शोन्मुख यथार्थवाद हो भन्ने स्पष्ट छ ।

मैनालीकै समकालीनका रूपमा 'नासो' छापिएको ६ महिनापछि शारदा पत्रिकामा 'चन्द्रवदन' कथा छपाएर फ्रायडवादबाट प्रभावित मनोवैज्ञानिक यथार्थवादी कथाधाराका प्रवर्तक बनेर विश्वेश्वरप्रसाद कोइराला देखापरे । त्यस्तै 'नासो' भन्दा दुई महिनामात्र कान्छो बनेर शारदामा छापिएको 'पराइघर' कथामार्फत् वालकृष्ण समसमेत यथार्थवादी कथाकारकै रूपमा परिचित हुन खोजे । पछि बालकृष्ण समले बालमनोवैज्ञानिक कथाधारालाई प्रतिष्ठित र विकसित तुल्याए । यसरी आधुनिकताको प्रारम्भकालमै दुई खाले धारा वा प्रवृत्तिहरू नेपाली कथामा भित्रिएका देखिन्छन् । प्रवृत्तिगत दृष्टिले प्रारम्भकालदेखि अहिलेसम्मको नेपाली कथायात्रालाई निम्न तीन चरणमा वर्गीकरण गर्न सकिन्छः

प्रथम चरणः वि.सं. १९९२ देखि २००७ सालसम्म
दोस्रो चरणः वि.सं. २००८ देखि २०१९ सालसम्म
तेस्रो चरणः वि.सं. २०२० देखि हालसम्म

प्रथम चरणः वि.सं. १९९२ देखि २००७ सालसम्म

यस चरणमा निम्न तीन मोडहरू आएको देखिन्छः

क) वि.सं. १९९२ देखि १९९४ सम्म निर्माणकालः यस कालमा आधुनिक नेपाली कथाको जग वसाल्ने काम भयो ।

ख) वि.सं. १९९५ देखि २००३ सम्म विकासकालः यस कालमा कथाकार भवानी भिक्षुको उदय, कथाकुसुमको प्रकाशन आदि कारणले आधुनिक कथाको पर्याप्त विकास हुन पुग्यो ।

ग) वि.सं. २००४ देखि २००७ साल नवजागरण कालः यो विश्वमै ठूला-ठूला राजनीतिक परिवर्तनहरू भैरहेको र नेपालमा समेत राजनीतिक चेतनाको तीव्र विकास भएको समय थियो । त्यस कारण यस कालका कथामा राजनीतिक प्रभाव देखिन्छ र यतिखेरका कथाले पाठकहरूमा राजनीतिक जागरणको विकास गर्न खोजेको देखिन्छ ।

आधुनिक नेपाली कथाको प्रथम चरणमा गुरूप्रसाद मैनालीले भित्र्याएको आदर्शोन्मुख सामाजिक यथार्थवाद, विश्वेश्वरप्रसाद कोइरालाद्वारा प्रवर्तित मनोवैज्ञानिक यथार्थवाद र बालकृष्ण समद्वारा प्रवर्तित बालमनोवैज्ञानिक प्रवृत्ति नेपाली कथाका मूल प्रवृत्तिका रूपमा देखापरेको पाइन्छ । यद्यपि समद्वारा प्रवर्तित प्रवृत्तिलाई छुट्टै प्रवृत्ति नमानेर मनोविज्ञानभित्रकै एक हाँगो मान्न सकिन्छ ।

मैनालीका अतिरिक्त गङ्गाविक्रम सिजापति, पुष्करशमशेर जवरा, पूर्णवहादुर श्रेष्ठ, पूर्णदास श्रेष्ठ, हरिकृष्ण श्रेष्ठ, जितेन्द्रबहादुर शाह, हृदयचन्द्रसिंह प्रधान, रुद्रराज पाण्डे, शिवकुमार राई, शङ्कर कोइराला, पूर्णप्रसाद ब्राह्मण, सुरेन्द्रबहादुर शाह, केशवराज पिंडाली, कृष्णप्रसाद चापागाईं, भाइचन्द्र प्रधान, दलबहादुर लामा, अच्छा राई 'रसिक', दौलतविक्रम विष्ट, जयनारायण गिरी, इन्द्र सुन्दास, भीमनिधि तिवारी, माया ठकुरी, कृष्णचन्द्रसिंह प्रधान, रमेश विकल, श्यामदास वैष्णव आदि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सामाजिक कथाकार पनि यस कालमा देखा परे । उल्लिखित कथाकारका कथाहरूमा वालविवाहको कटु परिणाम, लोग्नेले सौता हालेको फलस्वरूप जेठी पत्नीको अवहेलना, सासूको अत्याचार, विधवाको कारुणिक दशा, बूढो मान्छेसँग बिहे भएपछि युवावस्थामा वैधव्य भोग्नुपर्दा उत्पन्न हुने नारीको दुःखमय परिस्थिति, नारीको उदार र परोपकारी स्वभावको महिमा, युवायुवतीबीचको प्रेममा समाजले हाल्न खोजेको तगारो, सौतेनी आमाको दुर्व्यवहार वा माया, आफ्नी तरुनी पत्नीप्रति बूढो र शङ्कालु पतिले गरेको अनावश्यक शङ्का, कर्कशा स्वास्नीको अलच्छिनी बानी, दरबारको चौघेराभित्र सीमित युवतीहरूको छट्पटाएको मनोदशा, छोरीको विहेको समस्या आदि सामाजिक विषयवस्तुहरू चित्रित भएका पाइन्छन् । वास्तवमा यतिखेरका यथार्थवादी कथा लेखकहरू भावुक आदर्शवादमा आधारित कथाहरूसँग कडा चुनौतीको सामना गर्दै विकासयात्रामा संलग्न भएको देखिन्छ ।

त्यसैगरी विश्वेश्वरप्रसाद कोइरालाले सुरु गरेको मनोवैज्ञानिक धारालाई अझ सशक्त, गम्भीर र सूक्ष्म वनाउँदै वि.सं. १९९५ सालमा 'मानव' कथा लिएर भवानी भिक्षु देखा परेपछि मनोवैज्ञानिक कथाधारा अझ सशक्त बन्न पुग्यो । यस धाराका अन्य तत्कालीन कथाकारहरूमा तारिणीप्रसाद कोइराला र विजय मल्ल अग्रणी देखा पर्छन् । उल्लिखित कथाकारका कथामा उमेर छिप्पिँदा पनि विवाह नभएपछि सम्पन्न परिवारकी युवतीमा लोग्नेमान्छेसँग सहवास गर्नका लागि पलाएको चाहना, पुरुषको वासनालोलुप पशुप्रवृत्ति, युवक युवतीबीचको प्रेम आदि मनोवैज्ञानिक र रतिरागात्मक यौनमूलक विषयवस्तु चित्रित गरिएका पाइन्छन् । त्यस्तै बालकृष्ण समले सुरु गरेको मनोवैज्ञानिक धाराभित्रकै उपधारा मान्न सकिने बालमनोवैज्ञानिक उपधारामा लक्ष्मीप्रसाद देवकोटा, गोविन्दवहादुर मल्ल 'गोठाले', देवकुमारी थापा आदि कथाकार देखा परे । बालमनोवैज्ञानिक कथामा बालकको आन्तरिक मनोरचना र आवेग संवेगहरूको चित्रण फेला पार्न सकिन्छ ।

नेपाली कथाको प्रथम चरणमा देखिएको यथार्थवादप्रतिको प्रवल मोहको चरमोत्कर्ष वि.सं. २००६ मा 'गरिब' कथामार्फत् रमेश विकलको आगमन भएपछि देखापर्छ । नेपाली कथा परम्परामा सं. १९९० को दशकको पूर्वार्धदेखि जब यथार्थवाद स्पष्ट रूपमा प्रतिष्ठापित भयो, जनसाहित्यको पूर्वाभास फाट्टफुट्ट[१४] देखा पर्न थालेको थियो । तर त्यस बेलाको राजनीतिक व्यवस्था नै जनविरोधी भएको हुनाले कथाकारहरूले आफूभित्रको जनवादी चेतनालाई लुकाउन बाध्य हुनु परेकाले मार्क्सवादी साहित्य-चिन्तनलाई सोझै व्यक्त गर्न सकेनन् । ....२००७ मा जब त्यस निरङ्कुशतन्त्रको अवसान भयो, आधुनिक नेपाली कथाको यथार्थवादी धारामा एउटा अर्को महत्त्वपूर्ण धारा 'प्रगतिवाद' जोडिन पुग्यो[१५] । माथि उल्लिखित सामाजिक यथार्थवादी (आदर्शोन्मुख सामाजिक यथार्थवादसहित) र मनोविज्ञानवादी धारासँगै यो अर्को प्रगतिवादी धारा पनि नेपाली कथामा आफ्नै गतिमा स्वतन्त्र रूपमा अगाडि बढ्न थाल्यो ।

---

१४. डा. दयाराम श्रेष्ठ, "नेपाली कथासाहित्यको विकासक्रम र वर्तमान सन्दर्भ", **समकालीन साहित्य**, २०५९: २१ ।
१५. पूर्ववत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दोस्रो चरणः वि.सं. २००८ देखि २०१९ सालसम्म

नेपाली साहित्यका सबै फाँटमा सात सालपछि आधुनिकता अझ झ्याङ्गिँदै र विस्तारित हुँदै गएको देखिन्छ। कथासाहित्यमा पनि सात सालपछि आधुनिक प्रवृत्तिहरूको विस्तार भएको र धेरै कथालेखकहरूले विभिन्न शैलीहरू प्रयोग गर्दै नवीनताको प्रतिनिधित्व गर्न थालेको पाइन्छ।

वास्तवमा सात सालको ऐतिहासिक जनक्रान्तिले निषेधका सबै पर्खालहरूलाई भत्काइदियो। राजनैतिक स्वतन्त्रताको वातावरणमा कथाकारहरू समाजवादी-यथार्थवादी चिन्तनतर्फ आकर्षित भएर कथा लेख्न थाले। यस चरणमा प्रगतिवादी कथालेखनको लहर नै चल्यो। समाज र व्यक्तिका पतनशील नग्नताको उद्घाटन भयो। पतीत राणावर्गका साथै शोषक, सामन्ती र समाजविरोधी तत्त्वहरूको खुलेयाम भण्डाफोर भयो। ठूलो परिवर्तन भए पनि राजनीतिक अस्थिरता र आर्थिक दुरवस्था बढ्दै जाँदा जनतामा बढिरहेका निराशा र कुण्ठाका अनुभूतिहरूसमेत विस्तारै यस चरणका कथाहरूमा प्रकट हुन थाले। यस चरणमा प्रजातान्त्रिक वातावरणले कथाको विषयमा व्यापकताका साथै गम्भीरता ल्याएको र अभिव्यक्तिका विविध शैलीहरूतर्फ कथाकारहरूको रूचि बढेको देखिन्छ। २०१० पछि रायल नेपाल एकेडेमीको स्थापना र त्रिभुवन विश्वविद्यालयको स्थापनाले पनि साहित्यको विकासका साथसाथै कथाको विकासमा सकारात्मक योगदान पुगेको देखिन्छ।

२०१७ सालमा प्रजातान्त्रिक हक अधिकारहरू खोसी पञ्चायती व्यवस्थाको थालनी गरिएपछि अभिव्यक्ति स्वतन्त्रता सङ्कुचित बन्न पुग्यो। त्यसैले यस चरणको पछिल्लो कालखण्डमा कथाकारहरूले कथालेखनमा प्रतीकात्मकताको खोजी गर्न थालेको देखिन्छ।

दोस्रो चरणका प्रमुख कथाकारहरूमा डी.पी अधिकारी, गोविन्दप्रसाद लोहनी, भवानी घिमिरे, यज्ञप्रसाद आचार्य, बालकृष्ण पोखेल (केकेमनुक्च्यो पोखेल), देवमणि ढकाल, तारानाथ शर्मा, कृष्णप्रसाद सर्वहारा, पोषण पाण्डे, ईश्वरवल्लभ, इन्द्रवहादुर राई, पुष्कर लोहनी, कुमार ज्ञवाली, प्रेमा शाह, परशु प्रधान, कुमार नेपाल, मदनमणि दीक्षित आदि देखा पर्छन्।

तत्कालीन सामाजिक समस्याको आन्तरिक यथार्थ प्रस्तुत गर्न र मानिसका अन्तर्मनोवृत्तिको निरूपण गर्न यी कथाकारहरू प्रवृत्त छन्। विभिन्न मनोवैज्ञानिक क्रिया र प्रभाव पात्रमा देखाएर क्षणविशेषका अनुभूतिलाई व्यक्त गर्नसक्ने क्षमता यी कथाकारहरूमा पाइन्छ। यस चरणमा यौनको मनोवैज्ञानिकतालाई विषय बनाएर लेखिने कथाको निकै लोकप्रियता रह्यो र कतिपय कथाकारमा बौद्धिक प्रयोगको ठूलो रहर पनि देखापर्‍यो। युगीन यथार्थ र व्यक्तिमनका व्यापक पक्षहरूको उद्घाटनमा यस चरणका कथाकारहरू केन्द्रित रहेको देखिन्छ।

तेस्रो चरणः वि.सं. २०२० देखि हालसम्म

वि.सं. २०२० को दशकदेखि आधुनिक नेपाली कथाको इतिहासमा नयाँ धारा आयो, जसलाई 'नवचेतनावादी युग' भनिएको छ। दार्जिलिङ्गबाट ईश्वरवल्लभ, वैरागी काइँला (तिलविक्रम नेम्वाङ) र इन्द्रवहादुर राई तीन जना लेखकको नेतृत्वमा 'तेस्रो आयाम' नामक साहित्यिक आन्दोलन सञ्चालित भएपछि कथामा पनि यसको प्रभाव पर्‍यो। तेस्रो आयामका तीन जना उद्घोषकमध्ये

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रबहादुर राई कथासिर्जनातिर बढी केन्द्रित भएको देखिन्छ । उनका आयामेली कथाहरू संरचना र रूपविन्यासका दृष्टिले त्यसअघिका कथाहरू भन्दा निकै भिन्न छन् । पछि गएर राईले विनिर्माणवादको प्रायोगिक रूपबाट समेत नेपाली कथाका पाठकलाई परिचित तुल्याए, जसलाई उत्तरआधुनिकतावादी प्रचेष्टाको पूर्वाभ्यास मानिएको छ ।

यस चरणको प्रारम्भ र मध्यतिर चलेका तेस्रो आयाम, राल्फा, अस्वीकृत जमात, अमलेख, बूटपालिस आदि साहित्यिक आन्दोलनहरूले परम्परागत लेखनको कडा विरोध गर्दै नयाँ मान्यता स्थापित गर्ने प्रयत्न गरेको पाइन्छ । नवचेतना, नवधारणा, नवदृष्टि, नवपरिप्रेक्ष्य आदिको बहुलता यस चरणको प्रमुख विशेषता मान्न सकिन्छ । यस चरणका कथाकारहरू नयाँ विषयवस्तु र नयाँ शिल्पविधानको आविष्कारतिर अझ बढी केन्द्रित भएको एवं मानवजीवन र बाँच्नुको स्थितिलाई अझ गहिरिएर बुझ्ने प्रयासमा लागेको देखिन्छ । सामाजिक, आर्थिक र राजनीतिक समस्याप्रतिको तिनीहरूको दृष्टिकोण सूक्ष्म तथा व्यापक दुवै हुन पुग्यो ।

यस चरणको पूर्वार्द्धमा वि.सं. २००७ कै आसपासमा कथा लेख्न थालेका रमेश विकल, परशु प्रधान, प्रेमा शाह, ईश्वरवल्लभ, पुष्कर प्रधान, दौलतविक्रम विष्ट, शङ्कर लामिछाने आदि कथाकारहरू निरन्तर सिर्जनामा संलग्न रहेको र नयाँ कथाकारका रूपमा ध्रुवचन्द्र गौतम, पारिजात, भाउ पन्थी, अर्जुन निरौला, खगेन्द्र सङ्ग्रौला, जगदीश घिमिरे, शैलेन्द्र साकार, मनु ब्राजाकी, ओममणि शर्मा, पद्मावती सिंह, मुरारि अधिकारी, विनयकुमार कसजू, भागीरथी श्रेष्ठ, सनत रेग्मी आदिले समेत सक्रियतापूर्वक कलम चलाउन सुरु गरेको देखिन्छ ।

वि.सं. २०२५ पछि कथासाहित्यमा देखापरेका देवेन्द्रप्रताप शाह, प्रकाश प्रेमी, अविरल स्थापित, हरि अधिकारी, सन्तोष भट्टराई, कविताराम, किशोर नेपाल, जैनेन्द्र जीवन, नयनराज पाण्डे, वनमाली निराकार, अनीता तुलाधर, मञ्जु काँचुली, ध्रुव सापकोटा, इन्दिरा प्रसाईं, रामहरि पौड्याल, नगेन्द्रराज शर्मा, किशोर पहाडी, पूर्णविराम, रमेश गोर्खाली, अशेष मल्ल आदिले आधुनिक कथालाई अझै सशक्त तुल्याउन योगदान दिए । उनीहरू युगको अन्तर्व्यथा र जीवनका विसङ्गत स्थितिलाई कलात्मक पाराले अभिव्यक्ति दिन सफल देखिन्छन् ।

२०३० को दशकमा विजय चालिसे, माया ठकुरी, इन्दिरा प्रसाईं, सुलोचना मानन्धर, गिरिराज आचार्य, नारायण ढकाल, इस्माली, राजव, नन्दराम लम्साल, ऋषिराज बराल, विजय बजिमय, दिनेश सत्याल, ध्रुव मधिकर्मी, रमेश नेपाली, लव गाउँले, देविका तिमिल्सिना, गोविन्द गिरी 'प्रेरणा', सीता पाण्डे, मधुवन पौडेल, कुन्ता शर्मा, सञ्जय थापा (प्रदीप नेपाल), तीर्थ न्यौपाने, रमेश तूफान, अमर शाह, हरिगोविन्द लुइँटेल, किशोर कुँवर, प्रेम छोटा, अविनाश श्रेष्ठ आदि कथाकार देखापरे । यिनीहरूले सामाजिक राजनीतिक क्षेत्रमा देखापरेका विकृति विसङ्गतिको सूक्ष्म चिरफार गर्नुका साथै जनताको मनमा व्याप्त निराशा र कुण्ठालाई समेत अभिव्यक्ति दिएको पाइन्छ । उल्लिखित कथाकारहरूले कथाविधाको परम्परागत स्वरूपभन्दा भिन्न किसिमको विकीर्ण, तर सङ्गततुल्य प्रतीत हुने र रमरम व्यङ्ग्य ध्वनित हुने गद्यशैलीद्वारा आधुनिकतावादको नयाँ परिदृश्य निर्माण गरेका छन् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समकालीन नेपाली कथाले २०४० को दशकयता आफ्नै किसिमको प्रकृति र नियतिको फल भोगिरहेको छ, जुन सकारात्मक र नकारात्मक दुवै छ । यो दशक र त्यसभन्दा यताको नेपाली कथाले आधुनिकताभित्र पनि अत्याधुनिकताको आमन्त्रण गरिरहेको छ । यस कालमा ०३० को दशकमा उदाएका कथाकारहरूले अझ सक्रियतापूर्वक कलम चलाइरहेका देखिन्छन् । अघिल्लो दशकमा देखिएका कथाकारका अतिरिक्त सरुभक्त, इन्द्रकुमार श्रेष्ठ 'सरित्', विष्णु आभूषण, रत्न प्रजापति, रोशन थापा 'नीरव' ध्रुव सापकोटा, मधुवन पौडेल, आत्माराम शर्मा आदि नयाँ कथाकारहरू यतिखेर सक्रिय रहेका पाइन्छन् । नेपालबाहिर दार्जीलिङ र सिक्किमका साथै प्रजातन्त्रको पुनःस्थाप्पनापछि काठमाडौँबाहिर मोफसलका क्षेत्रहरूमा पनि नयाँ नयाँ कथालेखकहरू देखापर्न थाल्नु वि.सं. २०४० को दशक र त्यसयताको उल्लेख्य सन्दर्भ हो ।

अस्तित्ववाद, मार्क्सवाद, प्रयोगवाद आदि विभिन्न मान्यतालाई नवीन सन्दर्भमा पेस गर्दै पछिल्लो कालखण्डका नेपाली कथाकारहरूले नव यथार्थवाद, नारीवादी लेखन, आञ्चलिकता, स्वैरकल्पना, जातीय विभेद र लैङ्गिकताजस्ता मुद्दाहरूलाई समेत कथाका विषय बनाएर सामाजिक आन्दोलनहरूप्रति साहित्यिक सरोकार प्रकट गरिरहेका छन् । डायस्पोरिक लेखन अर्थात् आप्रवासी समुदायका पीडाव्यथा र सरोकारहरू पनि यसकालमा जबर्जस्त रूपले नेपाली कथामा भित्रिन थालेको देखिँदैछ, जसलाई अब उपेक्षा गर्न सकिँदैन । नवीन वैज्ञानिक प्रविधिहरूको विकासले कथासाहित्यमा समेत अवसर र चुनौतीहरू दुवै थपिरहेको देख्न सकिन्छ । युवा पुस्तामा बढ्दै गएको पश्चिमी अनुकरणको मोहले केही समयपछि अधिकांशले अङ्ग्रेजीमै लेख्न थाल्नाले नेपाली भाषामा कथा लेख्ने कथाकार र कथाका सहृदयी पाठकहरूसमेत कम हुँदै जाने त होइनन् भन्ने आशंका पनि गर्न थालिएको छ । यसरी पछिल्लो कालखण्डमा नेपाली कथासाहित्यमा एकातिर नयाँ नयाँ सम्भावना देखापरिरहेका छन् भने अर्कातिर साहित्यमाथि राजनीति हाबी हुनु, सूचना र सञ्चार प्रविधिहरूको तीव्र विकास हुनु र राजनीतिक एवं प्रकाशन स्वतन्त्रताका कारण गुणात्मकभन्दा सङ्ख्यात्मक वृद्धि देखिनुले कथासाहित्यको विकासमा पर्याप्त चुनौतीहरूसमेत देखिँदै गएका छन् ।

निष्कर्ष

नेपाली कथाले आधुनिक कालमा प्रवेश गरेको पचहत्तर वर्ष पूरा भै सक्यो । बृहत् परिप्रेक्ष्यमा यो त्यति लामो समय होइन, तर एक जना व्यक्तिको जीवनावधिका दृष्टिले हेर्ने हो भने यो लामै समय पनि हो । यो समयमा नेपाली राजनीति, सामाजिकता र आर्थिक क्षेत्रमा अहम् महत्त्व राख्ने ठूला-ठूला परिवर्तनहरू भएका छन् । यी परिवर्तनको प्रभाव नेपाली कथामा पनि परेको देख्न सकिन्छ, जसका कारण विज्ञानबाट अत्यधिक प्रभावित रहेको पाश्चात्य यथार्थवादी मान्यता आधुनिक नेपाली कथाको मूल सन्दर्भ बन्न पुग्यो । समाजशास्त्र, मानवशास्त्र, मनोविज्ञान (फ्रायड, एड्लर र युङका मनोविश्लेषणसम्वन्धी सिद्धान्तसहित) र मार्क्सवादका युगीन बौद्धिक एवं क्रान्तिकारी मान्यताहरूले यथार्थवादलाई अझ पोसिलो बनाउने काम गरे । वि.सं. २०२० साल यता नेपाली कथा बौद्धिकतामा आधारित प्रयोगवादको चरणमा प्रवेश गरी त्यसको रसास्वादनसमेत गरेर धेरै अगाडि आइसकेको छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रबहादुर राईको लीला लेखनले नेपाली कथामा विनिर्माणवादको प्रायोगिक रूपलाई आफूमा आत्मसात् गर्न सकेको छ भने पछिल्लो चरणमा उत्तरआधुनिकतावाद र डायस्पोरिक अवधारणा पनि कथा क्षेत्रमा भित्रिइसकेको छ। उल्लिखित परिदृश्यमा नेपाली कथासाहित्यसामु अनेकौँ सम्भावना र थुप्रै चुनौतीहरूसमेत रहेको देख्न सकिन्छ।

सन्दर्भकृतिसूची

१. अवस्थी, महादेव (सं.) (२०५९), **नेपाली कथा** (भाग २: दो.सं.), ललितपुरः साझा प्रकाशन।

२. उपाध्याय, विमला (सं.) (२०६४), **मिमिरे** (पूर्णाङ्क २६०: कथा विशेषाङ्क), काठमाडौँ: नेपाल राष्ट्र बैंक।

३. कँडेल, घनश्याम (सं.) (२०६५), **नेपाली समालोचना**, ललितपुरः साझा प्रकाशन।

४. जोशी, कुमारबहादुर (२०५०), **विकीर्ण चिन्तन**, दो.सं., काठमाडौँ: साझा प्रकाशन।

५. थापा, अशोक (प्र.सं.) (२०६१/०६२), **कुञ्जिनी** (वर्ष १२, अङ्क ९), साहित्य कुञ्ज, कीर्तिपुरः नेपाली केन्द्रीय विभाग त्रिवि।

६. पन्थी, भाउ (प्र.सं.) (२०६१), **समकालीन साहित्य** (पूर्णाङ्क ५५), काठमाडौँ: नेपाल राजकीय प्रज्ञा प्रतिष्ठान।

७. पन्थी, भाउ (प्र.सं.) (२०६७), **समकालीन साहित्य** (पूर्णाङ्क ६३), काठमाडौँ: नेपाल प्रज्ञाप्रतिष्ठान।

८. पोखरेल, भानुभक्त (२०५९), **सिद्धान्त र साहित्य** (दो.सं.), ललितपुरः साझा प्रकाशन।

९. रेग्मी, सनत (प्र.सं.) (२०५९), **समकालीन साहित्य** (पूर्णाङ्क ४५, नेपाली कथा समालोचना विशेषाङ्कः १), काठमाडौँ: नेपाल राजकीय प्रज्ञा प्रतिष्ठान।

१०. श्रेष्ठ, डा.दयाराम र मोहनराज शर्मा (२०४९), **नेपाली साहित्यको संक्षिप्त इतिहास** (चौ.सं.), ललितपुरः साझा प्रकाशन।

११. सुवेदी, राजेन्द्र (सं.) (२०५१), **स्नातकोत्तर नेपाली कथा,** ललितपुरः साझा प्रकाशन।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनकालमा नेपालमा चलेको सङ्ख्यालेखनपद्धति

प्रा. दिनेशराज पन्त

आजभोलि हामी ०, १, २, ३, ४, ५, ६, ७, ८ र ९ को प्रयोग गरेर सम्पूर्ण व्यवहार चलाउने गर्छौँ । तर यस्तो कुरा प्राचीनकालमा थिएन । बेबिलोनी, चिनियाँ, मिश्री, ग्रीक, मय, रोमन सभ्यताहरूमा शून्यको प्रयोग हुँदैनथ्यो र प्रत्येक अङ्क बुझाउनको लागि भिन्नाभिन्नै चिह्नको प्रयोग गरिन्थ्यो । भारतवर्षको सभ्यताअन्तर्गत ब्राह्मी लिपि र त्यसबाट निस्किएका सुरुसुरुका लिपिहरूमा मात्र होइन कि खरोष्ठी लिपिमा पनि ० को प्रयोग हुँदैनथ्यो र प्रत्येक अङ्कको लागि भिन्नाभिन्नै चिह्नको प्रयोग गरिन्थ्यो । अभिलेखको आधारमा पहिलो प्रामाणिक काल ठहरिएको हाम्रो लिच्छविकालका अभिलेखहरूमा पनि संख्यालाई बुझाउँदा ० को प्रयोग गरिएको पाइँदैन र प्रत्येक अङ्कलाई बुझाउन भिन्नाभिन्नै चिह्नको प्रयोग गरिएको पाइन्छ ।

